श्रीपुरुषोत्तमग्रन्थावली ५

द्रव्यशुद्धिदीपिका
भक्तिमार्गीयापराधनिरूपणविवृतिः
उत्सवप्रतानः

श्रीवल्लभाचार्य ट्रस्ट, मांडवी-कच्छ

श्रीवल्लभाचार्य ट्रस्ट, मांडवी–कच्छ

सेमिनार:

१. शब्दखण्डीया विद्वत्परिचर्चा, गांधीनगर
२. कार्यकारणभावविचार, वडोदरा–गुजरात
३. प्रत्यक्षप्रमाण सङ्गोष्ठी, पुणे
४. अन्यख्यातिवादीया विद्वत्सङ्गोष्ठी, पुणे
५. अन्धकारवाद विद्वत्परिचर्चा, पुणे
६. वार्तापरिचर्चा, हालोल–गुजरात
७. अधिकारपरिचर्चा, हालोल–गुजरात
८. साधनाप्रणाली, मुम्बई
९. सेवा–समर्पण, मुम्बई
१०.कथायां वा/गुणगान साधना, मुम्बई
११.शरणागति, मुम्बई
१२.पुष्टिभक्तिसाधनामें प्रतिबन्ध, मुम्बई
१३.जघन्याधिकार, मुम्बई
१४.पुष्टिफलमीमांसा, मुम्बई
१५.World Philosophy Conference, Delhi (Cosponsored with Indian Philosophical Congress)
१६.International Conference on World Peace, Ahmedabad (Cosponsored with Uni. of Gujarat)

आचार्यवंशजोंकेलिये अध्ययनसत्र:

१. तर्कामृतम् – न्यायसिद्धान्तमुक्तावली
२. वेदान्तसार

ग्रन्थप्रकाशन :

साम्प्रदायिक परीक्षाकी पाठ्यपुस्तकें:

१. प्रवेशिका, लेखक: गो.शरद् (गुजराती)	१०
२. प्रवेशिका, लेखक: गो.शरद् (हिन्दी)	नि:शुल्क
३. प्रवेशिका, लेखक: गो.शरद् (अंग्रेजी)	नि:शुल्क
४. पुष्टिप्रवेश–१, लेखक: गो.शरद् (गुजराती)	१०
५. पुष्टिप्रवेश–२, लेखक: गो.शरद् (गुजराती)	१०
६. पुष्टिप्रवेश–१–२, लेखक: गो.शरद् (हिन्दी)	१०
७. पुष्टिपथ, लेखक: गो.शरद् (गुजराती)	२०
८. पुष्टिपथ, लेखक: गो.शरद् (हिन्दी)	२०
९. प्रमेयरत्नसंग्रह, लेखक: गो.शरद् (गुजराती)	२०
१०. Manual of the Devotional Path of Pushti, गो.शरद्	६५

साम्प्रदायिक विचारगोष्ठी

श्रीवल्लभाचार्य ट्रस्ट द्वारा समायोजित साम्प्रदायिक विचारगोष्ठीमें प्रस्तुत हुवे
विभिन्न शोधपत्र तथा उनपर हुई विशद चर्चा का संग्रह

११. वार्तापरिचर्चा	१५
१२. साधनाप्रणाली संगोष्ठी	५०
१३. अधिकारपरिचर्चा	१००
१४. पुष्टिभक्तिमें कथासाधना संगोष्ठी	५०
१५. शरणागति विचारगोष्ठी	५०
१६. सेवा–समर्पण विचारगोष्ठी	५०

१७. शरणागति विचारगोष्ठी एक पूरक प्रश्नोत्तरी(गुजराती) नि:शुल्क
१८. पुष्टिभक्ति तथा प्रपत्तिमें प्रतिबन्ध १००
१९. जघन्याधिकार ८०
२०. पुष्टिफलमीमांसा १००

तत्त्वदर्शन विषयक राष्ट्रीय सेमिनार

श्रीवल्लभाचार्य ट्रस्ट द्वारा समायोजित तत्त्वदर्शन विषयक राष्ट्रीय सेमिनारमें प्रस्तुत हुवे विभिन्न शोधपत्र तथा चर्चा का संग्रह (संस्कृत-हिन्दी-अंग्रेजी)

२१. शब्दखण्डीया विद्वत्परिचर्चा २००
२२. अन्यख्यातिवादीया विद्वत्सङ्गोष्ठी १५०
२३. कार्यकारणभावविद्वत्सङ्गोष्ठी २००
२४. प्रत्यक्षप्रमाण विद्वत्सङ्गोष्ठी १५०
२५. अन्धकारवादीया विद्वत्सङ्गोष्ठी २००
२६. वाल्लभवेदान्त निबन्धसंग्रह, लेखक : गो. श्रीश्याम मनोहरजी नि:शुल्क

नित्यस्तोत्रपाठ:

२७. पुष्टिपाठावली (हिन्दी) १०
२८. पुष्टिपाठावली (गुजराती) १०
२९. पुरुषोत्तमसहस्रनाम-त्रिविधलीलानामावली(गुर्जरभाषानुवाद) २०

सन्दर्भग्रन्थ:

३०. पुष्टिविधानम् पादानुक्रमणिका १०
३१. Summary of Shuddhadvaita Vangmaya, लेखक: गो.शरद १५
३२. अमृत वचनावली (गुजराती) नि:शुल्क
३३. अमृत वचनावली (हिन्दी) नि:शुल्क
३४. पुष्टिअस्मिता संवर्धन शिविर, राष्ट्रीय संमेलन, भरूच २५

अध्ययनोपयोगी ग्रन्थ:

३५. पुष्टिविधानम्-२(व्याकरणम्)श्रीवल्लभाचार्य-श्रीगोपीनाथजी-श्रीगुसांईजी विरचित २६ ग्रन्थोंका पदच्छेद-अन्वय- शब्दपरिचय-वृत्तिपरिचय १००
३६. पुष्टिविधानम्-३ (व्रजभाषा)श्रीवल्लभाचार्य-श्रीगोपीनाथजी-श्रीगुसांईजी विरचित २६ ग्रन्थोंका शब्दार्थ-श्लोकार्थ-विवेचन-पादानुक्रमणिका १५०
३७. तत्त्वार्थदीपनिबन्धान्तर्गत शास्त्रार्थप्रकरणम्, (व्रजभाषाटीका) साधारण/राजसंस्करण ५०/७०
३८. तत्त्वार्थदीपनिबन्धान्तर्गत सर्वनिर्णयप्रकरणम् (व्रजभाषाटीका) साधारण/राजसंस्करण ८०/१००
३९. श्रीभागवतमहापुराण, चार खण्डमें (गुर्जरभाषानुवाद) ४००
४०. विवेकत्रयम्, प्रपञ्च-जीव-मूलरूप (संस्कृत) १०
४१. गृहसेवा और व्रजलीला(व्रजभाषा)व्याख्यात: गो.श्रीश्याम मनोहरजी नि:शुल्क
४२. गृहसेवा अने व्रजलीला(गुजराती)व्याख्यात: गो.श्रीश्याम मनोहरजी अप्राप्य
४३. पुष्टिप्रवाहमर्यादाभेद, व्याख्यात: गो.श्रीश्याम मनोहरजी(गुजराती) अप्राप्य
४४. श्रीगोपीनाथप्रभुचरण, जीवनचरित्र-ग्रन्थ-हस्ताक्षर (गुज.-हिन्दी) २५

४५. श्रीकृष्णचरित्र(दशमस्कन्ध गुर्जरभाषा-भावानुवाद)अनुवादक: गो.वा.श्रीनानुलाल गांधी ८०

४६. श्रीमद्भगवद्गीता, गुर्जरभाषानुवाद, अनुवादक : पूर्ववत्.

श्लोकार्थ-विवेचन-पादानुक्रमणिका. गीतातात्पर्य-न्यासादेशविवरण गुजराती अनुवाद सहित ५०

४७. रसदृष्टिनी तरफेणमां(गुजराती), लेखक : गो.श्रीश्याम मनोहरजी निःशुल्क

४८. सिद्धान्तनुं आचमन, प्रश्नोत्तर (गुज.) उत्तरदाता: गो.श्रीश्याम मनोहरजी निःशुल्क

४९. जिन श्रीवल्लभरूप न जान्यो (गुजराती)

गो.श्रीश्याम मनोहरजी लिखित श्रीवल्लभ महाप्रभुस्तोत्राणि ग्रन्थकी विस्तृत हिन्दी भूमिकाका गुर्जरभाषानुवाद तथा सौंदर्यपद्य, सर्वोत्तमस्तोत्र, वल्लभाष्टक, स्फुरत्कृष्णप्रेमामृत, श्रीहरिरायचरण रचित श्रीवल्लभस्तोत्र, पंचश्लोकी, शिक्षाश्लोकी आदि ग्रन्थोंकी टीकाओंका गुजराती अनुवाद. ७०

५०. सेवाकौमुदी(हिन्दी), विषय : नवधाभक्ति, लेखक : श्रीलालूभट्टजी,
व्याख्याता : गो.श्रीश्याम मनोहरजी अप्राप्य

५१. ब्रह्मवाद (हिन्दी) लेखक : गो.श्रीश्याम मनोहरजी निःशुल्क

५२. भक्तिवर्धिनी(गुज.), व्याख्याता : गो.श्रीश्याम मनोहरजी निःशुल्क

५३. सेवा(हिन्दी) (ऋतु-उत्सव-मनोरथ) व्याख्याता : गो.श्रीश्याम मनोहरजी निःशुल्क

५४. सेवा(गुज.) (ऋतु-उत्सव-मनोरथ) व्याख्याता : गो.श्रीश्याम मनोहरजी निःशुल्क

५५. षोडशग्रन्थगत उपदेशो अने तेमनी २८ वार्ताओ, लेखक : श्रीभूपेन्द्र भाटीया ४०

५६. षोडशग्रन्थगत उपदेशो अने तेमनी ६४ वार्ताओ, लेखक : श्रीभूपेन्द्र भाटीया ४०

५७. कृष्णाश्रय, श्रीकल्याणरायजी विरचित संस्कृत टीकानो गुजराती अनुवाद ०७

इतिहास

५८. आधुनिक न्यायप्रणाली अने पुष्टिमार्गीय साधनाप्रणालीनो आपसी टकराव(गुज.),
लेखक : गो.श्रीश्याम मनोहरजी निःशुल्क

५९. आधुनिक न्यायप्रणाली और पुष्टिमार्गीय साधनाप्रणालीका आपसी टकराव(हिन्दी.),
लेखक : गो.श्रीश्याम मनोहरजी निःशुल्क

चित्र

महाप्रभु श्रीवल्लभाचार्य निःशुल्क

श्रीगोपीनाथप्रभुचरण निःशुल्क

महाप्रभु श्रीवल्लभाचार्य-श्रीगोपीनाथप्रभुचरण-श्रीविट्ठलनाथप्रभुचरण निःशुल्क

गोशाला

जीर्णोद्धार : तृतीय लालजी श्रीबालकृष्णजीके बैठकजी, गाम : विंजाण-कच्छ

हस्तलिखित ग्रन्थोंका संग्रह-संरक्षण; पुस्तकालय

शुद्धाद्वैत पुष्टिभक्तिमार्गीय वाङ्मय :

शुद्धाद्वैत पुष्टिभक्तिमार्गके आधारभूत संस्कृत-व्रज-गुजराती आदि भाषामें लिखित मूल गद्य-पद्य ग्रन्थसाहित्य, उनका अनुवाद एवं उनके ऊपर लिखित विवेचन आदिका (साम्प्रदायिक

शब्दकोश, साम्प्रदायिक वचनानुक्रमणिका, भगवद्गीतापादानुक्रमणिका आदि सहित अध्ययनोपयोगी साहित्यका) बृहत् संग्रह. डाउनलोड् एवं मार्गदर्शन केलिये लिंक :
http://www.pushtimarg.net/pushti/pushti-vangmay.html

वर्तमानमें निम्नलिखित ग्रन्थ शुद्धाद्वैत पुष्टिभक्तिमार्गीय वाङ्मय :में उपलब्ध हैं :

षोडशग्रन्थ (सभी संस्कृत टीका, हिन्दी ग्रन्थपरिचय, गुजराती अनुवाद सहित)
तत्त्वार्थदीपनिबन्ध
–शास्त्रार्थप्रकरण (टिप्पणी–आवरणभङ्ग–योजना–सत्स्नेहभाजन, अनु.= गुज.–व्रज)
–सर्वनिर्णयप्रकरण (संस्कृत टीका = टिप्पणी–आवरणभङ्ग, अनु. =व्रजभाषा)
–भागवतार्थप्रकरण (सभी संस्कृत टीकाएं)
ब्रह्मसूत्राणुभाष्य **शिक्षापद्यानि** (सभी संस्कृत टीकाएं)
मधुराष्टकम् (सभी संस्कृत टीकाएं) **परिवृढाष्टकम्** (सभी संस्कृत टीकाएं)
पुरुषोत्तमनामसहस्रम् (सभी संस्कृत टीकाएं) **त्रिविधनामावली** (सभी संस्कृत टीकाएं)
सुबोधिनी (स्कन्ध १ तथा २ संस्कृत) **सेवाश्लोका**
विद्वन्मण्डनम् (मूल तथा गुजराती अनुवाद) **सौन्दर्यपद्य** (व्रजभाषा टीका)
साधनदीपिका (मूल तथा व्रजभाषा तथा गुजराती अनुवाद)
पुरुषोत्तमप्रतिष्ठाप्रकार(मूल–संस्कृतटीका–हिन्दी अनुवाद)
श्रीभागवतपुराण (स्कन्ध १–७, १०,११ मूल तथा हिन्दी–गुजराती अनुवाद)
श्रीहरिरायवाङ्मुक्तावली(५५ ग्रन्थ, मूल तथा गुजराती अनुवाद)
द्रव्यशुद्धि (मूल तथा गुजराती–व्रजभाषा अनुवाद)
८४ वैष्णववार्ता (मूल–भावप्रकाश, व्रजभाषा)
२५२ वैष्णववार्ता (मूल–भावप्रकाश, व्रजभाषा) **४१ शिक्षापत्र** (मूल तथा व्रजभाषा टीका)
प्रस्थानरत्नाकर **अवतारवादावली खंड २, ३** **वादावली**
भगवद्गीतामृततरंगिणी **वल्लभाष्टकम्** **सर्वोत्तमस्तोत्रम्**

श्रीवल्लभाचार्य विद्यापीठ : शीघ्र ही कार्यरत होने जा रही यह विद्यापीठ अध्ययनोपयोगी ग्रन्थालय, अध्ययनकक्ष, निवास, भोजन, अध्यापक आदि अत्यावश्यक सुविधाओंसे सुसज्ज होगी. http://www.vallabhacharyavidyapeeth.org/

पुष्टिस्वाध्याय : सप्ताहके प्रायः सभी दिन आबाल–वृद्ध सभी पुष्टिमार्गीओंकेलिये सम्प्रदायके मूल ग्रन्थोंका अध्यापन विद्वान् आचार्यवंशजों द्वारा तीन माध्यमोंसे होता है: १.टेलिफोनिक कोन्फरन्स्, २.इंटर्नेट् द्वारा लाईव् ऑडियो तथा ३. इंटर्नेट् द्वारा लाईव् वीडीयो कोन्फरन्स्. विशेष जानकारीकेलिये फोनसम्पर्क योगेन्द्रभाई: (+91) 9323733796 पिनाकीनभाई:(+91)9726444515. नीरजभाई(यु.एस्.ए.): +7325424165. ईमेलसम्पर्क: pushtiswadhyay@gmail.com.

गोस्वामी श्रीश्याम मनोहरजीद्वारा सम्पादित-पुनर्मुद्रित

शुद्धाद्वैत पुष्टिभक्ति सम्प्रदायके
मूल संस्कृत ग्रन्थ

१. सव्याख्यषोडशग्रन्थ [संयुक्तप्रकाशन, दुर्लभ]

खंड १. श्रीयमुनाष्टकम् से सिद्धान्तरहस्यम्(१-५)

खंड २. नवरत्नम् से भक्तिवर्धिनी(६-११)

खंड ३. जलभेदः से सेवाफलम्(१२-१६)

२. सव्याख्यषड्ग्रन्थाः(श्रीपुरुषोत्तमनामसहस्रम्, त्रिविधनामावली, प्रेमामतम्, श्रीपरिवृढाष्टकम्, मधुराष्टकम्, शिक्षाश्लोकी) [संयुक्तप्रकाशन, दुलर्भ]

३. तत्त्वार्थदीपनिबन्धः

खंड १. शास्त्रार्थ-सर्वनिर्णयप्रकरण

खंड २. भागवतार्थप्रकरण स्कन्ध १-५

खंड ३. भागवतार्थप्रकरण स्कन्ध ६-१२

४. ब्रह्मसूत्राणुभाष्यम् : प्रकाश-रश्मि व्याख्या सहित

खंड १. प्रथमाध्याय [नाथद्वारा टेम्पलबोर्ड, अतिदुर्लभ]

खंड २. प्रथमाध्याय [नाथद्वारा टेम्पलबोर्ड, अतिदुर्लभ]

खंड ३. द्वितीयाध्याय

खंड ४. तृतीयाध्याय

खंड ५. चतुर्थाध्याय

५. श्रीमद्भागवतसुबोधिनी

खंड १. प्रथम-द्वितीयस्कन्ध

खंड ४. जन्मप्रकरण

खंड ५. तामसप्रमाणप्रकरण

खंड ६. तामसप्रमेय-साधनप्रकरण

खंड ७. तामसफलप्रकरण

खंड ८. राजसप्रमाण-प्रमेयप्रकरण

खंड ९. राजससाधन-फलप्रकरण

६. श्रीपुरुषोत्तमग्रन्तावली

खंड-१. वेदान्ताधिकरणमाला-भावप्रकाशिका

खंड-२. प्रस्थानरत्नाकर

खंड-३. अवतारवादावली-२ (भेदाभेदवाद, सृष्टिभेदवाद, आविर्भावतिरोभाववाद, ख्यातिवाद, प्रतिबिम्बवाद, अन्धकारवाद.)

खंड-४. अवदारवादावली-३ (ब्राह्मणत्वादिदेवतावादः, जीवव्यापकत्वखण्डनवाद,जीवप्रतिबिम्बत्व-खण्डनवादः, भागवतस्वरूपविषयकशंकानिरासवादः, उपदेशादिविषकशंका-निरासवादः, भगवत्प्रतिकृतिपूजनवादः, ऊर्ध्वपुण्ड्रधारणवादः, तुलसीमालाधारणवादः, शंखचक्रधारणवादः, भक्तिरसत्ववादः, भक्त्युत्कर्षवादः, नामफलादिप्रकारवादः, जयश्रीकृष्णोच्चारणवादः, स्ववृत्तिवाद:, वस्त्रादिसेवावादः, मूर्तिपूजनवादः, भागवतपाठादेःशंकानिरासवादः.

खंड-५. द्रव्यशुद्धिदीपिका, भक्तिमार्गीयापराधनिरूपणविवृतिः, उत्सवप्रतानः

७. विविधविवरणोपेत पत्रावलम्बनम्

९. विद्वन्मण्डनम्

१०. श्रीबालकृष्णग्रन्थावली

१२. पुष्टिविधानम्[गुजराती, व्रज तथा संस्कृत संस्करण]

१३. श्रीवल्लभमहाप्रभुस्तोत्राणि

१४. श्रीपुरुषोत्तमप्रतिष्ठाप्रकारः

१५. वादावली (ब्रह्मवादप्रमुखानाम् अनेकवादानां संकलनरूपा) ब्रह्मवादः, वादकथा, विग्रहवादः, प्रपञ्चवादः, प्रपञ्चसंसारभेदवादः, ब्रह्मजीवतदैक्यस्वरूपनिरूपणम्, विरुद्धधर्माश्रयत्वनिरूपणम्, आत्मवादः, प्रश्नोत्तरसाहस्रीपर्यालोचनम्, प्रश्नोत्तरसाहस्रीचर्चितप्रकृत्यधिकरणसमालोचनम्, केवलाद्वैत-वादाभिमताविद्यास्वरूपविमर्शः, अक्षरपुरुषोत्तमद्वैतनिरासवादः.

क्रमांक १- २, ४/१- ४/२ तथा ६/५ को छोड कर सभी ग्रन्थ श्रीवल्लविद्यापीठ-श्रीविट्ठलेश्वर-प्रभुचरण आ.हो.ट्रस्ट (कोल्हापुर) द्वारा प्रकाशित.

गोस्वामी श्रीश्याम मनोहरजीकी हिन्दी-गुजराती पुस्तकें

-वाल्लभवेदान्त निबन्धसंग्रह
-भगवत्सेवानो सिद्धान्तशुद्ध प्रकार: एक प्रश्नोत्तरी[गुज.]
-पुरुषोत्तमयोग[गुज.-हिन्दी]
-धर्म-अर्थ-काम-मोक्षकी पुष्टिमार्गीय विवेचना[हिन्दी-गुज]
-श्रीवल्लभाचार्यके दर्शनका यथार्थ स्वरूप
-सिद्धान्तनुं आचमन : प्रश्नोत्तरी[गुज.]
-नवरत्नोपदेशका मानसविश्लेषण[गुजराती-हिन्दी]
-साकारब्रह्मवाद(तत्त्वचिंतन भक्ति संस्कृति विमर्श)
-शरणागतिविचारगोष्ठी एक पूरक प्रश्नोत्तरी[गुज.]
-तत्त्वार्थदीपनिबन्ध : शास्त्रार्थप्रकरणोपक्रम[गुज.]
-सेवा (ऋतु-उत्सव-मनोरथ)[गुजराती-हिन्दी]
-रसदृष्टिनी तरफेणमां[हिन्दी-गुजराती]
-विशोधनिका[चार खंड]
-श्रीयमुनाष्टकम्
-गृहसेवा और व्रजलीला[गुज.-हिन्दी]
-नवरत्नम्[गुजराती-हिन्दी]
-सिद्धान्तसूक्ति[गुज.]
-पुष्टिप्रवाहमर्यादाभेद[गुज.]
-विवेक
-वार्तान्की सैद्धान्तिक संगति
-भक्तियोग
-सेवा और व्रजलीला[गुजराती-हिन्दी]

संपर्क : गोस्वामी श्रीश्याम मनोहरजी, व्रजकमल, ६३ स्वस्तिक सोसाय्टी, ४था रास्ता, जुहु स्कीम, विलेपार्ले(पश्चिम), मुम्बई. फोन : (०२२) २६१४४३२६

।। श्रीकृष्णाय नमः ।।

प्रकाशकीय

महाप्रभु श्रीवल्लभाचार्योपदिष्ट पुष्टिमार्गीय साधनामें सेवासाधनाका स्थान अनन्य है. भगवत्सेवा पुष्टिभक्तोंकेलिये यद्यपि स्वतन्त्रपुरुषार्थरूपा—फलरूपा होती है तथापि सेवाकर्ताकी अवस्था किंवा कक्षा के भेदसे उसकी धर्मरूपता भी स्वीकार्य है ही. अतएव महाप्रभु श्रीवल्लभाचार्यचरण लिखते हैं : ‘‘**पुष्टिमार्गे हरेः दास्यं धर्मः**’’. शास्त्रोंमें जिस तरहसे धर्मके षडङ्ग : देश–काल–द्रव्य–कर्ता–मन्त्र–कर्म का गम्भीर विचार हुवा है उसी तरह पुष्टिभक्तिमार्गमें भी धर्मस्थानी कृष्णसेवाके देश–कालादि षडङ्गोंके सिद्धान्ताभिमत स्वरूपका निरूपण प्रमुखतया : षोडशग्रन्थ, शिक्षाश्लोकाः, पञ्चश्लोकी, तत्त्वार्थदीपनिबन्धके सर्वनिर्णयप्रकरणान्तर्गत साधनप्रकरण आदि ग्रन्थोमें महाप्रभु श्रीवल्लभाचार्यचरणोंने किया है. जबकि नित्यसेवाकी विधिका निरूपण श्रीवल्लभाचार्यचरणोंके ज्येष्ठात्मज श्रीगोपीनाथप्रभुचरणोंने अपने ‘साधनदीपिका’ नामक ग्रन्थमें किया है. धर्माङ्गभूत मन्त्रका जहां तक प्रश्न है तो पुष्टिभक्तिमार्गीय भगवत्सेवामें सम्प्रदायके मूलाचार्य एवं उनके कृपापात्र भगवदीयों के भक्तिभावात्मक वचन ही मन्त्रस्थानी माने जाते हैं. इनका निरूपण श्रीगोपीनाथप्रभुचरण विरचित ‘सेवाश्लोकाः’ आदि ग्रन्थोंमें तथा बहुप्रचलित कीर्तन ग्रन्थोंमें उपलब्ध होता है.

यहां यह अवधेय है कि श्रौत–स्मार्त धर्मोंमें कर्ता प्रमुखतः वर्णाश्रमी होता है. कर्ताको नित्य–नैमित्तिक–काम्यके भेदसे जो कर्म करणीय होते हैं तदनुसार उनके काल–देश–द्रव्य–मन्त्रका निर्णय किया जाता है. कर्ममार्गमें कर्मका प्राधान्य होता है अतः देवता कर्मके अङ्ग–द्रव्य माने जाते हैं. कर्ममार्गके विपरीत भक्तिमार्गमें कर्मकी तुलनामें आराध्य देवका प्राधान्य होता है.

भक्तिमार्गकी दृष्टिसे भक्ति–सेवासाधनाके मुख्य घटक : [१]सेव्य, [२]सेवा और [३]सेवक होते हैं. इनमेंसे प्रथम अर्थात् [१]सेव्य तो क्षराक्षरातीत पुरुषोत्तम स्वयं श्रीकृष्ण क्योंकि नित्य अपरिच्छिन्न होते हैं, अतः देश–कालातीत हैं. अतएव ऐसे सेव्यकी [२]सेवा भी देश–कालके शास्त्रीय नियमोंसे बंधी हुयी न हो कर, भक्तिभावसे भक्त जहां–जब श्रीकृष्णकी सेवा करता है तब–वहां श्रीकृष्ण उसके ऊपर अनुग्रह करके उसकी सेवाको स्वीकारते हैं. महाप्रभु श्रीवल्लभाचार्यचरणोंने श्रीकृष्णकी सर्वदा–सर्वत्र भजनीयताके इस सिद्धान्तको ‘चतुःश्लोकी’ ग्रन्थमें ‘‘**<u>सर्वदा</u> सर्वभावेन भजनीयो व्रजाधिपः, स्वस्य अयमेव धर्मो हि न अन्यः <u>क्वापि कदाचन</u>**’’ इन शब्दोंमें घोषित किया है.

[३]सेवक–जीव, क्योंकि, भगवदंश होते हैं अतः जीवस्वरूपके विचारसे तो जीवमात्रका स्वधर्म भगवत्सेवा ही होता है. तथापि भगवान्‌की भिन्न–भिन्न जीवोंको भिन्न–भिन्न फलोंका दान करनेकी इच्छाके कारण भगवान् जीवोंका वरण पुष्टि–मर्यादा–प्रवाह भेदसे भिन्न–भिन्न मार्गोंकेलिये करते हैं. तदनुसार भगवान्, क्योंकि, पुष्टिमार्गीय फल केवल पुष्टिजीवोंको ही प्रदान करते हैं अतः केवल पुष्टिजीव ही पुष्टिभक्तिमार्गमें अधिकृत माने गये हैं.

जीवचेतना, क्योंकि, **''एवं पञ्चविधं लिङ्गं त्रिवृत् षोडशविस्तृतम्, एष चेतनया युक्तो 'जीव' इत्यभिधीयते''**(भाग.पुरा.४।२९।७४) वचनानुसार प्राण–अन्तःकरण–इन्द्रिय–तन्मात्रादिसे युक्त होती है. अतः ऐसी मिश्र अवस्थामें अध्यस्त चेतनाकेलिये शुद्ध 'स्व'का निर्धारण कर पाना दुष्कर हो जाता है. इसी कारण स्वधर्मका निर्धारण भी जटिल बन जाता है. 'स्व' यद्यपि आत्माका वाचक होता है. तथापि देहादिमें फंसा हुवा जीव अपने आपको देहादि समझने लगता है. ऐसेमें, देहाध्यासादिके बने रहने पर भी, भगवत्सेवाके आत्मधर्मरूप होनेके केवल शास्त्रीय ज्ञानके आधारपर, पुष्टिमार्गीकेलिये देहधर्मकी उपेक्षा निरे पाषण्डमें पर्यवसित होगी. अतएव महाप्रभु श्रीवल्लभाचार्यचरण श्रीभागवतके तृतीयस्कन्धकी **''स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनम्''** कारिकाकी सुबोधिनी विवृतिमें पुष्टिमार्गीय सेवाकर्ताकेलिए स्ववर्णाश्रमधर्मके पालनकी आवश्यकता पर भार देते हुवे लिखते हैं कि :

> **''मनुष्यको स्वधर्मका आचरण करना चाहिये. 'स्वधर्म' अर्थात् देहधर्मका आचरण. अपने–अपने वर्ण और आश्रम के अनुसार शास्त्र हमें जिन कर्तव्योंके पालनका आदेश करता है उनका यथाशक्ति पालन करना चाहिये. शास्त्र भी कहता है : ''जितना किया जा सके उतना करो''. स्ववर्णाश्रमधर्मका पालन करनेमें समर्थ होते हुवे भी उनका अल्प अथवा अधूरा पालन नहीं करना चाहिये. ...जहां तक देहादिकोंमें आत्माका अध्यास है तब तक तो वर्णाश्रमधर्म ही स्वधर्म होते हैं, भगवद्धर्मादि भी विधर्म या परधर्म कहे जायेंगे. परन्तु जब मनुष्य अपने आपको ''मैं देहादि सङ्घातसे भिन्न जीव हूं'' ऐसा मानने लगे तब तो भगवद्दास्य ही स्वधर्म होता है, अन्य वर्णाश्रमादि धर्म परधर्म बन जाते हैं''.***

इन वचनोंका निष्कृष्ट तात्पर्य समझाते हुवे महाप्रभु श्रीवल्लभाचार्यचरणोंके ज्येष्ठ पुत्र श्रीगोपीनाथप्रभुचरण 'साधनदीपिका' ग्रन्थमें लिखते हैं कि :

> **''दहेधारीकेलिये कर्मोंका निःशेष त्याग कर पाना सम्भव नहीं है. जब कर्म करने ही पड रहे हैं तो स्वधर्मका ही पालन करना चाहिये. ऐसा न करने पर स्वधर्मत्याग और स्वच्छन्दाचरण का दुगना अपराध होगा. अतः विधर्माचरणसे बचते हुवे भक्तिशास्त्रके अनुकूल रह कर यथाशक्ति स्वधर्मका आचरण करना चाहिये''**.(साधनदीपिका श्लो.१५–१७)

इस खंडमें प्रकाशित किये जा रहे गोस्वामी श्रीपुरुषोत्तमचरण विरचित १.द्रव्यशुद्धिदीपिका, २.भक्तिमार्गीयापराधनिरूपणविवृति तथा ३.उत्सवप्रतान —इन तीन

---

*''**स्वधर्माणां** देहधर्माणां वर्णाश्रमाधिकारसिद्धानाम् आचरणं यथाशक्त्या कर्तव्यम्, न तु शक्तावपि सङ्कोचः. शास्त्रमपि ''यच्छक्नुयात् तत् कुर्यात्'' इति. ...यावद् (विपर्यायाभ्यासदार्ढ्येन आत्मतया भातः[प्रकाश])देहो अयं तावद् वर्णाश्रमधर्माएव स्वधर्माः, भगवद्धर्मादयोऽपि विधर्माः परधर्मा वा. यदा पुनः आत्मानं जीवं मन्यते, सङ्घातव्यतिरिक्तं, तदा दास्यं स्वधर्मः. अन्ये वर्णाश्रमादयोऽपि परधर्माः''. (भाग.सुबोधिनी ३।२८।२)

ग्रन्थोंकी भूमिकाके रूपमें उल्लिखित निरूपणकी प्रासङ्गिकता यह है : धर्मकी सिद्धिकेलिये उसके देश-कालादि षडङ्गोंका शास्त्रशुद्ध होना आवश्यक होता है. पुष्टिभक्तिमार्गमें, क्योंकि, भगवत्सेवाको धर्मस्थानी माना गया है इसलिये और पुष्टिमार्गीय सेवाकर्ताको यावद्देहाभिमान स्ववर्णाश्रमधर्मोंका पालन करना आवश्यक होता है अतः देहाभिमानी वर्णाश्रमी सेवाकर्ताके विचारसे सेवानुकूल **देश** और **द्रव्य** इन दो धर्माङ्गोंकी शुद्धिका शास्त्रीय निरूपण 'द्रव्यशुद्धिदीपिका' ग्रन्थमें किया गया है जब कि धर्माङ्ग **काल**के सेवानुकूल स्वरूपका शास्त्रीय विचार 'उत्सवप्रतान' ग्रन्थमें किया गया है. और 'भक्तिमार्गीयापराधनिरूपणविवृति' ग्रन्थमें धर्माङ्गभूत **कर्ता**द्वारा भक्तिमार्गका अनुसरण करते समय सम्भावित अपराधोंका और उनके निवारणके उपायका निरूपण किया गया है.

यहां यह अवधेय है कि धर्मशास्त्रमें देश-काल-द्रव्य-मन्त्र-कर्मके एक नहीं, अनेक अनुकल्प-विकल्प कर्ताको दिखलाये गये हैं. आवश्यकता, परन्तु, यह है कि कर्ता शुद्ध हो. सिंदूरसे भरी मांग हो, गलेमें मंगलसूत्र हो, हाथोंमें पूजाकी थाली हो, चहेरा घूंघटसे ढंका हुवा हो पर ऐसी स्त्री यदि स्वैरिणी हो तो! जब स्वयं कर्ता ही अशुद्ध/अनधिकारी हो तब उत्तमोत्तम काल-देश-द्रव्य-मन्त्र-कर्म भी आडंबर मात्र रह जाते हैं. अतएव महाप्रभु श्रीवल्लभाचार्य 'सिद्धान्तमुक्तावली' ग्रन्थके उपसंहारमें लिखते हैं कि **''गङ्गाके तट पर निवास करनेवाला यदि गङ्गाके प्रति भक्तिभावसे रहित है तो वह अपने दुष्ट आचरणके कारण पापका भागी बनता है. उसी तरह भक्तिभावसे रहित मनुष्य यदि भगवान्-भगवत्स्थान-भक्तके निकट रहता है तो, वहां रहना ही उसके अधःपतनका कारण बन सकता है''**(सिद्धान्तमुक्तावली २०). भक्तिमार्गमें, इसलिये, अपने भजनीयके प्रति निरुपाधिक-निष्काम-शुद्ध प्रेमभावका होना सर्वथा आवश्यक है. आत्मनिवेदित होकर, स्वगृहमें व्रजाधिप श्रीकृष्णको पधराकर, उनको ही अपना सर्वस्व मानकर, निवेदित स्वसर्वस्वका उनकेलिये विनियोग करते हुवे प्रेमसे स्वयं उनकी सेवा करना यह पुष्टिभक्तिमार्गीय सेवासाधनाका सैद्धान्तिक स्वरूप है. 'सिद्धान्तरहस्य' ग्रन्थोक्त, अपने सभी खान-पान-यज्ञ-श्राद्ध-दानादि लौकिक-वैदिक कार्यमात्रका स्वसेव्यको समर्पण करना और स्वसेव्यकी सेवामें समर्पित न हों ऐसे घर-धनादि वस्तु मात्र तथा जगना-स्नान-खान-पानादि व्यवहार मात्रका त्याग करना —इन भगवदाज्ञाओंका पालन स्वगृहमें विराजमान प्रभुकी सेवामें स्वतनुवित्तके विनियोगके बिना असम्भव ही नहीं अकल्पनीय है. विडम्बना यह है कि आज अधिकांश उपदेशक अपने सेव्य और उनकी सेवा को पैसे कमाने साधन बना बैठे हैं. पुष्टिभक्तिमार्गके नामपर चलनेवाली उनकी हवेलियां, जो कभी गुरुघर होती थीं, पर आज सार्वजनिक मन्दिरमें परिवर्तित की जा चुकी हैं, उनमें में भक्तिके नामपर सेवा, दर्शन, मनोरथ, प्रसाद, तुलसी-चरणामृत, दीक्षा, कीर्तन, कथा ... सब कुछ बिकता है. इन सबके निमित्त पैसे मांगकर पुष्टिमार्गके अधिकांश आचार्य(!) अपनी आजीविका चलाते हैं. शास्त्रमें स्पष्ट लिख है कि भगवत्सेवाके द्वारा आजीविका चलानेवाला 'देवलक' चंडालके जितना अपवित्र बन जाता है! कहना आवश्यक नहीं है कि ऐसी स्थितिमें पुष्टिमार्गके अधिकांश गुरुओंकी स्थिति ''इतो

भ्राष्टः ततो भ्रष्टः'' जैसी हो चुकी है. सेवा–कथाको धंधा बनानेके कारण भक्तिमार्गसे तो भ्रष्ट हो ही गये, देवलकताके कारण चंडाल जितने अपवित्र हो जानेके कारण शास्त्रीय भी समस्त अधिकारोंसे भ्रष्ट हुवे. दूसरी ओर अधिकांश अनुयायी दुकान नुमा इन हवेलियोंमें सेवा–दर्शन–मनोरथके स्पोन्सर(प्रायोजक) बन कर और देवद्रव्यके पातित्यकारक प्रसादको खाकर अपने आपको कृतकृत्य मानते हैं. इन अपराधोंके कारण इनकी भी स्थिति उनके गुरुओंकी ही तरह ''इतो भ्रष्टः ततो भ्रष्टः'' जान पड़ती है. गोस्वामी श्रीपुरुषोत्तमचरण लिखते हैं कि **''धन देकर सेवा करवाने पर धनदाता अहंकारी बनता है, उसका चित्त कभी भी भगवत्प्रवण नहीं बन सकता है. ...जिस तरह दक्षिणा देकर याग करवाने पर यागका फल दक्षिणा देनेवालेको मिलता है ऐसा, किन्तु, भक्तिमार्गमें सम्भव नहीं है. क्योंकि कर्ममार्गमें तो धन देकर यज्ञादि कर्म करवाना शास्त्रविहित है. परन्तु ऐसा करनेकी आज्ञा भक्तिमार्गमें भगवानने दी नहीं है अतः ऐसा नहीं करना चाहिये, पर भगवानने जैसा करनेकी आज्ञा दी है उसी तरह करना चाहीये. ऐसा करने पर ही साधनरूपा तनुवित्तजा सेवा साध्यरूपा मानसीसेवा बनकर व्रजभक्तोंकी तरह फलित होगी''** (सिद्धान्तमुक्तावली–विवृतिप्रकाश २). इससे स्पष्ट है कि किसीको पैसे देकर उससे सेवा–मनोरथ करवाना न केवल भगवदाज्ञाका तिरस्कार करना है अपितु भक्तिसे विपरीत परिणामका जनक होनेसे भक्तिमार्गसे भ्रष्ट करनेवाला भी होता है. विशेषमें देवद्रव्यका प्रसाद खानेके कारण महापतित होनेसे ये शास्त्रीय अधिकारसे भी भ्रष्ट होते हैं. गुरु–शिष्य दोनों उभयतो भ्रष्ट सिद्ध हो रहे हैं फिर भी महामोह कैसा है कि कोई तो जगद्गुरु बननेकी रेसमें खड़ा है तो कोई $२५०१ और $१५०१ डॉलर् देकर अपना नाम ८४–२५२ वैष्णवोंकी सूचिमें लिखवानेमें लगे हैं. यह देखकर अनायास ही ''उभावप्यश्रुतग्रन्थौ उभावपि जडात्मकौ, अहो मोहस्य माहात्म्यं तत्रैकः शिष्यातांगतः!'' उक्तिका स्मरण हो आता है.

इस तरह हम देख सकते हैं कि एक ओर तो वर्णाश्रमधर्म इनको धर्मबहिष्कृत मानता है तो दूसरी ओर भक्तिमार्ग इनको अनधिकारी मानता है. उभयतः पाशकी इस स्थितिमें, प्रमुखतः वर्णाश्रमी भक्तिमार्गीको उद्देश्य बनाकर लिखे गये द्रव्यशुद्धिदीपिका भक्तिमार्गीयापराध–निरूपणविवृति तथा उत्सवप्रतान इन तीनों ग्रन्थको पृष्ठभूमिमें रखकर विचार किया जाये तो, कुछ यक्षप्रश्न खड़े होते हैं जिनपर विचार करना आजकी स्थितिमें परमावश्यक लगता है. यथा,

–जो गुरु अपने सेव्यकी सेवाके द्वारा अपनी वृत्ति चलाते हैं वे देवलकताके कारण सदा ही चण्डालवत् अपवित्र हो चुके होनेसे उनको 'द्रव्यशुद्धि' ग्रन्थोक्त शुद्धिके प्रकारोमेंसे ब्राह्मणाधिकारक शुद्धिके प्रकारको अपनाना चाहिये या फिर अपने आपको चाण्डालवत् अपवित्र मानकर 'द्रव्यशुद्धि'का अविषय मान लेना चाहिये?

–देवलकताके कारण ब्राह्मणत्वसे हाथ धो बैठने पर और स्वधर्मरूपा भगवद्भक्तिको पैसे कमानेका साधन बनानेके कारण भक्तिमार्गसे भी बहिष्कृत हो जाने पर जो अब गुरु ही नहीं रह गये हैं उनके प्रति भेदबुद्धि रखना अपराध है या देवबुद्धि रखना अपराध है?

–जो अपने मूलाचार्यका द्रोही हो ऐसे गुरुका आदर न करना अपराध है या उसका अपमान–

निन्दा न करना अपराध है?

–देवलक गुरुका स्पर्श, गृहवास आदि होने पर शिष्यको अपनी तथा गृहादिकी शुद्धि कैसे करनी?

–दूसरेके पाससे द्रव्यादि लेकर सेवा करना भगवदाज्ञासे विरुद्ध है. ऐसी सेवा जब स्वयं भगवान् ही स्वीकार नहीं करते हैं तब पुष्टिमार्गीय सेवाके नाम पर सम्प्रदायमें सर्वत्र आज जिनको अभूतपूर्व बढावा दिया जा रहा है वो भोग–राग–शृंगार क्या भस्महोमतुल्य नहीं कहे जायेंगे?

इस प्रास्ताविकके साथ सम्पादकीय उत्तरदायित्वको निभाते हुवे इतना निरूपण करना शेष रहता है कि इस ग्रन्थमें गोस्वामी श्रीपुरुषोत्तमचरण विरचित

१. द्रव्यशुद्धिदीपिका

२. भक्तिमार्गीयापराधनिरूपणविवृति

३. उत्सवप्रतान

—इन तीन ग्रन्थोंका प्रकाशन किया जा रहा है.

१. द्रव्यशुद्धिदीपिका :

भारतमार्तण्ड श्रीगट्टूलालजीके संग्रहसे प्राप्त हस्तलिखित प्रतिके आधारपर इस ग्रन्थका प्रकाशन वि.सं.१९५५ में श्रीगोवर्धनदास लक्ष्मीदास, यदुवंशीय पुस्तकालय, मुम्बई द्वारा व्रज तथा गुर्जर भाषानुवाद सहित हुवा था. इसके पुनः प्रकाशनके अवसर पर, पाठभेदके निर्धारणार्थ, इस पुस्तकके साथ इस ग्रन्थकी [१]मांडवी ग्रन्थागार तथा [२]भुवनेश्वरी पीठ, गोंडल से प्राप्त अन्य दो प्राचीन हस्तलिखित पुस्तकोंका मिलान किया गया है.

अनुवादोंके सम्बन्धमें यह ध्यातव्य है कि दोनों अनुवाद भिन्न–भिन्न विद्वानों द्वारा किये गये हैं. शास्त्रवचनोंके अर्थोंमें दोनोंके बीच अनेक स्थानों पर भिन्न मत दिखलाई देते हैं. कहीं गुर्जर तो कहीं व्रज भाषानुवाद उपयुक्त प्रतीत होता है. सुज्ञ अध्येताओंको तो स्वकर्तव्य निर्धारणार्थ मूलपर ही निर्भर रहना चाहिये.

इस ग्रन्थमें कब–कहां–क्यों–कैसे स्नान करना, रात्रिके समय जन्म–मरण–रजोदर्शन होने पर कालका निर्धारण कैसे करना, रजस्वला सम्बन्धी शुद्धि, स्पर्शदोष कब मानना कब नहीं मानना, भगवत्सेवा तथा पितृकर्म विषयक शुद्धि, वस्त्र–पात्र–शय्या–धान्य–सिद्धान्न–घृतपायस–उदक–जलाशय–भूमि–गृह–रथ्या आदिकी शुद्धि, प्रकीर्ण विषयोंकी शुद्धि तथा आत्माकी शुद्धि जैसे विषयोंपर शास्त्रीय विचार हुवा है.

२. भक्तिमार्गीयापराधनिरूपणविवृति

इस ग्रन्थका प्रकाशन इदम्प्रथमतया किया जा रहा है. इसका प्रकाशन समादरणीय

गोस्वामी श्रीश्याम मनोहरजी(किशनगढ–पार्ला) से प्राप्त [१]श्रीगट्टुलालजी संग्रह–मुम्बईकी हस्तलिखित पुस्तक तथा [२]मांडवी ग्रन्थागार एवं [३]भुवनेश्वरी पीठ–गोंडल से प्राप्त हस्तलिखित पुस्तकोंकी सहायतासे किया गया है.

इस ग्रन्थमें भक्तिमार्गमें अपराधः किसे माना जाता है उसकी परिभाषा देते हुवे ग्रन्थकारने उपक्रममें पाप और अपराधके बीच भेद समझाया है. आगे वराहपुराण तथा नारदपञ्चरात्र में निरूपित ३२ अपराध तथा हरिवल्लभसुधोदयोक्त ६६ अपराधों का निरूपण करनेके पश्चात् श्रीमत्प्रभुचरणोक्त भक्तिमार्गीय ३२ अपराधों पर विवेचन किया है. ग्रन्थोपसंहारमें स्वसिद्धान्ताभिमत अपराधनिवृत्त्युपायका निरूपण किया गया है. वर्तमान सन्दर्भमें श्रीमत्प्रभुचरणोक्त **''सेवायां लोकानुकूल्यम्**[१]**, स्वमार्गीय–सेव्यभगवद्रूपे भेदबुद्धिः**[१५]**, अनधिकारिणि मार्गरहस्यप्रकाशः**[२३]**, सेवाभिमानः**[३०]**''** आदि अपराध विशेषरूपसे चिन्तनकी अपेक्षा रखते है.

३. उत्सवप्रतान

इस ग्रन्थका सर्वप्रथम प्रकाशन वि.सं.२००५में श्रीबालकृष्णशुद्धाद्वैतमहासभा, सुरत द्वारा प्रकाशित 'उत्सवनिर्णयग्रन्थसमुच्चय' पुस्तकमें हिन्दी भाषानुवादके साथ हुवा था. इसके पुनः प्रकाशनमें पाठभेदोंका निर्धारण [१]मांडवी ग्रन्थागार तथा [२]भुवनेश्वरी पीठ–गोंडल से प्राप्त हस्तलिखित पुस्तकोंकी सहायतासे किया गया है. हिन्दी भाषानुवाद श्रीजगन्नाथ शास्त्रीने किया है जिसे यहां यथावत् प्रकाशित किया गया है.

इस ग्रन्थमें गोस्वामी श्रीपुरुषोत्तमचरणोंने वर्षभरमें आते शास्त्रीय तथा भक्तिमार्गीय उत्सवोंके समयका निर्णय दिया है.

ग्रन्थका अवलोकन करने पर यह प्रतीत होता है कि साम्प्रदायिक टिप्पणी–पञ्चाङ्ग तैयार करनेवाले लोग आज जिन ज्योतिष सिद्धान्तोंको आधार बनाकर पञ्चाङ्ग तैयार कर रहे हैं वे सिद्धान्त सम्प्रदायमें सर्वांशमें मान्य नहीं हैं.

अन्तमें, ग्रन्थाध्यापन प्रवचन लेखन सम्पादन आदि कार्योंमें अतीव व्यस्त होते हुवे भी समादरणीय गोस्वामी श्रीश्याम मनोहरजी(किशनगढ–पार्ला)ने इस ग्रन्थकी मुद्रणार्थ तैयार की गयी प्रतिका अवलोकन कर आवश्यक उपयोगी निर्देश दिये यह सर्वथा अविस्मरणीय है. ग्रन्थकी मुद्रणव्यवस्थाका भार श्रीप्रवीणभाई तथा श्रीपीयूषभाई (राजकोट)ने उठा लिया और सौ.ख्यातिने ग्रन्थका सचित्र आवरण तैयार कर दिया यह भी स्मरणीय है. सर्वान्तमें द्रव्यशुद्धिदीपिका और उत्सवप्रतान ग्रन्थोंके पूर्व प्रकाशकों तथा अनुवादकों के प्रति कृतज्ञता ज्ञापित करते हुवे.

श्रीवल्लभाचार्य ट्रस्ट द्वारा

गोस्वामी शरद्

अनुक्रमणिका

द्रव्यशुद्धिदीपिका

।।श्रीकृष्णाय नमः।।

गोस्वामीश्रीपुरुषोत्तमचरणविरचिता

।। द्रव्यशुद्धिदीपिका ।।

नत्वा श्रीवल्लभाचार्यान् हरिसेवोपकारिका।।
बाह्याऽथाऽभ्यन्तरी द्रव्य-शुद्धिरत्र विचार्यते।।१।।
निबन्धेषु विविच्योक्ताऽप्यधुना बुद्धिदोषतः।।
यतो न भासते सम्यक् तत एष समुद्यमः।।२।।

१. अथ स्नानाचमननिमित्तविचारः.

तत्र तावत् प्रायश्चित्तमिताक्षरायां याज्ञवल्क्यः

''उदक्याशुचिभिः स्नायात् संस्पृष्टस्तैरुपस्पृशेत्,
अब्लिङ्गानि जपेच्चैव गायत्रीं मनसा सकृत्''

(याज्ञ.स्मृ.प्रायश्चि.१।३०)

इति आह. तत्र विज्ञानेश्वरः उदक्या रजस्वला अशुचयः शव-चाण्डाल-पतित-सूतिका-शावाशौचिनः एतैः संस्पृष्टः स्नायात्. तैः पुनः उदक्याशुचि-संस्पृष्टादिभिः संस्पृष्टः उपस्पृशेद् आचामेत्. आचम्य च अब्लिङ्गानि **''आपोहिष्ठा''** इत्येवमादीनि त्रीणि मन्त्रवाक्यानि जपेत्. त्रिष्वपि बहुवचनस्य चारितार्थ्यात्. तथा गायत्रीं च मनसा सकृद् जपेत्. ननु उदक्यादिसंस्पृष्टः स्नायाद् इति एकवचननिर्दिष्टस्य कथं तैः इति बहुवचनेन परामर्शः? सत्यम्, एवं किन्तु अत्र उदक्यादिसंस्पृष्टव्यतिरिक्त-स्नानार्हमात्रस्पर्शेऽपि आचमनमात्रविधानार्थं तैः इति बहुवचनमिति अविरोधः इति व्याख्यातवान् तेन रजस्वला-शव-शावाशौचि-चाण्डाल-पतितसूतिकानां स्पर्शे सचैलं स्नानम्.

अपरार्के तु मनुवाक्ये

''दिवाकीर्तिम् उदक्यां च पतितं सूतिकां तथा,
शवं तत्स्पृष्टिनं चैव स्पृष्टः स्नानेन शुद्ध्यति'' (मनु.स्मृ.५।८५)

इति शवस्पृशः स्पर्शेऽपि सचैलं स्नानम् उक्तम्. मर्यादासिन्धौ तु व्याख्यातम्. दिवाकीर्तिः अत्र चाण्डालः, अत्यन्ताशुचिसाहचर्यात्. पतितो महापातकी. सूतिका प्रसवे सति अप्राप्तशुद्धिकाला. स्पृष्टं स्पर्शः, तस्य स्पृष्टं तत्स्पृष्टं, तद् अस्य अस्ति इति तत्स्पृष्टी.

अत्र 'तत्'पदेन दिवाकीर्तिप्रभृतय: पञ्चाऽपि परामृश्यन्ते इति. अपरार्केऽपि एवम्. तेन पञ्चस्पृशामपि स्पर्शे स्नानम्. यद्यपि अत्र स्नानमात्रम् उक्तं तथापि सचैलं स्नानं सर्वसम्मतम्.

''**श्वानं श्वपाकं प्रेतधूमं देवद्रव्योपजीविनं ग्रामयाजकं सोमविक्रयिणं चितिं चितिकाष्ठं मद्यं मद्यभाण्डं सस्नेहं मानुषास्थि शवस्पृशं महापातकिनं शवं स्पृष्ट्वा सचैलम् अभोऽवगाह्योत्तीर्य अग्निम् उपस्पृश्य गायत्र्यष्टशतं जपेत्, घृतं प्राश्य स्नात्वा त्रिराचामेत्**'' (च्यवन. ।)

इति च्यवनवचनात्. तेन रजस्वला-शव-चाण्डाल-पतित-सूतिका-तत्स्पर्शि-शावाशौचि-तत्स्पर्शिस्पर्शे सचैलं स्नानम्. तद्व्यतिरिक्तस्नानार्हस्पर्शे तु आचमनम् इति सिद्ध्यति. ते च स्नानार्हा विज्ञानेश्वरेण सङ्गृहीता अग्रे वाच्या:.

साम्प्रतं तु रजस्वलादिस्पर्शविषये अन्यो विशेषः उच्यते. मर्यादासिन्धौ पराशर:

''**उदक्यास्पर्शने स्नायाद् अंशुकेनाङ्गतोऽपि वा,**
स्याच्चतसृष्वपि स्नानं तुल्या: सर्वा रजस्वला:''

उद्ध.१ (वृ.परा.स्मृ.८।३१५)

इति तुल्या इति स्पर्शदोषजनने सर्वास्तुल्या इति अर्थ:. तथा

''**वस्त्रसंस्पर्शने तस्य सचैलाङ्गावगाहनम्,**
अङ्गस्पर्शनवत् तस्य वदन्ति द्विजसत्तमा:'' (वृ.परा.स्मृ.८।३१३)

इति च.

२. अथ वस्त्राद्यन्तरितस्पर्शे बुद्धिपूर्वकस्पर्शे च स्नानादिविचार:.

पृथ्वीचन्द्रोदये तु

''**वस्त्राद्यन्तरितस्पर्शे साक्षात्स्पर्शोऽभिधीयते,**
साक्षात्स्पर्शे तु यत्प्रोक्तं तद्वस्त्राद्यन्तरेऽपि च''

इति प्रचेतोवचनमपि उक्तम्. पराशरवाक्ये तु

''**स्नानं स्पृष्टेन येन स्यात् काष्ठाद्यैर्यदि तं स्पृशेत्,**
नावारोहणवत् स्पर्शं तत्रोपस्पर्शनात् शुचि:'' (वृ.परा.स्मृ.८।३११)

इति उक्तम्. तेन इदं सिध्यति. मनूक्तानां दिवाकीर्त्यादीनां पञ्चानां वस्त्राद्यन्तरितस्पर्शे स्नानम्. शावाशौचिनां तु तत्र अनुक्तत्वात् तदशुचित्वस्य प्रत्यहं क्षीयमाणत्वाच्च काष्ठादिना बुद्धिपूर्वकं तत्स्पर्शेऽपि न स्नानं किन्तु आचमनादेव शुद्धिः

इति. एवं च पूर्वोक्तयाज्ञवल्क्यवाक्यमपि सङ्गतं भवति इति. चेतनव्यवधानस्पर्शे तु विशेषः संवर्तेन उक्तः

''तत्स्पृष्टिनं स्पृशेद् यस्तु स्नानं तस्य विधीयते,

ऊर्ध्वम् आचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथा''[उद्ध.२](संव.स्मृ. १८४)

इति. तेन उदक्यादिस्पर्शे द्वयोः स्नानं, तृतीयस्य आचमनम्. एवं द्रव्येष्वपि तत्स्पृष्टस्पृष्टयोः द्वयोः क्षालनं तृतीयस्य प्रोक्षणम् इति सिध्यति. 'तथा' इति अतिदेशस्य आचमनोत्तरम् उक्तत्वेन प्रोक्षणस्य तत्समानदेशिकतया द्वयोत्तरमेव तत्र प्राप्तेः. इदं च अबुद्धिपूर्वकस्पर्शे द्रष्टव्यम्. गौतमेन

''पतितचाण्डालोदक्याशवस्पृष्टि–तत्स्पृष्ट्युपस्पर्शने सचैलम् उदकोपस्पर्शनात् शुद्ध्येत्'' [उद्ध.३](गौत्त.स्मृ.१४)

इत्यादिना तृतीयस्य स्नानस्य उक्तत्वात्. तथा

''उपस्पृश्याशुचिस्पृष्टं तृतीयं चाऽपि मानवः,

हस्तौ पादौ च तोयेन प्रक्षाल्याऽऽचम्य शुद्ध्यति''(देव.स्मृ.१।९)

इति मर्यादासिन्धौ देवलवाक्याच्च त्रयाणां स्नानस्य चतुर्थे आचमनस्य च बुद्धिपूर्वकस्पर्शविषयत्वेन सर्वेषु निबन्धेषु अङ्गीकारात्. तेन बुद्धिपूर्वकस्पर्शे त्रयाणां स्नानं चतुर्थस्य आचमनम्. यद्यपि अत्र प्रथमस्य अबुद्धिपूर्वे द्वितीयादीनां तत्पूर्वे, प्रथमस्य बुद्धिपूर्वे द्वितीयादीनां बुद्धिपूर्वे स्पर्शे विशेषः कुत्राऽपि न उक्तः तथाऽपि बुद्धेरेव दोषप्रयोजकत्वकल्पनात् तादृशस्थले आतृतीयस्नानम् इति प्रतिभाति. अयमेव न्यायो द्रव्येष्वपि. चतुर्थानन्तरम् अशुद्ध्यनुवृत्त्यभावाद् इति. इतः स्वल्पो वाचनिकस्तु द्रव्यशुद्धिप्रकारो अमेध्यादिस्पृष्टपात्रविचारे वक्ष्यते. स्पर्शानन्तरं स्नाने तु मर्यादासिन्धौ विशेष उक्तः.

३. अथ शीतोष्णोदकस्नानविचारः.

अस्पृश्यस्पर्शनादौ स्नानं तीर्थादिषु शीतोदकेन कार्यम्. **''अस्पृश्यस्पर्शने चैव न स्नायाद् उष्णवारिणा''** (वृ.मनुस्मृ.   ) इति वृद्धमनुवचनात्. तीर्थाभावे तु उष्णोदकेनाऽपि कार्यम्.

''नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम्,

तीर्थाभावे तु कर्तव्यम् उष्णोदक–परोदकैः'' (शंखस्मृ.८।१)

इति शङ्खवचनात्. अत्र ''निमित्तानन्तरं नैमित्तिकं कार्यम्'' इति न्यायात् निश्यस्पृश्यस्पर्शे निश्येव स्नायात्.

४. अथ रात्रौ स्नानविचार:.

तथा आह यम:

''चण्डालै: श्वपचै: स्पृष्टे निशि स्नानं विधीयते,
न वसेच् चेद् अयं रात्रौ निशि स्नानेन शुद्ध्यति,
अथ तत्र वसेद् रात्रिम् अज्ञानाद् अविचक्षण:,
तदा तस्य तु तत्पापं शतधा परिवर्तते'' [उद्ध.४] (लघुयम.स्मृ.६४,६५)

इति. अत्र 'चण्डाला'दिपदं रजस्वलादीनामपि उपलक्षणम्. अत्र विशेषम् आह पराशर:

''अस्तङ्गते यदा सूर्ये चण्डालं पतितं स्त्रियं,
सूतिकां स्पृशतश्चैव कथं शुद्धिर्विधीयते,
जातवेद: सुवर्णं च सोममार्गं तथैव च,
ब्राह्मणानुमतेनैव स्नात्वा दृष्ट्वा च शुद्ध्यति'', [उद्ध.५] (परा.स्मृ.७।११,१२)
आचान्तमनुगर्ते वा निशि स्नानं न विद्यते,
स्नानमाचमनं प्रोक्तं दिवोद्धृतजलेन तु''

इति. सोममार्गम्=आकाशं दृष्ट्वा इति अन्वय:. अनुगर्ते जलाशये. रात्रौ जलाशये स्नानम् आचमनं च नास्ति किन्तु दिवोद्धृतजलेन रात्रौ स्नानमाचमनं च कार्यम् इति अर्थ:. अन्योऽपि विशेषो देवलेन उक्त:

''दिवोद्धृतैर्जलै: स्नानं निशि कुर्याद् निमित्तत:,
प्रक्षिप्य च सुवर्णं तु सन्निधाप्य च पावकम्'' (देव.स्मृ.५)

इति. एतदपि उद्धृतोदकस्नानं शवस्पृष्टव्यतिरिक्तविषयम्. तथा आह वृद्धशातातप:

''अनस्तमित आदित्ये सङ्गृहीतं तु यज्जलम्,
तेन सर्वात्मना शुद्धि: शवस्पृष्टं तु वर्जयेत्''

इति. रात्रौ शव-तत्स्पृष्टयो: स्पर्शे मज्जनेनैव शुद्धि:. इतरास्पृश्यस्पर्शेतु उद्धृतोदकस्नानेन इति अर्थ:. उद्धृतजलाभावे तु मरीचिः आह

''दिवाहृतं तु यत् तोयं गृहे यदि न विद्यते,
प्रज्वाल्याग्निं तत: स्नायाद् नदीपुष्करिणीषु च'' (मारी.स्मृ.)

इति. अग्न्यभावे विशेषम् आह अत्रि:

''रात्रौ स्नानं यदि भवेत् पश्यन् अग्निं समाचरेत्,
स्वर्णांगुलिकरो विप्रो वह्निना वा विनाचरेत्'' (अत्रिस्मृ.) इति.

५. अथ रात्रौ नद्यादिजले स्नानविचार:.

रात्रौ नद्यादिस्नाने प्रकारविशेषम् आह कात्यायन:

‘‘न विशेद् वारि न स्नानं न रात्रौ जलम् उद्धरेत्,
अन्यत्र धाम्न इत्येव तत्रस्थे स्नानमिष्यते’’ (कात्या.)

इति. अन्यत्र इति अस्य पूर्वेण सम्बन्ध:. धाम्न इति.

‘‘धाम्नो–धाम्नो राजन्नितो वरुण नो मुञ्च,
यदापो अघ्न्या(अघ्रिया) इति वरुणेति,
शपामहे (या) ततो वरुण मुञ्च’’

इति तैत्तिरीयशाखाद्युक्तं मन्त्रं पठित्वा स्थानस्थितएव जले स्नायाद् इति अर्थ:. जलस्य रात्रौ उद्धरणे तु बौधायन:

‘‘अस्तमित आदित्य उदकं गृहणीयान्न गृहणीयाद् इति मीमांस्यते, न गृहणीयाद् इति एक आहुः ब्रह्मवादिनो गृहणीयाद् इति अपरे यावदुदकं गृहणीयात् तावत् प्राणानायच्छेद् अग्निर्ह वा उदकं गृहणाति इति’’. (बौधा.)

इदं (इदं सर्वं) मर्यादासिन्धुस्थं प्रमेयम् उक्तम्. तेन अस्पृश्यस्पर्शे दिवा जाते दिवैव तीर्थादौ शीताम्भोवगाहनम्. तीर्थाद्यभावे तु उष्णोदकेन परोदकेन वा स्नानम्. निशि जातेतु तीर्थे गत्वा अग्निं प्रज्वाल्य ‘‘धाम्न...’’ इत्यादिमन्त्रं पठित्वा ततो अवगाहनम्. तदभावे दिवोद्धृतेन उष्णोदकेन परोदकेन वा तत्रापि अग्निं पश्यता सुवर्णं प्रक्षिप्य स्नानं कार्यम्. अग्न्यभावे सुवर्णांगुलिकरेण, तदभावे तु रात्रावपि उद्धृत्य यथालाभं पूर्वोक्तप्रकारं कृत्वा स्नायात् तत: प्राणान् आयच्छेत्. सर्वाभावे तु हरिं स्मृत्वा यथाकथंचिदपि स्नायात्. नतु रात्रौ तथैव तिष्ठेद् इति. शव–तत्स्पृष्टस्पर्शने तु मज्जनेनैव शुद्धि:. अत्रापि मज्जनार्हजलाभावे हरिस्मरणपूर्वकं स्नानम् इति प्रतिभाति, तथैव स्थितेः अनुचितत्वाद् इति. सूर्योदयोत्तरं पुन: स्नायाद् इति च.

६. अथ रात्रौ जन्ममृतिरज:सु कालविभागादिविचार:.

मिताक्षरायां कश्यप:

‘‘उदिते तु यदा सूर्ये नारीणां दृश्यते रज:,
जननं वा विपत्तिर्वा यस्याहस्तस्य शर्वरी,
अर्धरात्रावधि: काल: सूतकादौ विधीयते,
रात्रिं कुर्यात् त्रिभागां तु द्वौ भागौ पूर्वएव तु,

उत्तरोंऽशः प्रभातेन युज्यते मृतसूतके,
रात्रावेव समुत्पन्ने मृते रजसि सूतके,
पूर्वमेव दिनं ग्राह्यं यावन् नाभ्युदितो रविः''

(दाल्भ्यस्मृ.१४५,१४७,१४४)

इति. अत्र आचारतो व्यवस्था इति उक्तम्. अत्र यस्य इति अनेन वारो ग्राह्यो न तिथिः इति बोध्यम्. नोचेद् उदित इत्यादिकथनवैय्यर्थ्यापत्तेः. तेन म्लेच्छवद् रात्रिम् आरभ्य गणना वारिता. शुद्धिमयूखे तु तत्रापि त्रिभागपक्षमेव आद्रियन्ते शिष्टा इति एतावद् अधिकम् उक्तम्.

७. अथ चतुर्थदिनादौ रजस्वलाशुद्धिविचारः.

रजस्वलाविषये तु मिताक्षरायां स्मृत्यन्तरे

''शुद्धा भर्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला,
दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुद्ध्यति'' (शंख.स्मृ.१६।१७)

इति. पञ्चमेऽहनीति रजोनिवृत्त्युपलक्षणम्. **''रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला''** (मनु.स्मृ.५।६६) इति मनुवाक्यात् साध्वीति दैवपित्र्यकर्मार्हा इति व्याख्यानात्. तेन अनुपरतेऽपि रजसि चतुर्थे अह्नि स्नानेन स्पर्शादिषु शुद्ध्यति. दैवपित्र्यकर्मविषये तु चतुर्थे अह्नि स्नातापि रजोरहितैव योज्या इति अर्थः इति उक्तम्. इदमेव च युक्तम्. **''चतुर्थेऽहनि संशुद्धा भवति व्यावहारिकी''** (मिता.३।२०) इति तत्रैव वृद्धमनुना सर्वव्यवहारेषु शुद्धेः उक्तत्वात् परम्परितेषु दैवादिकार्येषु अदोषात्. तेन अन्नसंज्ञारहित-शाकपिष्टादिस्पर्शेऽपि अदोषः, साक्षात्पाकादिक्रियायां तु दोष इति सिद्ध्यति. एवं सति शुद्ध्युत्तरं रजो अनुपरमे पाकाद्युपकरणसम्पादनदशायां यदा परिहितवसने रजःसंसर्गो दृश्येत तदा अङ्गादि संशोध्य वस्त्रान्तरं परिधाय तत्करणे दोषो न भवति इति सिद्ध्यति.

८. अथ उपरमोत्तरं पुनारजोदर्शनविचारः.

तत्र आह अत्रिः

''रजस्वला यदि स्नाता पुनरेव रजस्वला,
अष्टादशदिनाद् अर्वाग् अशुचित्वं न विद्यते,
एकोनविंशतेरर्वाग् एकाहः स्यात् ततो द्व्यहम्,
विंशप्रभृत्युत्तरेषु त्रिरात्रम् अशुचिर् भवेत्'' (मिता.३।२०)

इति. अर्थस्तु, रजोदर्शनम् आरभ्य पुनः सप्तदशदिनाभ्यन्तरे रजोदर्शने अशुचित्वं नास्ति. अष्टादशेतु एकाहाद्, ऊनविंशे द्व्यहाद्, विंशतिप्रभृतिषु त्र्यहात् शुद्धिः इति. यत्तु "**चतुर्दशदिनाद् अर्वाग् अशुचित्वं न विद्यते**" इति स्मृत्यन्तरं तत्र तु स्नानप्रभृतित्वम् अभिप्रेतम् इति अविरोधः. अयं च अशुचित्वप्रतिषेधो यस्या विंशतिदिनोत्तरमेव प्रायशो रजोदर्शनं तद्विषयः. यस्याः पुनः प्रागेव अष्टादशदिनाद् प्राचुर्येण तद्दर्शनं तस्यास्तु प्रागपि अष्टादश(शे)भ्यः त्रिरात्रम् इति विज्ञानेश्वरः. एवं च यदि प्रथमदिनएव रजो यस्या दृष्टं न द्वितीयादिषु तदापि उक्तकश्यपवाक्ये दर्शनस्यैव निमित्तत्वेन उक्तत्वात्. वसिष्ठेन च रजस्वला त्रिरात्रम् अशुचिः भवति इति उक्त्वा अनञ्जनादिविधानकथनात् चतुर्थे अह्न्येव शुद्धिः न तु प्राग् इत्यपि बोध्यम्. अज्ञाते तु रजसि निर्णयसिन्धौ पराशरमाधवीये प्रजापतिः

"**अविज्ञाते मले सा तु मलवद् वसना यदि,**
कृतं गृहेषु दुष्टं स्यात् शुद्धिस्तस्याः त्रिरात्रतः" (प्रजा.स्मृ.)

इति उक्तवान्. तेन एतन्मते मलसत्तैव अशुचित्वापादिका. कर्मतत्त्व–प्रकाशिकाख्ये कृष्णभट्टीये धर्मप्रवृतौ च "ज्ञानाद् अशुचिरिष्यते" इति चतुर्थपादः पठितः. तथा यमोऽपि

"**व्यसनात् कार्यकरणात् निद्राविस्मरणाद् अपि,**
रजःस्त्रावम् अविज्ञाता सा शुचिः सर्वकर्मसु,
ज्ञानाद् ऊर्ध्वं यदि स्पृष्टा शोधयेत् कर्मसाधनम्,
मृण्मयानि परित्यज्य स्नेहानपि विलापयेत्,
तक्षणं दारुश्रृङ्गास्थ्नां कांस्यं वा भस्मभिः शतैः,
गृहं विलेपयेत् मृद्भिः गोमयेन च वारिणा,
धान्यानां चैव सर्वेषां प्रोक्षणात् शुद्धिरिष्यते,
ज्ञाताज्ञातेषु दोषेषु अनुक्तेष्वशुभेषु च,
पुण्याहवाचनं कुर्याद् विप्राणाम् अनुशासनाद्" (यम.स्मृ.) इति.

तथा

"**असन्दिग्धे परिज्ञाते त्वार्तवे शुद्धिकारणम्,**
सन्दिग्धमात्रे स्नानं स्याद् इत्युवाच प्रजापतिः" ( )

इति च उक्तम्. तेन एतन्मते ज्ञानमेव अशुचित्वापादकम्. स्मृत्यर्थसारे तु अज्ञाते रजःस्त्रावे चतुर्षु दिनेषु ज्ञाते तु रजःस्त्रावादिकम् अशुचित्वम्. जननादौ तु ज्ञानादिकम् अशुचित्वम्. सर्वथा अज्ञातं चेत् शुचित्वमेव. एवं सर्वं पापनिमित्तं स्वसत्तादिपापापादकम् इति उक्तम्. स्वसत्तादीति स्वसत्ताम् आरभ्य. तथा च अयम् अर्थः. रजःप्रभृतीनां

स्वसत्ताम् आरभ्य पापजनकत्वात् तदारम्भकालम् अनुमाय तदारभ्य स्पर्शदोषो अनुसन्धेयः. आरम्भकालानुमानाशक्तौ तु शुचित्वमेव इति. अत्र यद्यपि पूर्वावधिकाल–सन्देहे पञ्चमदिवसादौ तज्ज्ञाने च निर्णयो न उक्तः तथापि ''**सन्दिग्धमात्रे स्नानं स्यात्**'' इति वाक्यात् सन्दिग्धया स्नातव्यम्. तद्वस्त्रादीनां साक्षात्स्पृष्टानां क्षालनं गोमूत्र–स्वर्णजलादिभिः ''**अपवित्रः पवित्रो वा**'' इत्यादि मन्त्रपूर्वकम् अन्येषाम् अभ्युक्षणं कार्यम्. यत्र च बहुस्त्रीके गृहे दुष्टवस्त्रादिना मलमात्रज्ञानं न मलिनायाः तदापि दिनगणनादिभिः या मालिन्ये सन्दिग्धा तया तथा कार्यम्. तत्रापि सन्देहे तु सर्वाभिः पुण्याहवाचनं तादृशस्थले सर्वत्र ज्ञाताज्ञातेष्विति पूर्वोक्तवाक्यात् हरिस्मरणादिपूर्वकं प्रोक्षणादिकं च सर्वत्र. तदतिरेकेण अन्यस्य शोधकतमस्य अभावात्. सन्धितपर्पटयोस्तु त्यागएव. ''**उदक्यास्पृष्टसन्धुष्टं पर्यायान्नं च वर्जयेत्**'' (याज्ञ.स्मृ.१।१६८) इति याज्ञवल्क्यवाक्ये पक्वान्नत्यागकथनाद् एतयोश्च अन्नसंज्ञासत्त्वाद् इति तु मम प्रतिभाति.

९. अथ रजस्वलायाः अशुच्यन्तरस्पर्शे रजस्वलयोः परस्परस्पर्शे च विचारः.

तत्र अपरार्के बहूनि वचनानि सन्तीति तेषाम् अर्थएव उच्यते. उदक्या–सूतिकयोः शवचण्डालकर्मके स्पर्शे त्रिरात्रोपवासः. चण्डाल–श्वपचकर्तृकेऽपि तथा पञ्चगव्याशनं च अधिकं शातातपेन उक्तं, कश्यपेनतु शुद्ध्युत्तरं तथाकरणम् उक्तम्. तद्रात्र्यनन्तरं त्वजाघ्रातकरणमपि उक्तम्. बृहस्पतिना तु पतित–श्वपाककर्तृके स्पर्शे प्रथमदिने जाते त्र्यहः, द्वितीये द्व्यहः, तृतीये एकाहः, अग्रे नक्तं कार्यं परन्तु शुद्ध्यनन्तरम् इति उक्तम्. अत्र अशक्तौ वृद्धशातातपेन तदारभ्य स्नानावध्युपवासः स्नानोत्तरं तु कालेन शुद्धिः इति उक्तम्. अत्रापि अशक्तौ तु पराशरेण अहोरात्रोपवासः, पञ्चगव्याशनं, ततः शक्त्या स्वर्णदानं, ब्राह्मणभोजनं च उक्तम्.

रजस्वलयोः परस्परस्पर्शे तु सगोत्रयोः स्नानमात्रम्. असगोत्रयोरपि सवर्णयोः स्पर्शे एकरात्रम् उपवासः. क्षत्रिया स्पर्शे ब्राह्मण्याः त्रिरात्रम्. वैश्या स्पर्शे पञ्चरात्रम्. शूद्रा स्पर्शे षड्रात्रम् इति वृद्धवसिष्ठेन उक्तम्. रजस्वला चेद् मूत्राद्युत्सृजन्ती स्पृशेत् तदा उत्सृजन्ती अहोरात्रम् उपवसेत्. भुञ्जानां चेत् तदा भुञ्जाना त्रिरात्रं जलं पिबेत्. रजस्वलां चेत् श्व–जम्बुक–खरप्रभृतयः स्पृशेयुः सा वा तान् स्पृशेत् तदा स्नात्वा सज्योतिः उपवसेत् पञ्चगव्यं च अश्नीयाद् इत्यादिकं तत्र बहु उक्तम्.

१०. अथ रजस्वलास्नानादिविचारः.

रजस्वलायाः स्नानदिवसे तैलादिमलिनं वसनादिकं च यथावत् शोधनीयम्. तद्

आह कृष्णभट्टीये पराशर:

''रजस्वला त्रिरात्रान्ते मलं प्रक्षाल्य सङ्गवे,
दन्तानां धावनं कृत्वा मृत्तिकाषष्टिभि: पृथक्,
शौचं कृत्वा ततो देहं क्षाल्य गोमयवारिणा,
स्नायात् सचैलं नाऽगारे तडागादिजलाश्रये''(परा.स्मृ.   ) इति.

अत्र मलप्रक्षालनस्य गोमयेन स्नेहमालिन्यक्षालनस्य च उक्त्या तल्लाभ:.

अत्रिरपि

''रजस्वला चतुर्थेऽह्नि मृत्तिकाषष्टिभि: पृथक्,
शौचं कृत्वा यथान्यायं दन्तानां धावनं तथा,
कृत्वा तु सङ्गवे तीरे सचैलं स्नानमाचरेत्,
भस्मगोमयमृद्भिश्च सर्वैरन्यतमेन वा,
स्नात्वांशुकं परिच्छाद्य गन्धपुष्पैरलंकृता,
आचम्य पुष्पैरादित्यम् अर्चयित्वा यथोचितम्,
ऐन्द्रं वरं प्रभो मह्यम् इदानीं दातुमर्हसि,
इत्युक्त्वार्थैन्द्रभावेन प्रार्थयेत्तु स्वकं पतिम्,
ऋतुस्नाता तु या नारी यं स्नेहाद् नरमीक्षते,
तादृशं जनयेत् पुत्रं पतिमेव निरीक्षयेत्'' (अत्रिस्मृ.   ) इति.

स्मृत्यर्थसारेतु एवं सङ्गवे स्नानमात्रम् उक्तं गृहे वा तडागादौ वा इति तु न विचारितम्. षष्टिमृत्तिकादिभि: शौचं ब्राह्मण्या:, क्षत्रादिस्त्रीणां पादपादन्यूनमृत्तिकादिभि:, विधवाया द्विगुणाभि: शौचम् इति उक्तम्. अन्येषु तु प्राचीनार्वाचीननिबन्धेषु चतुर्थे अह्नि स्नानमात्रं वदन्ति नतु तत्प्रकारं कालं वा देशं वा. शिष्टाचारस्तु सूर्योदयोत्तरं चतुर्थे अह्नि पूर्वोक्तप्रकारेण गृहेऽपि दृश्यते. व्यासस्मृतौ द्वितीयाध्याये

''स्नायात् सा तु त्रिरात्रान्ते सचैला उदिते रवौ,
विलोक्य भर्तृवदनं शुद्धा भवति धर्मत:''   (व्यासस्मृ.२।४०)

इति वाक्यात्. तेन स्मृत्याचाराभ्याम् एषा देशकालव्यवस्था उचितैव, तडागादीनाम् असार्वत्रिकत्वादपि. वस्तुतस्तु देशकालकथनम् असहायविषयम्. न हि एकाकिन्या गृहे अतिशुद्धतया स्नातुं शक्यते न वा दुष्टे अस्मिन् कलौ सलज्जया तरुण्या बहि: तथा कर्तुं शक्यते इति. एवं गृहे स्नाने रजस्वलास्पृष्टार्द्रभूमिर्गृहं च यथावच्छोध्यमेव. **''व्यसनात् कार्यकरणात्''** इति पूर्वोक्तयमवाक्येषु ज्ञानोत्तरं कर्मसाधनशोधनस्य गृहविलेपनस्य च उक्तत्वाद् इति. तत्स्पृष्टं जलं च त्याज्यमेव.

''अक्षुब्धानामपां नास्ति प्रसृतानां च दूषणम्,

स्तोकानामुद्धतानां च कल्मषैर्दूषणं भवेत्'' [उद्ध.६](देव.स्मृ.१।९।४)

इति मर्यादासिन्धौ देवलवाक्यात्. किं बहुना

''अत्राक्षुब्धतडागादि–नदीवाप्य: सरांसि च,

कश्मलाऽशुचिसंस्पर्शे तीर्थत: परिवर्जयेत्'' [उद्ध.७](देव.स्मृ.१।९।५)

इति अमेध्ययुक्तदेशस्थानां त्यागस्य तेनैव उक्तत्वाच्च चण्डालाद्यशुचिस्पर्श इति पाठान्तरस्य उक्तत्वाच्च कैमुतिकादेव उद्धृतजलत्यागप्राप्तेः इति. तेन रजस्वला–स्पृष्टार्द्रभूसंस्काराभावः तत्स्पृष्टजलत्यागाभावश्च अनाचारएव गुर्जराणाम्. तथा तृतीय–दिवसे मलापकर्षस्नानं सारस्वतद्विजक्षत्रियादिस्त्रीणां यो मध्यदेशे सोऽपि अनाचारएव. एवं रजस्वलावदेव शवस्पृग्भिश्च शिरोवस्त्रप्रभृति शोध्यमेव. यद्यपि मृत्तिकासङ्ख्या न तत्र शास्त्रोक्ता तथापि स्मृत्यन्तरे सकृद् मृत्तिकाभस्मस्नानस्य उक्तत्वात् तथाशिष्टाचाराच्च तदपि आवश्यकम्, बृहदाशौचत्वाच्च. अतः तत्स्पृष्टजलादिकं च त्याज्यमेव. रजस्वलादीनाम् आतुरत्वे तु यम: पराशरश्च

''आतुरे स्नानम् उत्पन्ने दशकृत्वो ह्यनातुर:,

स्पृष्ट्वा–स्पृष्ट्वा तु तं स्नायात् तत: शुद्ध्येत् स आतुर:''

[उद्ध.८](परा.स्मृ.७।२०)

इति आहतु:. उशनाश्च

''ज्वराभिभूता या नारी रजसा च परिप्लुता,

कथं तस्या भवेत् शौचं शुद्धि: स्यात् शौचकर्मणि,

चतुर्थेऽहनि सम्प्राप्ते स्पृशेद् अन्या तु तां स्त्रियम्,

सा सचैलाऽवगाह्याप: स्नात्वा–स्नात्वा पुन: स्पृशेत्,

दशद्वादशकृत्वो वा आचामेच्च पुन:–पुन:,

अन्त्ये च वाससां त्यागः तत: शुद्धा भवेत्तु सा,

दद्यात् शक्त्या ततो दानं पुण्याहेन विशुद्ध्यति'' इति.

(याज्ञ.मिता.३।२०)

रजोदिवसेषु मध्ये ग्रहणापाते तु निर्णयसिन्धौ स्नानम् उक्तम्.

''न सूतकादिदोषोऽस्ति ग्रहे होमजपादिषु,

ग्रस्ते स्नायाद् उदक्यापि तीर्थाद् उद्धृत्य वारिणा'' (निर्ण.सि.   )

इति भार्गवार्चनदीपिकायां सूर्योदयनिबन्धवचनात्.

''स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला,

पात्रान्तरिततोयेन स्नानं कृत्वा व्रतं चरेत्'' (परा.स्मृ.   )

इति पराशरवचनाच्च. त्रिदिनमध्यएव ग्रहणनिमित्तकं स्नानं कृत्वा अनञ्जनादिरूपं रजस्वलाव्रतं निर्वाहयेद् इति अर्थ:. एवं ग्रहणनिमित्तके स्नाने प्राप्ते यदि चन्द्रादेः ग्रस्तस्य मुच्यमानदशायाम् उदयः तदा **''ग्रस्यमाने भवेत् स्नानम्''** इति उक्तस्य निमित्तस्य अभावेऽपि **''दृष्ट्वा स्नायाद्''** इति वाक्यान्तरोक्ताद् निमित्तात् स्नानम्. यदि च तावद् न अवकाशः तदा मुख्यस्य दानकालस्य सत्त्वाद् मार्जनपूर्वकं दानमेव कृत्वा मुक्तिस्नानं कार्यम् इति प्रतिभाति. बालादीनां रजस्वलादिस्पर्शे तु शुद्धिमयूखे हरिहरभाष्ये शातातप:

''शिशोरभ्युक्षणं कार्यं बालस्याचमनं स्मृतम्,
रजस्वलादिसंस्पर्शे स्नातव्यं च कुमारकै:,
प्राक् चूडाकरणाद् बाल: प्रागन्नप्राशनाच्छिशु:,
कुमारक: स विज्ञेयो यावन्मौंजीनिबन्धनम्'' (दाल्भ्यस्मृ.१२९)

इति. रजस्वलादिदृष्टान्ने तु शातातप:

''जीवाभिशस्तपतितै: सूतिकोदक्यनास्तिकै:,
दृष्टं वा स्याद् यदन्नं तु तस्य निष्कृतिरुच्यते,
अभ्युक्ष्य किञ्चिद् उद्धृत्य तद्भुञ्जीताविशङ्कित:,
भस्मना वापि संस्पृश्य संस्पृशेद् उल्मुकेन वा,
सुवर्णरजताभ्यां वा भोज्यं ध्रातमजेन वा'' (शाता.स्मृ.)

इति. एतेन जलादेः न अशुद्धिः इति प्रतिभाति. एवम् अत्यन्ताशुचिविषये विचारितम्.

११. अत: परम् एतद्व्यतिरिक्तस्नानादियोग्यनिमित्तविचार:.

तत्र पराशर:

''दु:स्वप्ने मैथुने वान्ते विरिक्ते क्षुरकर्मणि,
चितिपूयश्मशानास्थ्नां स्पर्शने स्नानमाचरेत्'' उद्ध.९(परा.स्मृ.१२।१)

इति. अत्र मैथुनिन: स्नानं ऋतुकालविषयं कालविशेषविषयं च **''अनृतौ तु यदा गच्छेत् शौचं मूत्रपुरीषवत्''** (बृह.स्मृ.) इति बृहस्पतिवचनात्.

''अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुनम्,
कृत्वा सचैलं स्नात्वा तु वारुणीभिश्च मार्जयेत्''

(वृ.हारि.स्मृ.९।३१५)

इति मिताक्षरापरार्कयो: स्मृत्यन्तराच्च. मर्यादासिन्धौ तु सद्यो भुक्तान्नवमने स्नानाभाव:.

''अश्नन् भुक्त्वार्द्रपाणिर्वा वान्तो न स्नानमाचरेत्,

अन्यदा वमने स्नायात् तथा शोकाश्रुपातयो:'' (आप.)

इति आपस्तम्बवचनाद् इति उक्तम्. शोकाश्रुपातयोः इति शोके तत्कृते अश्रुपाते च इति अर्थ:. तथा विरिक्तस्य दशकृत्वो विरेके स्नानम् इति गोविन्दराज:. हरीतक्यादिभक्षणेन व्याधिना वा अष्टसङ्ख्यात ऊर्ध्वं विरेके स्नानम् इति मेधातिथि:. **''मैथुने दु:स्वप्ने वमनविरेकयो:''** (विष्णु.स्मृ.)इति विष्णुवाक्याद् मिलितमेव एतन्निमित्तम् इति उदीच्या इति मतत्रयम् अधिकम् उक्तम्. पूयस्पर्शे स्नानम्. तदनधिकृताकारणस्पर्शे वेदितव्यम्. **''पूयं चाकारणादन्य: स्पृष्ट्वा स्नात्वैव शुद्ध्यति''** (लिङ्गपुरा. । ।) इति लिङ्गपुराणाद् इति च विशेष उक्त:. अस्थिस्पर्शे तु मनुना विशेषः उक्त:

''नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुद्ध्यति,

आचम्यैव तु नि:स्नेहं गामालभ्यार्कमीक्ष्य चेत्'' (मनुस्मृ.५।८७)

इति. सस्नेहम् इति मांसमज्जादिसन्दिग्धम्. यत्तु ब्राह्मे

''मानुषास्थि तु संस्पृश्य स्निग्धं नि:स्निग्धमेव वा,

स्नायाद् गां संस्पृशेत् सूर्यं पश्येद् विष्णुम् अनुस्मरेत्''(ब्रह्म.पुरा.)

इति नि:स्निग्धस्पर्शेऽपि स्नानम् उक्तम् तत् कामत: स्पर्शविषयमिति अविरोध:. अन्यच्च यम आह

''अजीर्णेऽभ्युदिते वान्ते तथाभ्यस्तमिते रवौ,

दु:स्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयते'' (यम.स्मृ.)

इति. अत्र अजीर्णापगमे स्नानं देवार्चादौ अधिकारित्वप्रतिपादनार्थम् इति मर्यादासिन्धौ. तथा सूर्योदयास्तमयव्यापिनी निद्रा अभ्युदिताभ्यस्तमितपदाभ्याम् उच्यते इति अपरार्के उक्तम्. कश्यपस्तु

''उदयास्तमययो: स्कन्दित्वाऽक्षिस्पन्दने कर्णाक्रोशने चित्यारोहणे पूयसंस्पर्शने च सचैलं स्नात्वा पुनर्मन इति जपेत्. महाव्याहृतिभि: सप्ताज्याहुतीर्जुहुयात्'' (कश्य.स्मृ.)

इति विशेषम् आह. स्मृत्यन्तरे

''चितिं च चितिकाष्ठं च पूयं चण्डालमेव च,

स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत्'' (बृह.परा.स्मृ.८।२७२),

''देवार्चनपरो यस्तु वित्तार्थी वत्सरत्रयम्,

स वै देवलको नाम हव्यकव्येषु गर्हित:''.

मिताक्षरायां ब्रह्माण्डपुराणे

''शैवान् पाशुपतान् स्पृष्ट्वा लोकायतिकनास्तिकान्,
विकर्मस्थान् द्विजान् शूद्रान् सवासा जलमाविशेत्'' (ब्रह्मा.पुरा.).

अपरार्के तु 'बौद्धान्' इति पाठः. तथा तत्रैव स्मृत्यन्तरम्

''नग्नान् पाशुपतान् बौद्धान् कालान् कौलान् दिशश्चरान्,
एतान् दृष्ट्वा रविं पश्येत् स्पृष्ट्वा स्नानं समाचरेत्''

मर्यादासिन्धौ हारीतः

''बौद्धान् पाशुपतान् जैनान् लोकायतिककापिलान्,
विकर्मस्थान् द्विजान् शूद्रान् सवासा जलमाविशेत्,
कापालिकांस्तु संस्पृश्य प्राणायामोऽधिको मतः''(हारि.स्मृ.)

इति आह हारीतः. अत्र पाशुपता वेदबाह्या विवक्षिता इति व्याख्यातम्. अपरार्के तु अङ्गिरसा श्वपाकच्छायाधिरोहणे स्नानं घृतप्राशनं च उक्तम्. अन्येऽपि बहवः तत्र उक्ता

''प्रत्यहं नित्यकर्माकर्ता पक्षानन्तरम् अस्पृश्यतां याति. ज्ञातिबाह्यकृतश्च पुल्कस-म्लेच्छ-भिल्ल-पारसीकादयः साविका नारी श्वपाल उन्मत्तः शूद्रोच्छिष्टं उच्छिष्टः शूद्रः श्वविड्वराहोष्ट्र-खर-वृक-गोमायुवानर-काक-कुक्कुट-गृध्रोलूकाः, [पा.भे.१]**'भासावायस-वानर-मार्जार-खरोष्ट्र-श्वविड्-वराहाणाममेध्यम्''**(आङ्गि.स्मृ.).

सदाचारचन्द्रोदये तु मयूरामेध्यमपि उक्तम्.

''चिताप्रदेशोद्भववृक्षः, नीली-नीलीविकाराः, चण्डाल-पतितच्छाया, शिवनिर्माल्यं, भक्षवर्जं पञ्चनखः, शवः, परकीयवसाविष्ठार्तवमूत्र-रेतो-मज्जाशोणितानि''

इति. एतेषां स्पर्शे सचैलं स्नानम्. एवं च अत्र निषिद्धेतर-पक्षिपक्षाणाम् अनुक्त्वा तेषां वायूड्डायितानां स्पर्शे न कश्चिद् दोषः इति प्रतिभाति. अत्र च येषां स्नानम् उक्तं तेषाम् अस्नातानां स्पर्शे तु स्प्रष्टुः आचमनमात्रम्.

अथ अत्र विशेषो मर्यादासिन्धौ. तत्र शातातपः

''रजकश्चर्मकृच्चैव व्याधजालोपजीविनौ,
चैलनिर्णेजकश्चैव नटः शैलूषकस्तथा,
मुखे भगस्तथा श्वा च वनिता सर्ववर्णगा,
चक्री ध्वजी वध्यघाती ग्राम्यकुक्कुटसूकरौ,
एभिर्यदङ्गं स्पृष्टं स्यात् शिरोवर्जं द्विजातिषु,

तोयेन क्षालनं कृत्वा आचान्तः शुचितामियात्''(शता.स्मृ.   ).

अत्र रजको वस्त्ररञ्जनकर्ता. शैलूषो नाटकाद्यभिनेता. मुखे भगो मुखयोनिः इति ख्यातः. शिरोवर्जम् इति अत्र शिरःपदम् ऊर्ध्वांगोपलक्षकम् इति केचित्. आपस्तम्बस्तु एतान् प्रक्रम्य विशेषम् आह ''**एतैः स्पृष्टस्तु उच्छिष्ट एकरात्रं पयः पिबेत्**''(आप.स्मृ.   ). ''**एतैरुच्छिष्टैस्त्रिरात्रं घृतं प्राश्य विशुद्ध्यति**''(   ) इति.

बृहत्पराशरः

''**म्लेच्छालूनासनस्पर्शे क्षेत्रे वा यदि वा गृहे,**

उपस्पृशन् शिरः प्रोक्ष्य संशुद्धो जायते नरः''[उद्ध.१०](वृ.परा.स्मृ.८।३१२)

शङ्खः.

''**उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं वापि तथाविधम्,**

तथैव हस्तौ पादौ च प्रक्षाल्याचम्य शुद्ध्यति''   (शङ्खस्मृ.   ).

तथाविधम् इति उच्छिष्टम्. **तथैव** इति आचमनविधिना. तथा

''**यदम्भः शौचनिर्मुक्तं क्षितिं प्राप्य विनश्यति,**

प्रक्षाल्याशुचिलिप्तं च तत्स्पृष्ट्वाऽऽचम्य शुद्ध्यति''

इति. शौचजलासिक्तक्षितिमशुचिलिप्तं च स्पृष्ट्वा प्रक्षालनाद् आचमनाच्च शुद्ध्यति इति अर्थः. यमः

''**सकर्दमं तु वर्षासु प्रविश्य ग्रामसङ्करम्,**

जङ्घानां मृत्तिकास्तिस्रः पद्भ्यां च द्विगुणाः स्मृताः''(यमस्मृ.   )

इति. ग्रामसङ्करो ग्रामावकरः. अन्यान्यपि निमित्तानि स्मृत्यन्तराद् अवगन्तव्यानि. यथा

''**स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे,**

आचान्तः पुनराचामेद् वस्त्रं विपरिधाय च''   (परा.स्मृ.१२।१७)

इत्यादि.

''**कृतेष्वाचमनं कार्यं पितृकार्येषु सर्वदा,**

अधोवायुसमुत्सर्गे आक्रन्दे क्रोधने क्षुते,

मार्जारमूषकस्पर्शे प्रहासे ष्ठीवनेऽनृते''

इत्यादि च कृष्णभट्टीये.

१२. अथ स्पर्शे दोषाभावविचारः.

मर्यादासिन्धौ बृहस्पतिः

''तीर्थे विवाहे यात्रायां सङ्ग्रामे देशविप्लवे,
नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति,
आपद्यपि हि कष्टायां रुग्भये पीडने तथा,
मातापित्रोर्गुरोश्चैव निदेशे वर्तनात् तथा'' (बृह.स्मृ.)

इति. **निदेशे** आज्ञायाम्. तथा च गुर्वाद्याज्ञयापि तदभावः इति अर्थः. शातातपः

''गोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः,
अमीमांस्यानि शौचानि स्त्रीषु राजकुलेषु च'' (शाता.स्मृ.)

इति. अत्रिस्मृतौ तु **''स्त्रीणां च व्याधितस्य च''** इति चतुर्थपादः पठितः. पृथ्वीचन्द्रोदये पराशरः

''विवाहोत्सवयज्ञेषु सङ्ग्रामे जनसङ्कुले,
पलायने वनेऽरण्ये स्पृष्टास्पृष्टिर्न दुष्यति'' [उद्ध.११](वृ.परा.स्मृ.८।३०६)

इति. षट्त्रिंशन्मतेऽपि

''देवयात्राविवाहेषु यज्ञेषु विततेषु च,
उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टिर्न दुष्यति'' [उद्ध.१२](अत्रिस्मृ.२४७).

स्मृत्यन्तरे

''देवालयसमीपस्थान् देवयात्रासमागतान्,
चण्डालपतितादींश्च स्पृष्ट्वा न स्नानमाचरेत्''
''अन्यथा यदि शङ्केत देवताद्रोहमाचरेत्''

इत्यपि तत्रैव.

स्पृष्टास्पृष्टिस्वरूपं च स्मृत्यर्थसारे उक्तम्

''प्राप्यकारीन्द्रियं स्पृष्टम् अस्पृष्टम् इतरेन्द्रियम्,
तयोस्तु विषयं प्राहुः स्पृष्टास्पृष्ट्यभिधानतः''

इति. अत्र च प्राप्यकारीन्द्रियं त्वगिन्द्रियम् इतरेन्द्रियं नयनादिकं तद्विषये स्पृष्टास्पृष्टिः तत्र दोषाभावः इति केचिद् इति पृथ्वीचन्द्रः. तथाच उक्तस्थलेषु तत्कर्मके तत्कर्तृके च स्पर्शादौ न दोषः इति अर्थः.

१३. अथ भगवत्सेवायां दैवपित्र्यकर्मसु स्नानादिना शुद्धस्य के वा अशुचित्वहेतवः कथं च ततः शुद्धिः इति विचार्यते.

तत्र ये पूर्वं स्नानार्हा उक्ताः तत्स्पर्शे तु स्नानम् असन्दिग्धमेव. ये पुनः

आचमनार्हाः तेषामपि स्पर्शे स्नानमेव. सदाचारचन्द्रोदये

''श्वकाकोष्ट्रखरोलूक-सूकरग्रामपक्षिणः,
दीपं शूर्पं तथा शय्यां पादत्राणं च मार्जनीम्,
स्नानान्ते यः स्पृशेद् एतान् पुनः स्नानेन शुद्ध्यति''

इति. बृहस्पतिना अन्येषां ग्रामपक्षिप्रभृतीनाम् आचमनप्रयोजकस्पर्शानामपि स्पर्शे स्नानबोधनात् तत्समानकक्षाणाम् अन्येषामपि स्पर्शे स्नानस्य [१]सक्तुहोमे अञ्जलि-व्याकोशत्ववद् औचित्यबलादेव प्राप्तेः. इदं च नाभेः ऊर्ध्वं स्पर्शे.

''नाभेरूर्ध्वं करौ मुक्त्वा यदङ्गं स्पृशते खगः,
तत्र स्नानं प्रकुर्वीत शेषं प्रक्षालनात् शुचिः''

इति वाक्याद् इति सदाचारचन्द्रोदये. ममतु अन्यदपि प्रतिभाति. दीपादीनाम् अस्पृश्यत्वं लौकिकानामेव.

''अजारजः खररजः तथा सम्मार्जनीरजः,
दीपमञ्चकयोश्छाया हन्ति पुण्यं पुराकृतम्''

इति स्मृत्यन्तरे.

''शूर्पवातनखाग्राम्बु-स्नानवस्त्राङ्गमार्जनम्,
मार्जनीरेणुकेशाम्बु हन्ति पुण्यं पुराकृतम्'' [उद्ध.१४](अत्रिसं.३१६)

इति अत्रिस्मृतौ च तादृशामेव पुण्यहन्तृत्वोक्तेः, नतु वैदिकोपयुक्तानामपि स्पर्शे. अतएव देवत्वेन दानार्थम् उपस्थापितानामपि स्पर्शे स्नानाभावो युज्यते, अन्यथा [२]तस्य दुष्टत्वापत्तेः. श्राद्धादौ दीपदानस्य कार्तिकादिषु भगवद्दीपप्रबोधनस्य शूर्पार्पित-सौभाग्यद्रव्यस्पर्शस्य शय्यायां विष्णुमूर्तिस्थापनस्य गुरुपादुकादिस्पर्शस्य भगवन्मन्दिर-मार्जनादेश्च स्नानोत्तरम् अकर्तव्यत्वापत्तेश्च तेषां पुण्यजनकत्वापत्तेश्च. [३]अत्र वचनानि दानखण्डे सदाचारचन्द्रोदय-विष्णुभक्तिचन्द्रोदय-हरिवल्लभसुधोदय-प्रभृतिषु च द्रष्टव्यानि.

गुरुपादुकादीनां पूज्यत्वं च **''त्वत्पादुके ह्यविरतं परि ये चरन्ति''** (भाग.पुरा.१०।७२।४) इति श्रीभागवते भगवत्पादुकापरिचरणानुवादात्. भगवता कृष्णावतारे उद्धवाय रामावतारे भरताय च स्वपादुकादानाच्च सिद्धे तत्परिचरणे

''यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ,
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः'' (श्वेता.उप.६।२३)

इति श्वेताश्वतरश्रुत्या देववद् गुरुभक्तेरपि कर्तव्यत्वात् सिद्धम्. अतः तदुपानह

ऊर्ध्वाङ्गस्पर्शेऽपि अदोषः. तथा नृसिंहपुराणे दूतान् प्रति यमवाक्ये

''सम्मार्जनं च यो दूता गोमयेनोपलेपनम्,

करोति भवने विष्णोस्तस्य त्याज्यं कुलत्रयम्'' (नृसिं.पुरा.)

इति सम्मार्जनफलकथनाद् भगवन्मन्दिरसम्मार्जनरजसोऽपि पुण्यत्वे कुतः तत्सम्मार्जनीस्पर्शे दोषः? न च उपलेपनमेव सम्मार्जनम् इति शङ्क्यम्, श्रीभागवते **''सम्मार्जनोपलेपाभ्याम्''**(भाग.पुरा.११।११।३९) इति भगवद्वाक्यस्य द्विजवचन-विरोधापत्तेः. अतो लौकिकानामेव तेषां स्पर्शे स्नानं नतु शास्त्रीयाणाम् इति निश्चयः. किञ्च, स्नानोत्तरं नाभेः अधो उपानत्स्पर्शे यत्र दोषाभावः तत्र तीर्थादौ स्नात्वा उपानत्परिधानेन गृहागमने पादमात्रस्पर्शे दोषाभावो अर्थादेव सिद्धः. दूराद् आगमने मध्ये मार्गमध्ये उच्छिष्टादीनां पतितानां संसर्गस्य अशक्यपरिहारत्वेन अन्ततो गत्वा ''पादौ शुची ब्राह्मणस्य'' इति वाक्यं शरणीकरणीयम्. गृहे आगत्य पादशौचं च कार्यमेव. तथा सति अध्वगता अनेकदुःस्पर्शापेक्षया एकस्य उपानत्स्पर्शस्य अल्पत्वादपि तथा. केचित्तु **''पादुके खञ्जतो मेध्ये उत्तमाङ्गे ह्युपानहौ''** इति वचनमपि आहुः. तद्यपि समूलं तदा 'उत्तमाङ्ग'पदस्य उपानदुपरिभागबोधकत्वं ज्ञेयम्. स्नानोत्तरं गृहाद्यागमने उपानहावपि मूत्राद्युत्सर्गे अपरिहिते एवं साम्प्रदायिकशिष्टाचाराद्धार्ये(?). **''मूत्रं पुरीषं नो कुर्यात् सोपानत्कः कदाचन''** इति सदाचारचन्द्रोदये स्मृत्यन्तरे निषेधाद् इदानीं च सर्वदेशेषु तदानीं तत्परिधानदर्शनेन तदशुचित्वस्य स्फुटत्वाद् इति. शिष्टास्तु उपानत्स्पर्शमपि गुल्फाद् अधएव अदुष्टम् अङ्गीकुर्वन्ति. कलौ शिष्टाचारस्य स्मृत्यपेक्षयापि अधिकत्वात् तथैव उचितं नतु तदुपर्यपि इति. एवं च चार्मस्नेहविशेष-सन्धित-काष्ठपेटिकादिष्वपि सन्धायकस्नेहस्य शुष्कीभावे उपरि तदभावात् क्वचित् लेशेन सत्त्वेऽपि तद्बुद्ध्यभावाच्च तादृशपेटिकास्पर्शेऽपि न तत्कृतम् अशुचित्वं पुरुषस्य भोज्य-व्यतिरिक्तवस्तुनश्च इति बोध्यम्. भोज्यस्य तु तद् भवत्येव. यमेन ''कोशगतास्तथापः'' इति दृतिगतायां त्याज्यत्वकथनाद् न्यायसाम्येन भोज्यवस्तूनामपि तथात्वस्य युक्त्वात्, शिष्टानां तथैव आचाराद् इति. अन्यच्च मर्यादासिन्धौ देवलः

''ततः शरीरस्रोतोभ्यो मलनिःस्पन्द-निःस्रवात्,

अन्नादीनां प्रवेशाच्च स्याद् अशुद्धिर्विशेषतः,

पतिताशुच्यमेध्यानां स्पर्शनाच्चाशुचिर्भवेत्,

सुप्ताद् वस्त्रविपर्यासात् कृताद् अध्वपरिश्रमात्,

उक्त्वा च वचनं शुक्तम् अनृतं क्रूरमेव च,

द्रप्साविद्धां तनुं लक्ष्य दृष्ट्वाचम्य शुचिर्भवेत्,

प्रलेपस्नेहगन्धानाम् अशुद्धौ व्यपकर्षणात्,

शौचलक्षणमित्याहुः मृदपोगोमयादिभिः,
लेपे स्नेहे च गन्धे च व्यपकृष्टे सुदूरतः,
पश्चाद् आचमनं चापि शौचार्थं वक्ष्यते विधिः''

(देव.स्मृ.९।शरीरशुद्धिः)

इति. अत्र विवक्षितं शरीरच्छिद्रनिर्गतं मलं द्वादशधा मनु–विष्णुभ्याम् उक्तम्.

''वसा शुक्रमसृङ् मज्जा मूत्रं विट् कर्णविण्नखाः,
श्लेष्माश्रुदूषिकास्वेदा द्वादशैते नृणां मलाः'' (मनु.स्मृ.५।१३५) इति.

वसा हृन्मेदः. 'शुक्र'पदं रजसोऽपि उपलक्षकम्. 'असृक्'पदं पूय–स्नायु–मांसादेः. 'कर्णविट्' कर्णमलम्. तद् अस्य मलस्य ष्ठीवनादेरपि उपलक्षणम्. 'नख'पदं केशलोमादेः. 'स्वेद'पदं गात्रमलानाम्. एतेषां 'निःस्पन्दम्' ईषद् निःसरणम्. 'निःस्रवो' भूयो निःसरणम्. अन्नादीनाम् इत्यादिपदं जलदुग्धौषधादीनामपि सङ्ग्राहकम्. तथा च एतेभ्यो अशुचिः भवति, कर्मकाले विशेषतो भवति इति अर्थः. अत्र निःस्पन्दस्यैव अशुद्धापादकत्वे [४]निःस्रवस्य अर्थादेव अशुद्धिहेतुत्वप्राप्तेः तदुक्तिवैयर्थ्यापत्तिः स्यादिति [५]तद्वारणाय पूर्वोक्तमलेषु पूर्वषट्कस्य निःस्पन्देऽपि विशेषतो अशुद्धिः उत्तरषट्कस्य तु निःस्रवएव विशेषतो अशुद्धिः इति व्याख्येयम्. एवं च यद् बौधायनेन पूर्ववन् मलान् अभिधाय उक्तम्

''आददीत मृदोपश्च षट्सु पूर्वेषु शुद्धये,
उत्तरेषु च षट्स्वद्भिः केवलाभिर् विशुद्ध्यति''(देव.समृ.९।शरीरशुद्धिः)

इति. तदपि सङ्गतं भवति इति. इयं च शुद्धिः तदङ्गस्य. सापि स्वकीयमलस्पर्शे, परकीयतत्स्पर्शे स्नानस्य पूर्वम् उक्तत्वाद् इति. तेन कर्मकाले पूर्वषट्कनिःस्पन्देऽपि स्नानम्. उत्तरषट्कस्य तु निःस्रव इति सिद्ध्यति. मनुनातु द्वादशानामपि निर्गमे मृद्वार्युपादानम् उक्तम्. तद् दैवपित्र्यकर्मकाले तद्योग्यत्वार्थम् इति गोविन्दराजः इति कुल्लूकभट्टीये. मर्यादासिन्धौतु उत्तरषट्कस्य जलमात्रेण गन्धलेपक्षयाभावः इति उक्तम्. उभयमपि कालभेदेन युक्तमेव. पतिताशुच्यमेध्यानाम् इति अत्र पतितानि यानि अशुच्यमेध्यानि इति अर्थः. अत्र 'अशुचि'पदेन औपाधिकाशौचद्रव्यम् उच्छिष्टादिकम्. अमेध्यं च स्वभावाद् अशुचिः इति भेदो बोध्यः. तत्र अमेध्यं तु देवलेन गणितम्

''मानुषास्थि शवं विष्ठा रेतो मूत्रार्तवे वसा,
मेदोऽसृक्दूषिका श्लेष्मा मज्जा चामेध्यमुच्यते''(देव.स्मृ.९।अमेध्यत्वम्)

इति. एतेषां स्पर्शने अशुद्धिः स्फुटैव. अत्र अन्यत्र च मलेषु स्तन्यस्य अगणनात् तस्य निःस्पन्दादिना न अशुद्धिः. नच **''स्त्रियःक्षीरं द्विजः पीत्वा''** इति स्मृत्यन्तरे पुनः

संस्कारादिस्मरणात् सर्वदा अशुचित्वं शङ्क्यम्, तस्य पानएव तथात्वात्. अन्यथा ''**हस्ते दत्तानि चान्नानि प्रत्यक्षं लवणं तथा,**(व्याघ्र.स्मृ.३४८) **मृत्तिकाभक्षणं चैव गोमांसाशनवत् स्मृतम्**(?)'' इति वाक्योक्तानामपि स्पर्शे [६]तथात्वापत्तेः इति. सुप्तेतु अशुद्धिः दक्षेण उक्ता—

''अत्यन्तमलिन: कायो नवच्छिद्रसमन्वित:,
स्रवत्येव दिवारात्रौ प्रात: स्नानं विशोधनम्,
क्लिद्यन्ति हि प्रसुप्तस्य इन्द्रियाणि क्षरन्ति च,
अङ्गानि समतां गच्छन्त्युत्तमान्यधमै: सह'' (दक्षस्मृ.२।७)

इति. अत्र प्रसुप्तस्य इति कथनाद् आसीनप्रचलायिते लालास्वेदाद्यभावेन तथा न दोषः इति आचमनमात्रम्. लालादिस्रावेतु आसिनप्रचलायितेऽपि स्नानमेव. यद्यपि दक्षेण प्रात:स्नानं प्रक्रम्य सुप्तदोषः उक्तः तथापि दूषकताबीजस्य स्वापान्तरेऽपि तुल्यत्वात् प्रस्वापमात्रे [७]ज्ञेय:. वस्त्रविपर्यासे क्षुतादौ [८]वा आचमनमात्रम्, अल्पदोषत्वात्. अतएव सदाचारचन्द्रोदये पराशर:

''क्षुते निष्ठीवने सुप्ते परिधानेऽश्रुपातने,
कर्मस्थ एषु नाचामेद् दक्षिणं श्रवणं स्पृशेत्'' [उद्ध.१५](परा.स्मृ.१२।१८)

इति आहु:. सुप्ते इति आसीनप्रचलायिते बोध्यम्, युक्तेः उक्तत्वात्. इदं च श्रोत्राचमनम् आचमनाशक्तौ बोध्यम्. सदाचारचन्द्रोदये

''कुर्याद् आचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनम्,
कुर्वीतालभनं वापि दक्षिणश्रवणस्य च,...
अविद्यमाने पूर्वस्मिन् उत्तरप्राप्तिरिष्यते'' (मार्क.पुरा.३१।७१,७२)

इति मार्कण्डेयपुराणात्. श्रोत्राचमनप्राशस्त्यं याज्ञवल्क्ये आह

''गङ्गा च दक्षिणे कर्णे नासिकायां हुताशन:,
उभयो: स्पर्शने चैव तत्क्षणादेव शुद्ध्यति'' (याज्ञ.स्मृ.) इति.

मुखजा: स्वल्पतमा बिन्दवस्तु वस्त्रादौ पतिता: शुद्धाएव न तु देहे. तद् आह गौतम: ''**न मुख्या विप्रुष उच्छिष्टं कुर्वन्ति न चेद् अङ्गे निपतन्ति**'' (व.१।३७) इति. ''उक्त्वा च वचनं शुक्तम्'' इत्यत्र 'शुक्त'पदेन परुषम् अश्लीलं च उच्यते. ''शुक्ताम्ले परुषे अपूते'' इति विश्वकोशात्. द्रप्साविद्धाम् इति घनीभूतश्लेष्मादिलिप्ताम्. शौचार्थं वक्ष्यते विधिः इति. सर्वशरीरशुद्ध्यर्थम् आचमनस्य प्रकारो वक्ष्यते इति अर्थ:. यथा

''स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे,
आचान्त: पुनराचामेद् वस्त्रं विपरिधाय च'' (परा.स्मृ.१२।१७)

इत्यादि. शेषं स्पष्टम्.

अन्यच्च छन्दोगपरिशिष्टे

‘‘पित्र्यमन्त्रानुद्रवणे आत्मालम्भे अवेक्षणे,
अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे,
मार्जारमूषकस्पर्शे आक्रुष्टे क्रोधसम्भवे,
निमित्तेषु च सर्वेषु कर्म कुर्वंस्त्वप:स्पृशेत्’’[उद्ध.१६]

(कात्या.स्मृ.२।१३,१४)

इति. अनुद्रवणम् उच्चारणम्. आत्मालम्भो हृदयस्पर्श:. तस्यैव अवेक्षणं च. शेषं स्फुटम्.

भगवत्सेवायान्तु अधोवायुसमुत्सर्गे स्नानमेव.

आगमे च

‘‘अश्लीलभाषणं चैव अधोवायुविमोक्षणम्’’ (   )इति.

वाराहपुराणे च

‘‘स्पृशन् माम् अग्रतो पूतिवातकं च प्रमुञ्चति,
वायुं पुरीषसंयुक्तं स पिबेत्तु न संशय:,
मक्षिका पञ्च वर्षाणि सप्त वर्षाणि मूषक:,
श्वा चैव त्रीणि वर्षाणि नव वर्षाणि कच्छप:’’

[उद्ध.१७](वरा.पुरा.१३२।१,२)

इति अपराधेषु गणनात्, तत्फलस्य कथनात्. अजीर्णे स्नानस्य उक्तत्वेन अधोवायुसमुत्सर्गस्य च अजीर्णतएव प्रायो भवनाच्च स्नानस्यैव भगवत्सेवायाम् औचित्याद् इति. मार्जारस्पर्शे तु यत् स्नानं तत् मार्जारकर्मकस्पर्शविषयम्

‘‘भास–वायस–मार्जार–खरोष्ट्रांश्च श्वसूकरान्,
अमेध्यानि च संस्पृश्य सवासा जलमाविशेत्’’ (आङ्गि.स्मृ.   )

इति अङ्गिरसो वाक्ये संस्पर्शकर्मतायाएव उक्त्वात्. अन्यथा मार्जारकर्तृक–स्पर्शस्यापि दूषकत्वाङ्गीकारे **‘‘मार्जारश्चैव दर्वी च मारुतश्च सदा शुचि:’’** इति वाक्यविरोधापत्ते:. यद्वा, भाण्डादिस्पर्शे शुद्धि: शरीरस्पर्शे स्नानम् इति. दाक्षिणात्य–निबन्धेषुतु भोजने पूजादिकर्मणि पुच्छे बिडालस्पर्शे स्नानम्, अन्यदा तु शुचित्वम्.

‘‘**पुच्छे बिडालकं स्पृष्ट्वा स्नात्वा विप्रो विशुद्ध्यति, भोजने कर्मकाले च विधिरेषः सनातनः**’’ इति रत्नावलीनिबन्धोदाहृत–स्मृतिवचनाद् इति उक्तम्. एवं च अस्नातादीनां वस्त्राद्यन्तरितस्पर्शेऽपि वस्त्राद्यन्तरिस्पर्श इति पूर्वोक्तप्रचेतोवाक्यात् स्नानमेव. काष्ठाद्यन्तरितस्पर्शेतु आचमनं समाचारात्. तथैव अविकपट्टदुकूलाद्यन्तरित–स्पर्शेऽपि.

१४. अथ वस्त्रादिविषये [१]शुद्धिविचारः.

तत्र अहतस्य वस्त्रस्य प्रोक्षणात् शुद्धिः. अहतानां प्रोक्षणम् इति एके ‘‘**अहतं यन्त्रनिर्मुक्तम्**’’ इति अपरार्के वायुपुराणात्. इदं च मङ्गलएव शस्तम् इति पृथ्वीचन्द्रोदये

‘‘**अहतं यन्त्रनिर्मुक्तं वासः प्रोक्तं स्वयम्भुवा,**
शस्तं तन्माङ्गलिक्येषु तावत् कालं न सर्वदा’’ (   )

इति भृगु–सत्यतपसोः वाक्याद् उक्तम्. अतो यद् अहतं वासः तत् सर्वकर्मसु शुद्धम्. तल्लक्षणं तु पृथ्वीचन्द्रोदये पुलस्त्य–शातातपौ सदाचारचन्द्रोदये कात्यायनश्च आह

‘‘**ईषद्धौतं नवं श्वेतं सदशं यन् न धारितम्,**
अहतं तद् विजानीयात् पावनं सर्वकर्मसु’’ (कात्या.स्मृ.   )

इति. **ईषद्धौतम्** इति वारैकं रजकेन निर्णिक्तम् ईषद्धौतं केवलजलमात्र–प्रक्षालितम् इति पृथ्वीचन्द्रः. तथा सदाचारचन्द्रोदये

‘‘**अष्टहस्तं नवं श्वेतं सदशं यन्न धारितम्,**
अहतं तद् विजानीयात् सर्वकर्मसु पावनम्’’ (   )इति च.

अत्र एवं मम प्रतिभाति.

आचारतिलके

‘‘**शुक्रशोणितसंछर्दिश्लेष्ममूत्रपुरीषकम्,**
स्निग्धदुर्गंधिजीर्णानि नव दोषाश्च वाससि’’ (   )

इति कथनाद् एतद्दोषराहित्यमेव नवत्वम्. अन्यथा ‘‘यन्न धारितम्’’ इति अस्य वैयर्थ्यापत्तेः. श्वेतम् इति अनिषिद्धवर्णान्तरस्यापि उपलक्षकम्

‘‘**सवस्त्रोपस्करैर्युक्ता शय्या रक्तांशुकानि च,**
पुष्पाणि चैव शुद्ध्यन्ति प्रोक्षितानि न संशयः’’ (बृ.परा.स्मृ.   )

इति मर्यादसिन्धौ बृहत्पराशरवाक्यात्. द्वितीयवाक्ये ‘अष्टहस्तम्’ इति ‘‘**अहतं वासः परिधत्ते**’’ इति श्रुत्यादिषु अहतस्य [२]परिधानत्वबोधनात् तदर्हत्वबोधकं न तु

लक्षणस्यापि घटकम्. तथा सति अधारितम् ईषद्धौतं ''अधारितं नवम्'' अधारितं श्वेतम् अधारितं सदशम् इति चतुर्विधम् अहतं भवति. ततश्च तत्तत्कर्मणि तस्य–तस्य पवित्रत्वं सुखेनैव सम्भवति. यथा ईषद्धौतस्य तस्य यज्ञादिकर्मणि. नवस्य प्रावरणादौ उज्ज्वलस्य चित्रकौसुम्भादेः सुवासिनी–राधादामोदरार्थकदानादिषु. सदशस्य गुर्जराणां परिणयकाले कन्यापरिधानादिषु. नवमपि अक्षालितं तु न भगवदुपयोगि. वाराहपुराणे

''नीलीरञ्जितवस्त्रं यो मर्त्यो मह्यं निवेदयेत्,

नवमक्षालितं चैव रौरवे नरके वसेत्'' (वारा.पुरा. ।)

इति निन्दनात्. ततश्च नीलीरञ्जिताक्षालितव्यतिरिक्तानां सर्ववर्णानां नवीनानां वस्त्राणां तथा मनुष्यानुपभुक्तानां धौतानां चित्राणां रक्तानां च निर्मलानां वस्त्राणां प्रोक्षणादेव शुद्ध्या भगवत्कर्मणि तेषां स्पर्शो न दोषावहः. किञ्च मर्यादासिन्धौ मेध्यस्य चातुर्विध्यं देवलेन उक्तं व्याख्यातं च

''शुचि पूतं स्वयं शुद्धं पवित्रं चेति केवलम्,

मेध्यं चतुर्विधं लोके प्रजानां मनुरब्रवीत्,

नवं वा निर्मलं वापि शुचीति द्रव्यमुच्यते,

शुद्धं पवित्रं पूतं च शुद्धम् इत्यभिधीयते,

स्वयमेव हि यद् द्रव्यं केवलं मेध्यतां गतम्,

स्थावरं जङ्गमं वापि स्वयंशुद्धमिति स्मृतम्,

अन्यद्रव्यैरदूष्यं यत् स्वयमन्यांश्च शोधयेत्,

हव्यकव्येषु यत्पूज्यं तत्पवित्रमिति स्मृतम्'' (देव.स्मृ.९।१–४)

इति. अत्र प्रथमश्लोके केवलम् इत्यस्य अमेध्यलेपहीनम् इति अर्थः. द्वितीयश्लोके शुचिसंज्ञं लक्षयति ''नवम्...'' इत्यादि. तत्र नवम् इति अचिरजातम्. तदपि उपभोगात् प्रागेव वर्जितम् इति वक्ष्यमाणत्वात्. निर्मलम् इति अनवमपि यत् मलशून्यम्. अग्रिमार्धे [३]तस्यैव संज्ञान्तरम् आह. तत्र आद्यः 'शुद्ध'शब्दः स्वयंशुद्धपरः. द्वितीयस्तु शुचिपर्यायः. एवं च शुचिद्रव्यमेव पुनः पूतादिसंज्ञायोगि नवत्वनिर्मलत्वसद्भावात्. संज्ञाभेदस्तु वक्ष्यमाणतत्तदुपाधियोगार्थम्. शुचीनि उदाहरति

''अथ सर्वाणि धान्यानि [४]द्रव्याण्याभरणानि च,

अवर्ज्यावर्ज्यज्ञातानि शुचीन्येतानि केवलम्'' [उद्ध.१८](देव.स्मृ.९।५)

इति. अत्र अत्यन्तम् अवर्ज्यम् अवर्ज्यावर्ज्यं तद् यथा स्यात् तथा ज्ञातानि अवर्ज्यावर्ज्यज्ञातानि केवलम् इति अमेध्यलेपवर्ज्यम्. पूतसंज्ञं लक्षयति

''वर्जिते निर्मले द्रव्ये शुचिसंज्ञा प्रवर्तते,

तस्मिन्नेव हि कर्मण्ये पूतसंज्ञा पुनर्भवेत्''[उद्ध.१९] (देव.स्मृ.९।६)

इति. वर्जिते उपभोगशून्ये नवे निर्मले वा द्रव्ये कर्मार्थं कृतप्रोक्षणादिसंस्कारे पूतसंज्ञा भवति इति अर्थः. पूतसंज्ञोपाधिं दर्शयति

''तद्यच्छुद्धं न कर्मण्यं शुचीत्याहुर्द्विजातयः,

निर्मलं संस्कृतं द्रव्यं क्रियार्थं पूतमुच्यते'' [उद्ध.२०] (देव.स्मृ.९।७)

इति. एतेन शुचेरेव द्रव्यस्य क्रत्वर्थसंस्कारयोगः पूतसंज्ञोपाधिः इति अर्थः. स्वयंशुद्धं लक्षयति स्वयमेव हि इत्यादि. यद्द्रव्यं गृहादिकम् अमेध्यलेपहीनम् अशुचिस्पर्शमात्रदूषितं सत् स्वयमेव पुरुषव्यापारं विनैव वायुरश्मिमात्रेणैव शुद्धतां याति तत् स्वयंशुद्धम् इति उच्यते इति अर्थः. तदेव उदाहरति

''वसतिश्चमसो यानं वाहनं साधनानि च,

क्षुरो नौरासनं चेति स्वयंशुद्धमिति स्मृतम्'' (देव.स्मृ.९।८)

इति. वसतिः गृहम्. चमसो होतृचमसादि. यानं रथादि. वाहनं हयादि. साधनं खड्गादि. शेषं स्फुटम्. तथा

''पशवश्च स्वयंशुद्धा योषितश्चानृतौ तथा,

ब्रह्महत्यादि नारीणां ऋतुकाले हि संस्पृशेत्,

आकराश्च स्वयंशुद्धा द्रव्याणामिति निश्चयः,

क्रीतं च व्यवहारिभ्यां पण्यं शुद्धमिति स्मृतम्,

अदृष्टं वाक्प्रशस्तं च स्वयंशुद्धं च केवलम्,

त्रीण्येतानि विशुद्धानि भगवान् मनुरब्रवीत्''

[उद्ध.२१] (देव.स्मृ.९।१०,१२,८)

इति. एतानि इति अदृष्टादीनि. विशुद्धानि इति शुद्ध्यन्तरानपेक्षाणि. पवित्रं लक्षयति अन्यद्रव्यैः इत्यादि. अनेन शुचिनएव अन्यादूष्यत्वम् अन्यशोधकत्वं वा पवित्रसंज्ञोपाधिः इति उक्तम्. तदेव उदाहरति

''अजाश्वं मुखतो मेध्यं गावो मेध्यास्तु पृष्ठतः,

पुष्पितास्तरवो मेध्या ब्राह्मणाश्चैव सर्वदा'' (देव.स्मृ. ९।१४)

''भस्म क्षौद्रं सुवर्णं च सदर्भाः कुतपास्तिलाः,

अपामार्गशिरीषार्काः पद्ममामलकं मणिः,

माल्यानि सर्षपा दूर्वाः सदा भद्राः प्रियङ्गवः,

अक्षताः सिकता लोहा हरिद्राश्चन्दनं यवाः,

पालाशखदिराश्वत्थ-तुलसीधातकीवटाः,

एतान्याहुः पवित्राणि ब्रह्मज्ञा हव्यकव्ययोः,

पौष्टिकानि मलघ्नानि शोधनानि च देहिनाम्,
तेष्वापो गोशकृन्–मृच्च पवित्राणि विशेषतः,
सर्वाशुचिविशुद्ध्यर्थं सर्वेषां सर्वतः सदा''

[उद्ध.२२](देव.स्मृ. ९।२१–२४)

इति. अतो नवत्वनिर्मलत्वाभ्यां शुचेः वस्त्रादिपदार्थस्य शंखोदकप्रोक्षणादिना संस्कारेण पूतत्वादपि [५]तथेति न तत्र स्पर्शदोषः. यत्तु कर्मठा ऊषादिना चैलनिर्णेजकधौतानां पुनः प्रक्षालनेऽपि शोधकद्रव्यदोषाद् दुष्टत्वं मन्यन्ते तत्तु तैत्तिरीयश्रुतौ सदृग्यावृत्कामनया विहितस्य दाक्षायणयज्ञस्य कर्तारं प्रत्येव नतु अन्यान् प्रति. श्रुतौ

''तस्यैतद् व्रतं नानृतं वदेत् न मांसम् अश्नीयात् न स्त्रियम् उपेयात् नास्य पल्यूलनेन वासः पल्यूलयेयुरेतद्धि देवाः सर्वं न कुर्वन्ति''

इति तं प्रत्येव विधानात्. अतः तत्सहपठित–व्रतान्तरसाहित्यएव युक्तम् इति. किञ्च, एकादशस्कन्धे

''द्रव्यस्य शुद्ध्यशुद्धी च द्रव्येण वचनेन च,
संस्कारेणाथ कालेन महत्त्वाल्पतयाऽथवा,
शक्त्याऽशक्त्याऽथवा बुद्ध्या समृद्ध्या च यदात्मने,
अघं कुर्वन्ति हि यथा देशावस्थानुसारतः''

(भाग.पुरा.११।२१।१०,११)

इति भगवद्वाक्यात्. श्रीधरीये च

''देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम्,
उपपत्तिम् अवस्थां च ज्ञात्वा शुद्धिं प्रकल्पयेत्''

[उद्ध.२३](बौधा.स्मृ.५।५५)

इति बौधायनीयवाक्याच्च. स्वशक्तिसमृद्ध्यादिकं द्रव्यस्वरूपं द्रव्यप्रयोज–नादिकं च आलोच्य द्रव्याशौचस्य कल्पनीयत्वाद् अनुशासनादपि तदालोच्य तादृशस्पर्शे दोषाभावः. तेन वितानप्रतिसीरादीनां नवीनकरणाशक्त्यापि [६]तथा इति बोध्यम्. भगवद्–वाक्यार्थस्तु द्रव्यस्य पात्रवस्त्रादेः शुद्ध्यशुद्धी. द्रव्येण तोयादिना शुद्धिः. मूत्रादिनातु अशुद्धिः. वचनेन शुद्धम् अशुद्धं वा इति सन्देहे ''इदं शुद्धम् अस्ति'' इत्यादिरूपेण ब्राह्मणवचनेन शुद्धिः, 'न' इत्यादिरूपेण अशुद्धिः. संस्कारेण प्रोक्षणादिना पुष्पादिशुद्धिः, अवघ्राणादिनातु अशुद्धिः.

अथ कालेन, दशाहादिना नवोदकादेः शुद्धिः, विपरीतेन अशुद्धिः. तदुक्तम्

''काले मेघोदकं ग्राह्यं वर्ज्यं तु त्र्यहमेव हि,
अकाले दशरात्रं स्यात् ततः शुद्धिर्विधीयते''

इति. तथा, अन्नादेः अपर्युषितस्य शुद्धिः विपरीतस्य अशुद्धिः. महत्त्वाल्पतया यथा अन्त्यजाद्युपहतानां तडागाद्युदकानां महत्त्वाल्पत्वाभ्यां शुद्ध्यशुद्धी. शक्त्याशक्त्या सूर्योपरागादौ सूतकादौ च अन्नादेः शक्तान् प्रति अशुद्धिः अशक्तान् प्रति तु शुद्धिः. बुद्ध्या पुत्रजन्मादेः दशाहाद् बहिः ज्ञानेन शुद्धिः, अन्तर्ज्ञानेन अशुद्धिः. समृद्ध्या जीर्णमलवद्वस्त्रादेः समृद्धान् प्रति अशुद्धिः, दरिद्रं प्रति शुद्धिः. तत्रापि विशेषम् आह ''...यदात्मने'' इत्यादि. एते द्रव्यवचनादयो द्रव्यानादयो द्रव्याशुद्धिद्वारा आत्मने यद् अघं कुर्वन्ति तद् देशावस्थानुसारतएव यथावत् कुर्वन्ति नतु सर्वतः. तथाहि, निर्भयदेशएव स्नानादिना शुद्धिं कुर्वन्ति, नतु चोराद्याकुले. तथा रोगादिरहित–युवाद्यवस्थायामेव अघं कुर्वन्ति, नतु बाल्यादि रोगाद्यवस्थायां च इति बौधायनवाक्यं स्फुटार्थम्. तथा सति यद्ब्राह्मेऽपि उक्तम् ''**प्रत्यहं क्षालयेद् वस्त्रं दैवे पित्र्ये च कर्मणि**'' (ब्रह्म.पुरा.)इति. यच्च लैङ्गे ''**देवकार्योपयोग्यानां प्रत्यहं शोचमिष्यते**'' (लिङ्गपुरा.)इति तदपि वर्षादिव्यतिरिक्तकालएव इति बोध्यम्. वर्षादौ तु दिनान्तरे क्षालितानां कर्मार्हत्वाय प्रोक्षणमेव शुद्ध्युपायः. सएव च भगवते महाराजोपचारेण पूजाकरणेऽपि बोध्यः. कालकृतदोषस्य [७]तेनापि परिहाराद् इति. तथा, अस्नातेन काष्ठादिभिः धौतवस्त्रस्य आनयनेऽपि न दोषः. उपाकर्तव्यपशोः स्पर्शस्थले तदन्वारम्भणे यजमानमृत्युः अनन्वारम्भणे स्वर्गलोकाद् हानिः इति दोषौ प्रदर्श्य वपाश्रपणीभ्याम् अन्वारभते तद् नैव अन्वारब्धं नैव अनन्वारब्धम् इति उभयदोषोपशमार्थं श्रावितस्य स्पर्शन्यायस्य अत्रापि स्पर्शदोषाभावाय अङ्गीकारे बाधकाभावात्. केचित्तु

''आविकं पट्टकूलं च कृष्णाजिनमथापि वा,
एभिः प्रवेष्टितं वस्त्रं प्रोक्षणादेव शुद्ध्यति''

इति वचनमपि पठन्ति. न च ''वस्त्राद्यन्तरितस्पर्शे'' इति प्रचेतोवचनविरोधः. [८]तस्य अस्पृश्यस्पर्शविषयत्वेन विषयभेदात्. किञ्च, अपरार्के स्मृत्यन्तरेण मर्यादसिन्धौ देवलेन अमेध्यस्य चातुर्विध्यम् उक्तम्

''दूषितं वर्जितं दुष्टं कश्मलं चैव लिङ्गिनाम्,
चतुर्विधममेध्यं च सर्वं व्याख्यास्यते पुनः,
शुच्यप्यशुचिसंस्पृष्टं द्रव्यं दूषितमुच्यते,
अभक्ष्यभोज्यपेयानि वर्जितानि प्रचक्षते,
[९]**व्यङ्गः पतितचाण्डालौ ग्राम्यकुक्कुटसूकरौ,**

श्वा च नित्यं विवर्ज्याः स्युः षडेते कर्मतः समाः,
सव्रणः सूतकी सूती मत्तोन्मत्तरजस्वलाः,
मृतबन्धुरशुद्धश्च वर्ज्या एते स्वकालतः,
स्वेदाश्रुबिन्दवः फेनो निरस्तं नखलोम च,
आर्द्रं चर्मासृगित्येतद् दुष्टमाहुर्मनीषिणः,
मानुषास्थि वसा विष्ठा रेतोमूत्रार्तवानि च,
कुणपं पूयमित्येतत् कश्मलं समुदाहृतम्'' इति.

उद्ध.२४(देव.स्मृ.९।२९-३४)

''दूषितैः प्रोक्षणेनापि शुद्धिरुक्ता विधानतः,
दृष्टैर्मार्जनसंस्कारैः कश्मलैः सर्वथा त्यजेत्'' उद्ध.२५(देव.स्मृ.९।३५)

इति च. अत्र लिङ्गिनाम् इति दण्डादिलिङ्गधारिणाम्. अभक्ष्य इति अत्र नञः त्रिष्वपि सम्बन्धः. व्यङ्गो जन्मतएव अङ्गहीनः. त्यक्तः इति पाठे ज्ञातिबाह्यः. नित्यं विवर्ज्या इति सर्वदैव अस्पृश्याः. उन्मत्तः इति चित्तविक्षेपवान्. दूषितैः दुष्टैः इति अत्र दूषितस्य इति शेषः. कश्मलैः इति अत्र दूषितम् इति शेषः. स्फुटम् अन्यत्. एवं सति अस्नातस्य [१०]एतेषु अनन्तर्भावादपि अदोषः. किञ्च, आश्वलायनस्मृतौ

''परिधाने सितं शस्तं वासः प्रावरणे तथा,
पट्टकूलं यथालाभं ब्राह्मणस्य विधीयते,
आविकं त्रसरं चैव परिधाने परित्यजेत्,
शस्तं प्रावरणे प्रोक्तं स्पर्शदोषो नहि द्वयोः,
भोजनं च मलोत्सर्गं कुरुते त्रसरावृतः,
प्रक्षाल्य त्रसरं शुद्धं [११]दुकूलं सर्वदा शुचिः'' (आश्व.स्मृ.१।२८-३०)

इति कथनात्.

''रेतःस्पृष्टं शवस्पृष्टं स्पृष्टं मूत्रपुरीषयोः,
रजस्वलाभिः संस्पृष्टम् आविकं तु सदा शुचिः'' (आङ्गि.स्मृ.४५)

इति आविकस्य अङ्गिरसा कश्मलस्पर्शेपि अदुष्टत्वकथनाच्च तद्वेष्टितस्य कुतो दोषसंसर्गः? तस्माद् न अयम् आचारो दुष्टः इति निश्चयः. मूत्राद्युपघाते तु वस्त्रं दुष्यत्येव. तदाह अपरार्के यमः

''यदि मूत्रपुरीषाभ्यां रेतसा रुधिरेण वा,
चैलं समुपहन्येत अद्भिः प्रक्षालयेत्तु तत्,
यद्यम्भसा न शुद्ध्येत्तु वस्त्रं चोपहतं दृढम्,

छेदनं तस्य दाहो वा यन्मात्रमुपहन्यते'' ( )

इति. मद्याद्युपघातेऽपि एवम्. उच्छिष्टोपघाते तु क्षालनम् अर्थादेव सिद्धम्.

यानि तु

''सोषैरुदकगोमूत्रैः शुद्ध्यत्याविककौशिकम्,
सश्रीफलैः अंशुपट्टं सारिष्टैः कुतपं तथा,
सगौरसर्षपैः क्षौमम्'' (याज्ञ.स्मृ.१।१८६)

इत्यादीनि याज्ञवल्क्यवाक्यानि तानितु अधुना न आद्रियन्ते. किन्तु आविकादीनि वस्त्राणि तत्तन्निर्णेजकैः अवशोद्ध्यन्ते तदपि युक्तम्. एकादशस्कन्धे

''अमेध्यलिप्तं यद् येन गन्धलेपं व्यपोहति,
भजते प्रकृतिं तस्य तच्छौचं तावदिष्यते'' (भाग.पुरा.११।२१।१३)

इति भगवता फलतौल्यस्यैव आदरणात्. अतः तद्धावनोत्तरं प्रोक्षणादिकरणं सम्यगेव इति. किञ्च अङ्गिराः **''शौचं** [१२]**महार्घरोमाणां वाय्वग्न्यर्केन्दुरश्मिभिः''** (अङ्गि.स्मृ.) इत्यपि उक्तम्. एवमेव रज्ज्वादीनां वस्त्रवच्छुद्धिः. तथाह व्यासः

''वस्त्रं मृदम्भसा शुद्ध्येद् रज्जु वै दलमेव च,
रज्ज्वादिकं चातिदुष्टं त्याज्यं तन्मात्रमेव च'' (व्यासस्मृ.)

इति. या लोके 'निवार' इति उच्यते सापि रज्जुभेदएव तत्कार्यकरणाद् इति ज्ञेयम्.

१५. अथ पात्रादिशुद्धिविचारः.

तत्र याज्ञवल्क्यः

''सौवर्णराजताब्जानाम् ऊर्ध्वपात्रग्रहाश्मनाम्,
शाकं रज्जुः मूलफलं वासो विदलचर्मणाम्,
पात्राणां चमसानां च वारिणा शुद्धिरिष्यते'' (याज्ञ.स्मृ.१।१८२)

इति. सौवर्णं सुवर्णस्य विकारः, राजतं रजतस्य. अब्जं मुक्ताशङ्ख शुक्त्यादि. ऊर्ध्वपात्रं [१]महावीरादि–ग्रहादिसाहचर्यात्. ग्रहाः षोडशिप्रभृतयः. अश्म दृषदादि. शाकं वास्तुकादि. रज्जुः बल्वजादिनिर्मिता बन्धनोद्धरणादिसाधनभूता. मूलम् आर्द्रकादि. फलम् आम्रादि. वासो वस्त्रम्. विदलं वेण्वादि. चर्म अजादीनाम्. विदलचर्मणोः ग्रहणं तद्विकाराणां छत्रवरत्रादीनाम् उपलक्षणार्थम् इति विज्ञानेश्वरः. पात्राणि अन्यानि लौकिकान्यपि. चमसा होतृचमसादयः. एतेषां सौवर्णादीनां लेपरहितानाम्

उच्छिष्टस्पर्शमात्रे वारिणा प्रक्षालनेन शुद्धिः इति विज्ञानेश्वरः. तेन उच्छिष्टस्पर्शाभावे प्रक्षालनाभावः इति तदाशयः. इयं शुद्धिः लौकिक-वैदिकसाधारणी, मध्ये शाकादि-निवेशात्. तेन पाकाद्यर्थान्नादिसम्भाराभृतानां[पा.भे.२] पात्राणां शाकादीनां च पर्युषितत्व-निवृत्त्यर्थमपि इदं क्षालनविधानं कैमुतिकादपि आयातीति तत्तु मम प्रतिभाति. सम्भारभूतान्तु प्रोक्षणादेव शुद्धिः, धान्यादीनां प्रोक्षणस्य वक्ष्यमाणत्वाद् इति. सलेपानां शुद्ध्यन्तरम् आह ''**चरु-स्रुक्-स्रुवसस्नेह-पात्राण्युष्णेन वारिणा**'' इति. एतानि लेपसहितानि उष्णेन वारिणा शुद्ध्यन्ति इति विज्ञानेश्वरः. अनुच्छिष्टत्वेऽपि ईषल्लेपवताम् एषां शुद्धिः. प्रथमतएव चर्वादिलेपबोधनाय 'चरु'पदोपादानाद् लेपराहित्ये औष्ण्यस्य अप्रयोजनकत्वापत्तेश्च

''**निर्लेपं काञ्चनं भाण्डम् अद्भिरेव विशुद्ध्यति,**
अब्जमश्ममयं चैव राजतं चानुपस्कृतम्'' (मनु.स्मृ.५।११२)

इति मनुवाक्ये केवलानामेव उक्तत्वाद् इति तु मम प्रतिभाति. अपरार्केऽपि एवम्. उक्ते मनुवाक्ये 'अनुपस्कृतम्' इति अस्य अखातपूरितम् इति अर्थं विज्ञानेश्वरः आह. मेधातिथिस्तु अत्यन्तानुपहतम् इति अर्थम् आह. अपरार्कस्तु ताम्रादिना यद् न संसृष्टम् इति आह. मर्यादासिन्धौ तु ''**उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु**'' (पा.सू.६।१।१३९) इति पाणिनिना वैकृते सुटो अनुशासनात् चित्ररेखादिरूप-विकाररहितम् इति अर्थः उक्तः. इदमेव युक्तं रेखादिगर्तेषु लेपस्य केवलवारिणा अनपनयाद् इति. निर्णयामृतेऽपि एवम् उक्तम्. बहुलिप्तानां तु मनुः आह

''**तैजसानां मणीनां तु सर्वस्याश्ममयस्य च,**
भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः'' (मनु.स्मृ. ५।१११)

इति. तैजसानाम् इति धातुमात्रजन्यानाम्.

''**हेमं ताम्रं च रजतं कांस्यायस्त्रपुसीसकाः,**
एते च तैजसाः प्रोक्ता धातवस्तैजसोद्भवाः''

इति वाक्यात् तानि बोध्यानि. अत्र 'कांस्य'पदं पित्तलस्यापि उपलक्षकम्, ब्रह्माण्डे ''**कांस्यायस्ताम्ररीत्यानि**'' (बृह्मा.पुरा.)इति रैत्यानां धातुपात्रेषु उल्लेखात्. त्रपु तु व(ब?)ङ्गम्. जसतं तु तस्यैव भेदः सीसस्य वा इति बोध्यम्. मृद्भस्मनोः एककार्यत्वाद् विकल्पः. आपस्तु समुच्चीयन्ते इति विज्ञानेश्वरो मर्यादासिन्धुश्च.

ममतु अन्य प्रतिभाति. ब्रह्मवैवर्ते

''**नित्यं नूतनभाण्डेन कर्तव्यः पाक एव च,**
अथवा पक्षपर्यन्तं ततस्त्याज्यं मनीषिभिः,

स्थानं तु संस्कृतं कृत्वा पाकं निर्वर्त्य पूजकः'' (ब्र.वै.पुरा.   )

इति भगवता श्रीनन्दं प्रति वैष्णवब्राह्मणधर्मेषु प्रत्यहं पाकभाण्डत्यागकथनाद् मृण्मयव्यतिरिक्तानां भाण्डानां च प्रत्यहं हातुमश् अक्यत्वात् तेषां भाण्डानां वह्नि–ज्वालोत्थ–मषीनिवारणमेव नूतनीकरणं पक्षान्तरस्य उक्तत्वात् च इति तादृशशिष्टाचाराद् अगवम्यते. तन्मषीनिवृत्तिश्च भस्मना न भवति मृदा च भवतीति तत्र मृद्ग्रहणम्. कांस्यपात्रलेपस्तु भस्मना निवर्तते इति तत्र भस्मग्रहणम् इत्येवं विभागः इति. इयं च निर्लेपेषल्लिप्तातिलिप्तानां शुद्धिः उच्छिष्टस्पर्शेऽपि तुल्यैव इति सर्वेषां सम्मतम्. तत्र ऊर्ध्वाधोभेदेन उच्छिष्टद्वैविध्याद् ऊर्ध्वोच्छिष्टपुरुषस्पर्शे यथोक्ता शुद्धिः यदङ्गम् उच्छिष्टं तेन स्पर्शे मृदादिकम् आदेयम्. तथैव अधोच्छिष्टपुरुषहस्ते स्पर्शेऽपि तदङ्गस्पर्शेतु अमेध्यलिप्तस्य या शुद्धिः सा कार्या इति मम भाति. चार्मेषु विशेषो याज्ञिकदेवकृते स्मृतिसारे उक्तः

''गोमूत्रवारिणा शूर्पं धूपेन स्नेहकूपिकाः,
चर्मणा सद्यः शुद्धिः स्याद् गोमूत्रैर्गोरसर्षपैः''

इति. यत्तु पुनः अन्यद् उक्तम्

''त्र्यहं भस्म च मृद्वारि त्रिफला च दिनत्रयम्,
कषायाः सप्तरात्रं स्याद् एतच्चर्मविशोधनम्,
भस्मनः पलमेकं तु द्विगुणं मृद एव च,
कषायास्त्रिगुणाः प्रोक्ताः त्रिगुणा त्रिफला भवेत्,
आम्रो जम्बूस्तथा धात्री प्लक्षश्चैव चतुर्थकः,
अश्वत्थोदुम्बरवटाः कषायाः सप्त कीर्तिताः''

एतद् अल्पोपघातविषयम्.

१६. अथोच्छिष्टस्पृष्टपात्रशुद्धिविचारः.

तत्र शङ्ख आह

''ब्रह्मक्षत्रविशां चैव सकृत्सम्मार्जनात् शुचिः,
चतुर्थेन तु यद्भुक्तं चतुर्भिस्तत्र मार्जनम्,
अग्नौ प्रक्षिप्य गृह्णीयाद् हस्तौ प्रक्षाल्य यत्नतः,
गोशृंगेण तु संस्पृष्टं तत्पात्रं शुचितामियात्''

(शंख.स्मृ.१ आचाराध्याय।५ शुचिद्रव्याणि)

इति. इदं च कांस्यव्यतिरिक्ततैजसविषयम्, कांस्यस्य अधिकशुद्धेः अग्रे वक्ष्यमाणत्वात्. मर्यादासिन्धौ तु पात्रान्तरे शङ्खे न विशेषः उक्तः

''सिद्धार्थकानां कल्केन दन्तशृंगमयस्य च,

गोवालैः फलपात्राणाम् अस्थ्नां स्यात् शृंगवत् तथा''

(शंख.स्मृ.१६।१०)

इति. इदं च अल्पोपघाते. अधिकोपघातेतु शृंगाणां वायुपुराणे अवलेखन–विधानाद् इति उक्तम्. किञ्च, मनुस्तु

''अग्नेश्चापां च संयोगाद् हेमरूप्यं च निर्बभौ,

तस्मात् तयोश्च संयोगाद् निर्णेको गुणवत्तरः'' (मनुस्मृ.५।११३)

इति आह. अर्थस्तु, **''अग्निर्वै वरुणानीरकामयत''** इति अर्थवादे हेमरूप्ययोः जलाग्निसंयोगजन्यत्वोक्तेः तयोः स्वकारणेन शोधनम् अत्युत्तमम् इति. किञ्च,

''ताम्रा यः कांस्यरैत्यानां त्रपुणः सीसकस्य च,

शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः'' (मनुस्मृ.५।११४).

हारीतस्तु

''अद्भिः काञ्चनशङ्ख शुक्तीनां तद्गुणवर्जनं स्नेह–वैवर्ण्योपहतानां यवगोधूमकलायमाषमसूरमुद्गगोमयः चूर्णैः धावनम्. अम्ललवणाभ्यां ताम्राणाम्. भस्मना कांस्यानाम्. शाणतैलघर्षणैः कार्ष्णायसानाम्. सिकतावघर्षणैः शैलानाम्. शिलावघर्षणमार्जनैः मणिमयानाम्. निर्लेखनैः दारुमयानाम्. पुनः पाकेन मार्तिकानाम्. गोमूत्रगोमयबिल्वैः वैदलानां गोवालरज्ज्वा सोदकया फलपात्राणां कमण्डलूनां यतिपात्राणां च इति विबर्भाज''. (   )

अत्र तद्गुणवर्जनम् इति तद्गन्धाद्यपकर्षणम्. स्नेहवैवर्ण्योपहतानाम् इति उच्छिष्टादिस्नेहनविवर्णं यथा भवति तथा उपहतानाम्. यवादिचूर्णानि तु तुल्यार्थत्वाद् विकल्प्यन्ते. उदकं तु सर्वैः शोधनद्रव्यैः समुच्चीयते. शाणां लोहतैक्ष्ण्यसाधनम्. तच्च क्षुरछुरिकाद्यायुधशोधनाय नतु कटाहादिशोधनाय इति तदर्थं सिकताघर्षणं बोध्यम्. शिलावघर्षणमार्जनं स्वर्णकारादिभिः पाषाणविशेषे घर्षणेन उज्ज्वलीकरणम्. कांस्ये इतोऽपि विशेषम् आहुः पराशर–शातातपापस्तम्बाः

''गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च,

शुद्ध्यन्ति दशभिः क्षारैः श्वकाकोपहतानि च'' (परा.स्मृ.७।२४)

इति. **''दशकृत्वो मार्जनात् शुद्ध्यन्ति''** इति निर्णयामृतापरार्कौ. शङ्खस्तु तोऽपि विशेषम् आह

''सूतिकोच्छिष्टभाण्डस्य सुराद्युपहतस्य च,

त्रिःसप्तमार्जनात् शुद्धिः न तु कांस्यस्य तापनम्''(शंखस्मृ.१।५)

इति. कांस्यभिन्नानां तैजसानां सूतिकोच्छिष्टादिके स्वल्पोपघाते यवचूर्णादिभिः एकविंशतिवारं मार्जनादेव शुद्धिः. ''**नतु कांस्यस्य तापनम्**'' इत्यनेन अर्थात् कांस्यव्यतिरिक्तानां तापनं कार्यम् इति गम्यते इति अपरार्कः. निर्णयामृतेतु यवादीनां शोधकानां सप्तसङ्ख्याकत्वाद् एकैकेन त्रिवारं शोधनात् तैजसान्तरस्य शुद्धिः नतु कांस्यस्य, तस्य तु मार्जनतापनाच्च इति उक्तम्. तत्र अपरार्कोक्तमेव युक्तम्, स्मृत्यन्तरे सुरादिलेपे तापस्य उक्तत्वात्, तदपेक्षया उच्छिष्टस्य अल्पत्वाद् इति अपरार्क–निर्णयामृतयोः आदित्यपुराणे

''**सुवर्णरूप्यशङ्खाश्म–शुक्तिरत्नमयानि च,**
कांस्यायस्ताम्ररैत्यानि त्रपुसीसमयानि च,
निर्लेपानि विशुद्ध्यन्ति केवलेन जलेन तु,
शूद्रोच्छिष्टानि शोध्यानि त्रिधा क्षाराम्लवारिभिः''(आदि.पुरा.)

इति. अत्र क्षारादिद्रव्यत्रित्वात्रिधात्वम्. मार्जनं यथार्हं चतुष्कृत्वो दशकृत्वश्च वचनान्तरवशाद् इति उक्तम्. मर्यादासिन्धौ तु ब्रह्मपुराणे इति उक्त्वा क्षाराम्लवारिभिः इत्यन्तम् अभिधाय

''**सूतिकाशवविण्मूत्र–रजस्वलाहतानि च,**
प्रक्षेप्तव्यानि तान्यग्नौ यच्च यावत् सहेदपि'' (ब्रह्मपुरा.)

इति अधिकम् उक्तम्. यच्च यावद् इति प्रागुक्तक्षालनोत्तरं यत् पात्रं यावत्कालम् अग्निसंयोगं सहते यावताग्निप्रक्षेपेण न नश्यति तावत् कुर्याद् इति सर्वैरेव व्याख्यातं च. तेन अयं निष्कर्षः. त्रैवर्णकोच्छिष्टं निर्लेपं भाण्डं मार्तिकम् उच्छिष्टपुरुषस्पृष्टं प्रोक्षणेन शुद्ध्यति. सलेपन्तु अवचूडनात्. अवचूडनं नाम अग्निसंयोगः

''**अलेपं मृण्मयं भाण्डं भाण्डसञ्चयमेव च,**
प्रोक्षणादेव शुध्येत्तु सलेपं ह्यग्निचूडनात्'' (बृ.परा.स्मृ.८।३३४)

इति बृहत्पराशरवाक्यात्. उच्छिष्टकरादिस्पर्शे तु तस्य अवचूडनं दाहश्च यथायथं मृण्मयानां पात्राणाम् उच्छिष्टसमारब्धानाम् अवचूडनम् उच्छिष्टसलेपोपहतानां पुनर्दहनम् इति बौधायनवचनात्. पुनर्दहनं नाम पुनः पाकः. सच रूपरसगन्ध–स्पर्शपरावृत्तिफलको अग्निसंयोगः. दार्वादीनान्तु उच्छिष्टपुरुषस्पर्शे दोषाभावः प्रोक्षणं वा. सलेपानां तु तक्षणं उच्छिष्टसलेपपाण्यादिस्पृष्टानां च ''**तक्षणं दारुशृंगाणाम्**'' (याज्ञ.स्मृ. १।१८५) इति याज्ञवल्क्यवाक्यात्. तथैव वैदलानां व्यजनादीनां प्रक्षालनात्. गोमूत्रगोमयबिल्वैः घर्षणपूर्वकं जलप्रक्षालनाच्च. एवमेव चर्मणां चैलवद्वक्ष्यमाणरीत्या च पूर्वोक्तयाज्ञवल्क्यहारीतयोः वाक्यात्.

अत्र यद्यपि काचपात्राणां कागदपात्राणां च शुद्धिः कुत्रापि न विचारिता तथापि विष्णुधर्मोत्तरे द्वितीयकाण्डीयद्रव्यशुद्ध्यध्याये काचभाण्डशुद्धिः उक्ता **''शुद्धिश्च काचभाण्डानां केवलेन तदाम्भसा''** (वि.धर्मो.पुरा. ।) इति. कागदीयस्य तु तत्रापि न उक्ता. तत्र चीनीयानां केचन काचविशेषत्वं, केचन मार्तिकत्वं, केचन कपर्दजन्यत्वं लोकाः वदन्ति. तत्र कापर्दकत्वे अब्जत्वम्. तथा सति वारिणा शुद्धिः अल्पोपघाते. मध्यमात्यन्तोपघातयोस्तु त्यागएव. अस्थिजन्यत्वेन तक्षणशोध्यत्वात् तक्षणस्य च तत्र अशक्यत्वाद् इति. मार्तिकत्वे काचत्वे च वारिणा अवचूडनेन सहनार्हदाहेन च इति. परन्तु चीनीयानि पात्राणि शिष्टा न गृह्णते, तदुत्पत्तिप्रकारस्य कदर्यत्वाद् इति. तदुत्पत्तिप्रकारस्तु वैद्यग्रन्थे अर्कप्रकाशाख्ये रावणेन उक्तः

''अथ वक्ष्ये तु जीर्णास्थिमृत्तिकाकरणं प्रिये,
शिलाजतुस्थले कुर्याद् दीर्घं गर्तं मनोहरम्,
निक्षिपेत् तत्र तान् अस्थिसञ्चयान् द्विचतुष्पदाम्,
सर्जिक्षारं महाक्षारं मृत्क्षारं लवणानि च,
गन्धकोष्णजलं क्षेप्यं नानामूत्राणि तत्र च,
एवं कृत्वा मासषट्कं दद्यात्पाषाणमृत्तिकाम्,
कङ्कास्यूर्ध्वं तदूर्ध्वं तु कुर्याद् वह्निष्टिकां शुभाम्,
त्रिवर्षाज्जायते सर्वम् एकीभूतं दृषत्समम्,
ततो निष्कास्य तच्चूर्णं कृत्वा पात्राणि निर्ममेत्'' (अर्कप्रकाश)इति.

कागदीयानां तु यथायोग्यं प्रोक्षणक्षालनशोषणैः शाणत्वात्. मिताक्षरायां क्षौमवच्छाणशुद्धेः उक्तत्वाद् इति तु मम प्रतिभाति. अन्येषाम् अतैजसानामपि पूर्वोक्तयाज्ञवल्क्यहारीतादिवाक्येभ्यो ज्ञेया. निर्लेपं कांस्यभिन्नं तैजसं तु त्रैवर्णिकैः उच्छिष्टैः अनुच्छिष्टाङ्गेन स्पृष्टं न दुष्यति. उच्छिष्टहस्तादिस्पृष्टं तु सकृत् सम्मार्जनात्. त्रैवर्णिक-सूतिका-रजस्वलाभ्यां स्पर्शेन उपहतन्तु एकविंशतिकृत्वः सम्मार्जनात्. तदुच्छिष्टोपघाते तु सह्याग्नितापोत्तरं पूर्वोक्तरीत्या सम्मार्जनात्. एवमेव रजस्वलोपघातेऽपि. उच्छिष्टशूद्रस्पर्शे तु क्षालनात्. तदुच्छिष्टं तु चतुर्भिश्चतुष्कृत्वः सम्मार्जनसह्यदाहात् तदुत्तरं गोशृङ्गस्पर्शाच्च. गवाघ्रातेऽपि एवम्. कांस्यं तु त्रैवर्णिकस्पृष्टं क्षालनात्. उच्छिष्टाङ्गस्पृष्टं तु सकृत् सम्मार्जनात्. शूद्रोच्छिष्टं क्षारैः दशकृत्वो मार्जनाद् अवचूडनाच्च. ''यावत् सहेद्''इति वाक्यात्. गवाघ्रातेऽपि एवम्. शूद्रीसूतिकयोस्तु उच्छिष्टं कांस्यं त्याज्यं. तथा अङ्गिरास्तु

''गण्डूषं पादशौचं च यः कुर्यात् कांस्यभाजने,

षण्मासं भुवि निःक्षिप्य पुनराकारमादिशेत्'' [उद्ध.२६](अङ्गि.स्मृ.४१)

इति आह. अत्र 'कांस्य'पदं पित्तलस्यापि उपलक्षकम् इति भाति.

१७. अथामेध्यस्पृष्टशुद्धिविचारः.

तत्र अमेध्यं देवलेन उक्तम्

''मानुषास्थि शवं विष्ठा रेतो मूत्रार्तवं वसा,

मेदोऽश्रु दूषिका श्लेष्मा मद्यं चामेध्यमुच्यते'' (देव.स्मृ.१।९।२८)

इति. अत्र शवादिकं पश्वादीनां मूषकपल्लीपर्यन्तानां बोध्यम्. ततः स्वल्पानां कीटेषु पातात्. विष्ठामूत्रे मार्जारपर्यन्तानां बोध्ये. आखुपुरीषस्य अन्ने पतितस्य दर्शने तावद्ग्रासमात्रोद्धरणकथनेन अतिदूषकत्वाभावाद् इति. मद्यं तु द्वादशविधमपि. तच्च पुलस्त्येन उक्तम्

''पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम्,

मधूत्थं सैरमारिष्टं मैरेयं नारिकेलजम्,

समानानि विजानीयात् मद्यान्येकादशैव तु,

द्वादशं तु सुरा मद्यं सर्वेषामधमं स्मृतम्'' (पुल.)

इति. तत्र तैजसानां मूत्राद्युपघाते शुद्धिः अपरार्कनिर्णयामृते च बौधायनेन उक्ता. तैजसानां मूत्रपुरीषशुक्रासृक्कुणपमद्यैः अत्यन्तवासितानाम् आवर्तनम्. अल्पसंसर्गे तु परिलेखनम्. स्पर्शमात्रोपघाते तु त्रिःसप्तकृत्वो भस्मना परिमार्जनम्. अतैजसानाम् एवंभूतानाम् उत्सर्गः इति. आवर्तनम् अग्निसंयोगेन द्रवीकरणम्. परिलेखनं शस्त्रेण अभितो अवयवनिस्तक्षणम्. परिमार्जने तु हारीतोक्तो विशेषोऽपि द्रष्टव्यः. शातातपस्तु

''सुवर्णं रजतं ताम्रं त्रपु कृष्णायसं तथा,

रीतिकासीसलोहानि शुद्ध्यन्त्यश्मप्रघर्षणात्''

इति आह. तथा स्मृत्यन्तरे

''भस्मना शुद्ध्यते कांस्यं सुरया यन्न लिप्यते,

सुरामूत्रपुरीषैस्तु शुद्ध्यते तापलेखनैः'' (आप.स्मृ.८ । १)

''ताम्रमम्लेन शुद्ध्येत्तु न चेद् आमिषलेपितम्,

आमिषेण तु यल्लिप्तं पुनर्दाहेन शुद्ध्यति''. (बौधा.स्मृ.)

एवं बौधायनवद् विष्णुरपि आह

''विण्मूत्ररेतःशवरक्तलिप्तमावर्तनोल्लेखनतापनैर्वा,

त्रिःसप्तकृत्वः परिमार्जनाद् वा भस्मादिना शुद्धियति तैजसं हि''

(विष्णु.स्मृ.)

इति. तैजसानां रेतोविण्मूत्रासृक्कुणपादिभिः चण्डालसूतिकोदक्यापतितादिभिः चिरम् उपहतानाम् आवर्तनम्. तदल्पकालोपहतानां परिलेखनम्. ततोऽपि अल्पकालो– पहतानां प्रतापनम्. स्पर्शमात्रोपहतानाम् एकविंशतिकृत्वो भस्मादिभिः मार्जनम्. ''प्रतिमार्जनं क्षालनम्'' इति अपरार्के व्याख्यातम्. निर्णयामृते तु तैजसानां मूत्राद्युपघाते पुनः करणम्. गोमूत्रे वा सप्तरात्रं परिवासनम् इति बौधायनवचनम् उपन्यस्य लेपनिर्हरणाशक्तौ पुनःकरणम्. अन्यथा गोमूत्रवास इति व्यवस्थापितम्. तदपि युक्तम्. एवं च बिडालपल्लीप्रभृतिमूत्रादिस्पर्शे अत्यन्तोपघातादौ च अनयैव दिशोद्भाव्य शुद्धिः बोध्या. तथा झिल्लीप्रभृतिक्षुद्रजीवस्य शाकादौ पतितस्य रन्धनोत्तरं ज्ञाने पाचनस्थाल्यां तदवयवानां भूयो लेपात् तापनं पल्लीमूषकादेः एवम्भावे उल्लेखनम्. एवमेव शफरीजलौक:प्रभृतिकुणपसंसर्गेऽपि उन्नेयम्. तथैव च स्पृष्टपात्रस्यापि भोजनपात्रे तस्य अल्पस्पर्शाद् भस्मादिना मार्जनं साक्षात् स्पर्शे च अधिकमार्जनम् इति उन्नेयम्. किञ्च,

''ताम्रपात्रेतु यद्गव्यं कांस्यपात्रे च यन्मधु,
आर्द्रकं गुडसंयुक्तं सद्यो मद्यं घृतं विनेत्''

इत्यादिस्मृत्यन्तरवाक्योक्तानाम् अल्पाशुचीनां स्पर्शेऽपि मार्जनादेव शुद्धिः न त्वन्या. अतएव सदाचारचन्द्रोदये षट्त्रिंशन्मते

''होमकार्ये तथा दोहे पाके च परिवेषणे,
स्नानतर्पणदानेषु ताम्रे गव्यं न दुष्यति''

इति उक्तम्. तथैव दीपस्पृष्टमात्रेऽपि ज्ञेयम्. किञ्च, गवाघ्रातादीनां दशभिः मार्जनैः पराशरादिवाक्ये शुद्धिः उक्ता. शङ्खे न तु कृष्णशकुनिमुखावसृष्टं निर्लिखेत्. **''श्वापदमुखावसृष्टं पात्रं न प्रयुञ्जीत''** (शङ्खस्मृ.)इति उक्तम्. तत्रापि शङ्ख वाक्ये मुखपदाद् एषा शुद्धिः अङ्गान्तरस्पर्शे पूर्ववाक्योक्ता इति बोध्यम्. श्वापदश्च मार्जारभिन्नो बोध्यः, **''मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः''** ( )इति वाक्याद् इति विज्ञानेश्वरः. एतदेव युक्तम्. पात्रसंघादौ तु स्पृष्टस्यैव अशुचित्वं न इतरस्य. तदुक्तम् अपरार्के हारीतेन

''संहतानां तु पात्राणां यद्येकम् उपहन्यते,
तस्यैव शोधनं कार्यं न तु तत्स्पृष्टिनामपि''

इति. शङ्खोऽपि

''मलं संयोगजं स्वं वा [१]यस्य येनोपहन्यते,
तस्य तच्छोधनं प्रोक्तं सामान्यं द्रव्यशुद्धिकृत्'' (शंखस्मृ.१ ।५ ।१)

इति. अयं शोधनप्रकारः पूर्वोपन्यस्तहारीतोक्तविभागानुसारेण ज्ञेयः. येषां

वाचनिकी शुद्धिः न दृश्यते तादृशान्तु शुद्धिं मर्यादसिन्धौ शातातप आह

''अशुचिं संस्पृशेद् यस्तु एकएव स दुष्यति,

तं स्पृष्ट्वाऽन्यो न दुष्येत्तु सर्वद्रव्येष्वयं विधिः'' (शाता.स्मृ.)

इति. तेन इंधनादौ चीवरादिसंसर्गे तत्सम्बन्धिस्वरूपं विचार्य अशुद्धिः कल्पनीया. बिडालपुरीषादिसंसर्गे तु तस्य अमेध्यत्वात् तत्स्पृष्टस्पर्शिनामपि अशुचित्वम् तथा आचाराद् इति बोध्यम्. बौधायनस्तु, दारुमयानां पात्राणाम् उच्छिष्टसमारब्धानाम् अवलेखनम्. उच्छिष्टलेपोपहतानामेव तक्षणं मूत्रपुरीषरेतःप्रभृतिभिः उत्सर्गः इति आह. अत्र अवलेखनं [२]वस्त्रादिना घर्षणम्. तक्षणस्य पृथगुक्तत्वाद् इति. मर्यादासिन्धौ तु शवचण्डालपुरीषैरपि अल्पोपघातेऽपि घर्षणम् इति उक्तम्. केचित्तु पुरीषसंसर्गे गन्धलेपापनयनक्षम–तक्षणम्. शवादिस्पर्शे मृद्वारिभ्यां क्षालनं, श्वादिस्पर्शे बृसीपीठादीनां क्षालनमेव इति आहुः. तदापि पाकोपयोगिनां तु त्यागएव इति प्रतिभाति. शृंगदन्तास्थि–मयानामपि एवम्. मणिमयादीनां मूत्राद्युपघाते विष्णुः आह **''मणिमयम् अश्ममयम् अब्जं सप्तरात्रं महीनिखननेन''** (विष्णुस्मृ.)इति. उच्छिष्टाद्युपघाते तु कश्यपः. सिकताभिदन्तशृङ्गशंखशुक्तिमणीनाम् इति आह अपरार्के. वैदलानां [३]वेणुवेत्र–नडनिचुलादिमयानामपि दारववदेव शुद्धिः. तत्रापि वेणुवेत्रादेः वस्त्राधानी चेत् तदा प्रयोजनविचारेण गन्धलेपक्षयाधायकक्षालनादिनैव शुद्धिः. पक्कान्नादिस्थापनपात्रं चेत् तदा त्यागएव इत्यादि ऊह्यम्. मृण्मयानां तु पुनः पाकेन शुद्धिः उक्ता. सा च श्वादिस्पर्शदोषएव नतु दोषान्तरे. तदुक्तं मनुना

''मद्यैर्मूत्रपुरीषैर्वा श्लेष्मपूयाश्रुशोणितैः

संसृष्टं नैव शुद्ध्येत्तु पुनः पाकान् महीमयम्'' (मनुस्मृ.५ । १२३)

इति. मर्यादासिन्धौ तु ष्ठीवनैः पूयशोणितैः इति पाठः उभयथापि मलान्तरोपलक्षकत्वं निर्वाह्यं चण्डालादिस्पर्शे तु त्यागः.

''चण्डालैरुपसंस्पृष्टं धान्यं वस्त्रमथापि वा,

प्रक्षालनेन शुद्ध्येत्तु परित्यागे महीमयम्''

इति अपरार्के स्मृत्यन्तरात्. फलापात्राणां शुद्धिस्तु उक्तैव. कश्मलसंसर्गे तु त्यागएव. किञ्च अपरार्के ब्राह्मे मृदम्बुभिः इति प्रकृत्य

''रज्जुवल्कलपात्राणां चमसालाबुचर्मणाम्,

कृत्वा शौचं ततः शुद्धिः गोवालैर्घर्षणं पुनः'' (ब्रह्म.पुरा.) इति.

चर्मणां तु सामान्यतः कश्यप आह. तृणकाष्ठरज्जु–भूर्जशणक्षौमजतुचर्म–वेणुविदलफलपत्र–वल्कलादीनां चैलवत् शौचम्. मृद्दारुचर्मणाम् अत्यन्तोपहतानां

त्यागः. असंस्कृतायां भूमौ न्यस्तानां प्रक्षालनम्. परोक्षाहृतानाम् अभ्युक्षणम्. एवं क्षुद्रसमिधाम् असंस्कृतामेध्याद्युपहतानाम् एकपुरुषोद्धार्याणाम् इति. काच्छपवलयानां शुद्धिः चर्मशुद्ध्यैव व्याख्याता ज्ञेया. एवम् अन्येषामपि.

१८. अथ शय्यादिशुद्धिविचारः

तत्र बौधायनः.

''आसनं शयनं यानं नावः पन्थास्तृणानि च,
मारुतार्केणशुद्ध्यन्ति पक्वेष्टकचितानि च,
आत्मशय्यासनं यानं जायापत्यं कमण्डलुः,
शुचीन्यात्मन एतानि परेषामशुचीनि तु'' (बौधा.स्मृ.१।५।६२,६१).

हारीतः.

''यानशयनान्यपरिहार्याण्येके मन्यन्ते. तद् न, वर्णविशेषात् शुचिमलिनसंसर्गदर्शनात् पापसंसर्गयोगश्च.तस्मात् पृथक् शौचाः श्रेयांस'' (हारि.स्मृ.)

इति. अत्र 'मन्यन्ते' इत्यन्तं पूर्वपक्षम् उक्त्वा 'तद् न' इत्यादिना सिद्धान्तितम्. अर्थस्तु, धर्मशास्त्रे वर्णानाम् उत्तराधरभावेन विशेषदर्शनात्. किञ्च, पातकोपपातक–कृद्भिः मलिनैः तद्रहितानां शुक्लानां तुल्यशय्यादियोगेन संसर्गस्य प्रायश्चित्तनिमित्ततया अभिधानत्. अकृतैनसोऽपि मलिनसंसर्गे व्याधितसंसर्गे नीरोगस्येव पापोत्पत्तिदर्शनाच्च पृथक्शुद्ध्यादिवशेन पृथक्शौचत्वमेव श्रेयः इति. तर्हि स्वीयालाभे किं कार्यम्? इति आकांक्षायां पुनः हारीतः **''स्वानुपपत्तौ शुच्यन्तर्धाय समामनन्ति संस्पर्शे सचैलं स्नानमेवं हि आह''** (हारि.स्मृ.)इति. अर्थस्तु, स्वकीयशय्याद्यलाभे कम्बलादिना शुद्धेन तदन्तर्धाय उपयोक्तव्यम्. यतः पतितादेः शय्यादिसंस्पर्शे सचैलस्नानम् इति चैलाधिकारः इति अपरार्के व्याख्यातम्. एतेनैव आसनतूलिकादिकमपि व्याख्यातं ज्ञेयम्. किञ्च,

''शयनासनयानानि द्रव्यं च बहुसंहतम्,
चण्डालादिभिरप्येतत् स्पृष्टं सम्प्रोक्षणात् शुचिः''

इति तत्रैव स्मृत्यन्तरवाक्यम्. किञ्च, तूलिकादीनाम् उच्छिष्टादिस्पर्शे तु सर्वनिबन्धेषु देवलः

''तूलिकाम् उपधानं च पुष्परक्ताम्बरं तथा,
संशोष्यानातपे किञ्चित् करैः सम्मार्जयेत् पुनः,
पश्चाच्च वारिणाऽभ्युक्ष्य विनियुञ्जीत कर्मणि,

तान्यप्यतिमलिष्ठानि यथावत् परिशोधयेत्'' इति.

(देव.स्मृ.९।तैजसादिद्रव्यशुद्धिः)

बृहत्पराशरस्तु

''सवस्त्रोपस्करैः युक्ता शय्या रक्तांशुकानि च,

पुष्पाणि चैव शुद्ध्यन्ति प्रोक्षितानि न संशयः'' (बृ.परा.स्मृ.)

इति आह.

१९. अथ धान्यादिशुद्धि विचारः.

तत्र मनुः

''अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम्,

प्रक्षालनेन त्वल्पानाम् अद्भिः शौचं विधीयते'' (मनुस्मृ.५ । ११८)

याज्ञवल्क्योऽपि

''प्रोक्षणं संहतानां च बहूनां धान्यवाससाम्'' (याज्ञ.स्मृ.१।१८४)

इति. अत्र बहुत्वं धान्यानां न स्वरूपकृतम् किन्तु बहुत्वेन अनेकपुरुषोद्धार्यत्वं लक्ष्यते इति अपरार्कः. युक्तं च एतत्. अन्यथा कणत्रयेण मुष्टिमात्रेण वा बहुत्वापत्तेः विशेषणवैयर्थ्यं स्याद् इति. सएव सम्मतिमपि आह बौधायनस्य. संहतानां काष्ठादीनां प्रक्षाल्यावशोषणं चण्डालादिस्पर्शे पुरुषवाह्याद् अर्वाक्. ऊर्ध्वन्तु अनेकपुरुषोद्धार्ये दारुशिले भूमिसमे इति.

लौगाक्षिश्च

''चाण्डालादिपरामृष्टं प्रोक्षणाद् बहु शुद्ध्यति

अल्पं प्रक्षालयेद्धान्यं तण्डुलं तु परित्यजेत्'' (लौगा.स्मृ.)

इति. तण्डुलम् इति वितुषं धान्यमात्रम्. त्यागस्तु अल्पविषयः शुद्ध्यन्तरस्य वक्ष्यमाणत्वात्. तद् आह बौधायनः

''व्रीहयः प्रोक्षणाद् अद्भिः शाकमूलफलानि च

तन्मात्रस्यापहाराद् वा निस्तुषीकरणेन वा'' (बौधा.स्मृ.)

इति. चण्डालादिस्पर्शे अनेकपुरुषोद्धार्याणां व्रीहीणां प्रोक्षणं मूत्रादिसंसर्गे तन्मात्रम् अपहारः. अशुचिपांस्वादिद्रव्यसंयोगे निस्तुषीकरणम् इति अर्थः.

कश्यपस्तु

''प्रोक्षणपर्यग्निकरणावगाहनैः व्रीहियवगोधूमानां विमर्शन–

प्रोक्षणैः फलीकृतानां निघर्षणदलनप्रोक्षणैः शमीधान्यानाम्''

(कश्य.स्मृ.)

इति आह. अर्थस्तु, अनेकपुरुषोद्धार्याणां व्रीह्यादीनां त्रयाणां यथाक्रमं प्रोक्षणादिभिः शुद्धिः. पर्यग्निकरणन्तु उल्मुकस्य सर्वतो भ्रामणम्. अवगाहनं क्षालनम्. फलीकृतानां व्रीह्यादितण्डुलानाम् अल्पत्वे विमर्शनेन शुद्धिः अनेकपुरुषोद्धार्यत्वे प्रोक्षणेन. खण्डनेन उज्ज्वलीकरणम्. कराभ्यां घर्षणं विमर्शनम्. शमीधान्यानां कोशीधान्यानां मुद्गादीनां एकपुरुषोद्धार्याणां निघर्षणेन ततो अल्पानां दलनेन अनेकपुरुषोद्धार्याणां तु प्रोक्षणेन इति. अत्र 'निघर्षण'पदेन पूर्वोक्तं विमर्शनमेव उच्यते. अल्पत्वे तु त्यागः इति उक्तम्. आदित्यपुराणे तु

''गृहदाहे समुत्पन्ने विपन्ने पशुमानुषे,
अभोज्यस्तद्गतो व्रीहिः धातुद्रव्यस्य सङ्ग्रहः,
मृण्मयेनावरुद्धानाम् अधो भुवि च तिष्ठताम्,
यवमाषतिलादीनाम् अदोषं मनुरब्रवीत्,
ततः संक्रममाणेऽग्नौ स्थाने स्थाने च दह्यते,
न च प्राणिवधो यत्र केवलं गृहदीपनम्,
तत्र द्रव्याणि सर्वाणि गृह्णीयाद् अविचारयन्'' (आदि.पुरा.)

इति उक्तम्. तदेतद् अपरार्कस्थं प्रमेयम्.

मिताक्षरायां तु विज्ञानेश्वरः. बहुत्वं स्पृष्टापेक्षया यदा धान्यानि वस्त्रादीनि वा राशीकृतानि तत्र चाण्डालादिस्पृष्टानि अल्पानि बहूनि अस्पृष्टानि. तत्र स्पृष्टानां वाससां क्षालनात्. अस्पृष्टानां प्रोक्षणात्. धान्यानां तावन्मात्रोद्धरणोत्तरं प्रोक्षणात्. स्पृष्टानां बहुत्वे तु धान्यवाससां क्षालनादेव. समत्वे तु प्रोक्षणादेव. इयत् स्पृष्टम् इयद् अस्पृष्टम् इति अविवेके तु क्षालनादेव. अनेकपुरुषोद्धार्यत्वे स्पृष्टानामपि प्रोक्षणादेव इति आह. एतेनैव परम्परास्पर्शोऽपि व्याख्यातप्रायएव. मर्यादसिन्धौ तु द्रोणाधिकानां बहुत्वम् उक्त्वा देशं कालम् इति बौधायनवाक्यात्. देशकालद्यपेक्षया बहुत्वं केचिद् आहुः. यथा दुर्गतस्य दुर्भिक्षे कुड्वपरिमितमपि इति उक्तम्. इदमेव च युक्तम्, पूर्वोक्तैकादशस्थ-भगवद्वाक्यात्. एवं वाससामपि बहुत्वम् अनेकपुरुषोद्धार्यत्वेन त्रिभ्योऽधिकत्वेन च पूर्वोक्तरीत्या उन्नेयम्. नागदेवीये तु सङ्ग्रहकारः.

''सुश्वेतान्यथ चित्राणि कौसुम्भानि यथाक्रमम्,
विंशत्येकादशत्रीणि बहूनीति स्मृतान्यथ''

इति आह. संहतत्वं तु उक्तशुद्धिद्रव्यारब्धावयवित्वम् इति विज्ञानेश्वरः. मर्यादासिन्धौ तु संहतत्वं नाम अनेकेषां शय्यादीनां स्यूतत्वं यद्वा संहतत्वं कठिनत्वम्. तेन शीतघृतगुडामिक्षादिकं संहतम्. यद्वा

''शयनासनयानानि रोमबद्धानि यानि तु,
वस्त्राण्येतानि सर्वाणि संहतानि प्रचक्षते''

उद्ध.२७(देव.स्मृ.९।तैजसदिशुद्धिः)

इति अङ्गिरोभिहितानि संहतानि इति उक्तम्. रोमबद्धानि कम्बलादीनि इति च तत्र उक्तम्. पूर्वोक्तभगवद्वाक्योक्तरीत्या तस्य-तस्य तथा युक्तत्वात् सर्वम् एतद् उपपन्नम्. जलव्यतिरिक्तानां द्रवाणां तु प्लावनात् शुद्धिः. **''प्लावो द्रवस्यतु''** इति याज्ञवल्क्यवाक्यात्. तत्र प्लावो नाम समानजातीयेन द्रव्येण भाण्डस्य अपूरणं यावता निःसरति इति विज्ञानेश्वरः. पात्रस्थे घृतादौ तावत्समानजातीयम् अन्यदासिच्यते यावत्पूर्णे पात्रे किञ्चिन्मात्रं बहिर्निःसरति इति अर्थः. अमेध्यसंस्पृष्टद्रव्यस्पृष्टस्यापि एषैव शुद्धिः इत्यपि सएव आह. एतदेव उत्पवनम् इति आहुः **''द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतम्''** (मनुस्मृ.५।११५) इति मनुवाक्यात्. उत्पवनं च अत्र वस्त्रान्तरिते पात्रे प्रक्षेपः. अन्यथा कीटाद्यपनयनस्य असम्भवाद् इति विज्ञानेश्वरः. इदं च केशकीटमक्षिकान्वित इति बोद्धव्यम्. कुलूकभट्टीये तु प्रादेशपरिमाणकुशपत्रद्वयाग्राभ्यां ''पवमानः सुवर्जन'' इत्याद्यनुवाकेन उत्पवनं स्पृष्टस्य अंशस्य अपनयनं वा उत्पवनम् इति उक्तम्. एतच्च प्रस्थपरिमाणे. अल्पस्यतु त्यागएव. एतच्च श्वकाकाद्युपघाते. वर्णापसदभाण्डस्पर्शे तु भाण्डान्तरे तदासिच्य यावता तद्बहिः निःसरति तादृशप्लावं विधाय शेषम् उत्सृजन्ति शिष्टाः. मधूदके पयः तद्विकाराश्च पात्रात् पात्रान्तरनयने शुद्धा इति बौधायनस्मरणात्. शूद्रभाण्डस्थितानामपि एषैव शुद्धिः. वर्णापसदहस्तात् प्राप्तानां तु पात्रात् पात्रान्तरनयनं पुनः पवनं च कार्यम्. अभ्यवहार्याणां घृतेन अभिधारितानां पुनः पवनम् एवं स्नेहानां स्नेहवद्रसानाम् इति शंखस्मरणात्. शाकादीनां तु दूषितत्यागे शेषस्य आप्लावनात् शुद्धिः. तदुक्तं मर्यादसिन्धौ ब्राह्मे

''सस्यानि व्रीहयश्चैव शाकमूलफलानि च,
त्यक्त्वाथ दूषितं भागं प्लाव्यान्यन्यजलेन च''(ब्राह्म.पुरा.   ) इति.

म्लेच्छादिभाण्डस्थितौ तु बृहत्पराशरः

''आममांसं घृतं क्षौद्रं स्नेहश्च फलसम्भवाः,
म्लेच्छभाण्डस्थिता ह्येते निष्क्रान्ताः शुचयः स्मृताः'' इति.

(बृ.परा.स्मृ.८।३३०)

तथा

''आभीरभाण्डसंस्थानि पयोदधिघृतानि च,
तावत्पूतं हि तद्भाण्डं यावत् तत्र नितिष्ठति,
पूतानि सर्वपण्यानि कारुहस्तस्थितानि च'' (बृ.परा.स्मृ.८।३३०)

इति. अत्र म्लेच्छभाण्डस्थितानां चतुर्णां शुद्धिम् उक्त्वा अग्रिमवाक्ये पयोदध्नोः आभीरभाण्डस्थयोरेव शुद्धिकथनात् म्लेच्छजातीयाभीरभाण्डस्थयोः पयोदध्नोः अग्राह्यत्वं बोधितम्. उचितं च एतत्, ''**न नीचो यवनात् परः**'' इति वाक्यात्. सर्वपण्यानां पूतत्वकथनेन शाकफलादीनां ततोऽपि ग्राह्यत्वं च बोध्यते. आम्रादिफलानां बहुदिनैः भोगाय ततो गृहीत्वा सञ्चेष्यमाणानामपि प्रोक्षणमात्रेण शुद्धिः क्षालयित्वा स्थापने पूयीभावात्. इदं च शुद्धिकल्पनम् उपपत्तिप्रयोजनयोः बलात् ज्ञातव्यम्. कारुहस्तस्थितानि इत्यनेन रजकतन्तुवायादिसंसर्गकृताया अशुद्धेः अपवादः. तेन अवरजातीयानामपि कारुणां शिल्पिक्रियया द्रव्यम् उत्पादयतां संस्कुर्वतां वा प्रसक्तं प्रत्यवायहेतुत्वं निवार्यते. तथा सति रजकसेकादिभिः संस्कृतानां वस्त्रादीनां [१]कुविन्दशूर्पकारादिभिश्च उत्पाद्यमानानां द्रव्याणां शुचित्वमेव इति वाक्यतात्पर्यम्. ततश्च येन अन्नादिद्रव्येण शिल्पिस्पृष्टेन विना द्रव्योत्पत्तिसंस्कारौ न भगवतः तदपि शुद्धत्येव. यथा वस्त्रोत्पत्तौ खलिः. अतएव शंखः ''**कारुहस्तः शुचिः तथा आकरव्याणि प्रोक्षितानि**'' [उद्ध.२८](शंखस्मृ.१।५।प्रोक्षणेन शुद्धिः) इति. आकरो द्रव्योत्पत्तिस्थानं तद्द्रव्याणि च आकरद्रव्याणि. पैठीनसिः विशेषम् आह ''**आकराः शुचयः सर्वे वर्जयित्वा सुराकरम्**'' (बौधा.स्मृ.१।५।५८) इति एतद् अपरार्कमतम्. विज्ञानेश्वरस्तु कारूणां सूतकादिसम्भवेऽपि तत्साध्ये कर्मणि तद्धहस्तस्य शुचित्वम्. तथाच स्मृत्यन्तरम्

''**कारवः शिल्पिनो वैद्या दासीदासास्तथैव च,**
राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः''

इति आह उभयमपि इदं युक्तम्.

२०. अथ सिद्धान्नशुद्धिविचारः.

तत्र अपरार्के सदाचारचन्द्रोदये च यमः

''**मक्षिकाकीटमन्ने तु पतितं यदि दृश्यते,**
मूषकस्य पुरीषं वा क्षुतं यच्चावधूनितम्,
भस्मना स्पृष्टमशनीयाद् अभ्युक्ष्य सलिलेन वा''. (यमस्मृ.   )

तथा

''**अवक्षुतं केशपतङ्गकीटैरुदक्यया वा पतितैश्च दृष्टम्,**
अलातभस्माम्बुहिरण्यतोयैः संस्पृष्टमन्नं मनुराह भोज्यम्'' (   )

इति. अत्र अवधूनितं नाम यदुपरि वस्त्रावधूननं कृतम्. अवक्षुतं नाम यदुपरि क्षवथुः कृतः. अत्र 'मक्षिका'पदेन नीलमक्षिका उच्यते. बौधायनेन हविर्दोषेषु नीलमक्षिका

शातिकामत्कुणाश्चैलशिरसोर्यूतिका इति अभिधानाद् इति अपरार्कः. अतएव सदाचार–चन्द्रोदये वाक्यान्तरे मक्षिकादीनाम् अदुष्टत्वम् उक्तम्

''मक्षिकादंशमशका घुणाः सूक्ष्माः पिपीलिकाः,
आमिषामेध्यसौरी च नैते कीटा विपत्तयः''

इति उक्तम्. आमिषामेध्यसौरीशटितमांसोद्भवः कीटः. विपत्तयः इति दोषाय न भवेयुः इति व्याख्यातं च. पूर्वस्मिन् वाक्ये कीटो अमेध्यसर्पी इति अपरार्कः. बौधायनश्च केशकीटनखरोमाखुपुरीषाणि अन्ने दृष्ट्वा तन्मात्रम् अन्नं परित्यज्य अद्भिः सम्प्रोक्ष्य भस्मना संस्पृश्य प्रशस्तवचसा तु गृह्णीयात्. **''भूर्भुवः सुवः''** इति उपरिष्टाद् ध्यात्वा पुनरेव भुञ्जीत इति आह. सदाचारचन्द्रोदये तु त्वक्केशेति पाठयुक्तम् ईदृगेव याज्ञवल्क्य–वाक्यम्.

यत्तु गौतमः **''नित्यमभोजं केशकीटावसन्नम्''** (गौत्त.स्मृ.१७) इति आह तत् केशादियुक्त–पाकविषयम् इति निर्णयामृते मिताक्षरायां च. इदमेव युक्तम्. अन्यथा वाक्यान्तरविरोधापत्तेः इति. गोघ्रातेऽपि अन्ने पूर्वोक्तैव व्यवस्था

''गोघ्रातेऽन्ने तथा केश–मक्षिकाकीटदूषिते,
सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये'' (याज्ञ.स्मृ.१।१८९)

इति मार्कण्डेयपुराणाद् याज्ञवल्क्योक्तेश्च. श्वकाकाद्युपघाते तु पराशरः

''शृतं द्रोणाधिकं चान्नं श्वकाकैरुपघातितम्,
अत्याज्यं तस्य शुद्ध्यर्थं ब्राह्मणेभ्यो निवेदयेत्,
कर्तव्यं वचनं तेषाम् अन्नसंस्कारकर्मणि,
श्वकाकाद्यवलीढं तु त्यक्त्वा लालासमन्वितम्,
गायत्र्यष्टसहस्रेण मन्त्रपूतेन वारिणा,
भोज्यं तत्प्रोक्षितं विप्रैः पर्यग्निकृतमेव च''(परा.स्मृ.) इति.

जमदग्निश्च

''शृतान्नं द्रोणमात्रं स्यात् स्वकाकादिप्यघातितं,
केशकीटावशन्नं च तदप्येवं विशुद्ध्यति,
क्रीतस्यापि विनिर्दिष्टम् एवमेव मनीषिभिः,
न द्विःपक्वं पर्युषितं शुक्ताद्येवं कदाचन'' (जम.स्मृ.)

इति. द्रोणः षट्पञ्चाशदधिकं पलशतद्वयम्. अष्टसहस्रेण इति अष्टाधिक–सहस्रेण. केशकीटावसन्नं तु केशकीटकसहपक्वं बोध्यम्. तेन बहुपाके गौतमोक्ता अभोज्यता निवार्यते. अपरार्क–मर्यादसिन्धु–हेमाद्रिषु यम–मनू

''देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च,

काकैः श्वभिश्च यत् स्पृष्टं तदन्नं न विवर्जयेत्,
तन्मात्रम् अन्नम् उद्धृत्य शेषं संस्कारमर्हति,
घनानां प्रोक्षणाच्छुद्धिः द्रवाणामपि तापनात्,
संस्पर्शनाद् भवेत् शुद्धिः अपामग्नेः घृतस्य च,
च्छागेन मुखसंस्पृष्टं शुचि त्वेवं विनिर्दिशेत्'' उद्ध.२८(वशि.स्मृ.१८)

इति. ''**देवद्रोणी देवयात्रा**'' इति अपरार्कः. देवतानैवेद्यार्थं यत्र बह्वन्नं पच्यते सा देवद्रोणीति मर्यादसिन्धुः. एतच्च बह्वन्नप्रदर्शनार्थम्. प्रकृतेषु इति उत्सवेषु इत्यपि सएव (मर्यादसिन्धुः) व्याचख्यौ.

२१. [1]अथ घृतपायसादीनां शुद्धिविचारः.

शातातपः

''घृतं च पायसं क्षीरं तथैवेक्षुरसो गुडः,
शूद्रभाण्डस्थितं तक्रं तथा मधु न दुष्यति''

(शंखस्मृ.१।५।अशुद्ध्यपवादः)

इति. पायसं पयोविकारो नतु पयसि सिद्ध ओदनः. ''विकारार्थे च तद्धितः'' इति कल्पतरुरत्नाकरपारिजातशुद्धिप्रदीपाः. एतदपि आधारदोषाभावे, तद्दोषेतु पात्रान्तरनयनम्,

''आधारदोषे तु नयेत् पात्रात् पात्रान्तरं द्रव्यम्,
घृतं च पायसं क्षीरं तथैवेक्षुरसो गुडः'' (शंखस्मृ.१।५।अशुद्ध्यपवादः)

इति शङ्खवाक्यात्. तथा भक्ष्याभक्ष्यप्रकरणे

''सन्धिन्यनिर्दशाऽवत्सागोपयः परिवर्जयेत्,
औष्ट्रमैकशफं स्त्रैणम् आरण्यकमथाविकम्'' (याज्ञ.स्मृ.१।१७०)

इति याज्ञवल्क्येन सामान्यतः एतद् दुग्धं निषिद्धम्. तथापि हारीतेन

''सन्धिनी वृषस्यन्ती तस्याः पयो न पिबेत्, ऋतुमद्भावात्. न हतवत्सायाः शोकाभिभूतत्वात्. न दुग्धाया विना वत्सात्. यथा अश्नतो अन्नम् आच्छिद्यात्मनाश्नीयाद् एवं तत्. न नवसूतायाः सरजस्त्वात्. सप्तरात्राद् इति एके दशरात्राद् इति अपरे मासेन अथ पीयूषं भवति इति धर्मविदः''

इति [2]हेतुपूर्वकम् उक्तम्. [3]तच्च श्राद्धहेमाद्रावेव व्याख्यातम्. 'वृषस्यन्ती'पदाद् निवृत्तमैथुनेच्छायाः पयो न निषिद्धम् इति गम्यते. हतवत्सा मृतवत्सा. तत्र शोकाभिभूतत्वाद् इति हेतुः. तेन विस्मृतवत्सशोकायाः पयसि न निषेधः. वत्सादिविना

इति जीवन्तमेव वत्सम् अन्यतो निधाय क्षीरलोभेन दुग्धायाः पयो न पिबेत्. तत्र दृष्टान्तः यथा अश्नतो भुञ्जानाद् अन्नं हठाद् गृहीत्वा स्वयम् अश्नीयाद् एवं तद् इति. न नवप्रसूतायाः, तत्र हेतुः सरजस्त्वाद् इति. तत्र सप्तरात्रादयः त्रयः पक्षाः. एतेषु पक्षेषु यथा रजोनिवृत्तेः व्यवस्था द्रष्टव्या इति. तेन यदा सप्तरात्रादावपि रजोनिवृत्तिनिश्चयः तदा पयःपाने न धर्महानिः इति तेन सन्धिन्याः पयो द्वितीयदिवसे शुद्धं मृतवत्सायास्तु पिण्याकभक्षणादिना विस्मृतवत्सशोकतया तन्मृतकानाघ्राणे शुद्धम्. नवसूतायास्तु निर्देशत्वे प्रायः इदानीं शुद्धिम् अङ्गीकुर्वन्ति नतु सप्तरात्रोत्तरम्. तदुत्तरं रजःसंसर्गपर्यन्तम् अशुद्धं नतु मासपूर्तिपर्यन्तम्. विनावत्ससन्दोहस्तु यावद् वत्सः तदाकांक्षते अन्यत् तृणादिकं चरित्वा न तृप्यति. तदुत्तरं वत्साय स्थापनेन तत्स्वत्वं निवार्य दोग्धव्यं तत्पयः शुद्धम् इति सिद्ध्यति. तथा स्यन्दिनीं यमसूं सन्धिनीम् इति गौतमस्मरणात् तत्पयोऽपि अशुद्धम्. तत्र हेतुं तु न केऽपि लिखन्ति. तथा स्यन्दिनीदुग्धस्य ग्रहणे दुग्धस्रवणेन स्तनानां रिक्ततया तत्पीडाप्रसङ्गः. यमसुवश्च ग्रहणे वत्सयोः बुभुक्षायाः अपूर्त्या तद्दुग्धस्य परस्वत्वं दोषः इति मम प्रतिभाति. दुग्धनिषेधतद्विकाराणामपि अशुद्धत्वम् इति मिताक्षरायाम्. गोमूत्रगोमययोः अनिषेध इति यद्यपि तत्र उक्तं तथापि यत्र रजस्त्वं सम्भाव्यते तत्रतु निषेधः इति मम प्रतिभाति. ब्रह्मपुराणे ''**द्राक्षेक्षूणां रसः शुद्धः सद्यस्तु प्रथमेऽहनि**'' इति तथा. यतौ च ब्रह्मचारिणि गतं भैक्षमपि तेषां शुचि. तदाह अपरार्के मनुः ''**ब्रह्मचारिगतं भैक्षं नित्यं मेध्यम् इति स्थितिः**'' (मनुस्मृ.५।१२९) इति. ब्रह्मचारीति विहितभिक्षोपलक्षकम्. भैक्षं भिक्षासमूहः. विहितभिक्षाधिकारिणोऽपि मनुनैव उक्ताः

''सान्तानिकं वक्ष्यमाणम् अध्वगं सर्ववेदसम्,
गुर्वर्थमातृपित्रर्थ–स्वाध्यायार्थोपतापिनः,
नवैतान् स्नातकान् विद्याद् ब्राह्मणान् धर्मभैक्षकान्''

(मनुस्मृ.११।१,२)

इति. सान्तानिकः सन्तानप्रयोजनः. सर्ववेदसो दत्तसर्वस्वः. उपतापी रोगी. अन्ये प्रसिद्धाः. तथाच तेषां भैक्षं न दुष्यति इति अर्थः. यावतोपघातेन रथ्योपसर्पणादिना भैक्षं न सिद्ध्यति [४]तन्मात्रस्य अपवादो अयम्. अतएव तदतिरिक्तोपघाते शुद्धिम् आह वसिष्ठः

''प्रचरन्नभ्यवहार्येषु उच्छिष्टं यदि संस्पृशेत्,
भूमौ निधाय तद्द्रव्यम् आचान्तः प्रचरेत् पुनः'' (वशि.स्मृ.३।४२)

इति. यस्य उपघातस्य आचमनात् शुद्धिः तद् इह 'उच्छिष्ट'शब्देन उच्यते. अभ्यवहार्यशब्दाच्च न भैक्षमात्रविषयम् एतत् किन्तु परिवेषणादिविषयमपि. यत्तु मनुना उक्तम्

''उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्त: कथञ्चन,
अनिधायैव तद्द्रव्यम् आचान्त: शुचितामियात्''

(मनुस्मृ. ५।१४३)

इति तद् वस्त्राद्यपरविषयम्. किञ्च ब्राह्मे

''उच्छिष्टेन तु शूद्रेण संस्पृष्ट: परिवेषक:,
द्रव्यहस्तश्च यत्किंचिद् दद्यात् तत्तु न भक्षयेत्'' (ब्रह्म.पुरा.)

तेन उच्छिष्टशूद्रातिरिक्तस्पर्शे दोषो नास्ति इति [५]तदाशय: इति अपरार्कस्थं प्रमेयम् उक्तम्. सदाचारचन्द्रोदये तु वासिष्ठं मानवं च वाक्यम् उपन्यस्य उक्तम्.

''यदि द्रव्यम् अङ्गधारणयोग्यं तदा अङ्गे निधाय आचामेत्. यदि तदयोग्यं तदा तत्स्पृष्ट्वा आचामेत्. यद्वा आचमनार्होच्छिष्ट–स्पृष्ट: अभ्यवहार्येतरद्रव्यं भूमौ अनिधाय आचम्य शुचिः भवति. अभ्यवहार्यद्रव्यं तु भूमौ निधाय आचम्य अभ्युक्ष्य गृह्णीयाद्'' (वशि.स्मृ.)

इति. एवं च अत्र पूर्वोक्तवचनद्वयेऽपि उच्छिष्टकर्मकोच्छिष्टकर्तृकस्पर्शदोष: पुरुषस्यैव तस्यैव शुद्धिविधानात्. नतु [६]तत्सम्बन्धेन द्रव्यस्यापि दुष्टत्वम्. पुन: प्रचारस्य अनिधानस्य च उक्तत्वाद् द्रव्यत्यागस्य अनुक्तत्वाच्च इति ग्रन्थद्वयस्यापि तात्पर्यम्. तेन अभ्यवहार्यस्य गृहान्तर–देशान्तर–प्रेषणेऽपि साक्षात्स्पर्शो न भवेत् चेद् अदोषएव, अमेध्याशुचिप्रभृतिस्पर्शे तु त्यागएव इति शिष्टाचारात् प्रतिभाति. विष्णुपुराणे **''सम्प्रोक्ष्य विद्वान् गृह्णीयात् शूद्रान्नं गृहमागतम्''** (विष्णु.पुरा.)इति गृहागमनलिङ्गाच्च. तेन अमेध्याशुचिस्पर्शएव त्यागो नतु अन्यथा इति निश्चय:. अन्यच्च सदाचारचन्द्रोदये, तत्र अङ्गिरा:

''अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि,
कृत्वा मूत्रं पुरीषं च द्रव्यहस्तो न दुष्यति''. (अङ्गि.स्मृ.)

अत्र 'द्रव्य'पदम् अन्नस्यापि सङ्ग्राहकम्.

''शौचं तु कुर्यात् प्रथमं पादौ प्रक्षालयेत् तत:,
उपस्पृश्य तदभ्युक्ष्य गृहीतं शुचितामियात्'' ( )इति स्मृते:.

हलायुधे हारीत:

''कृत्वा मूत्रपुरीषं च द्रव्यहस्त: कथञ्चन,
भूमावन्नं प्रतिष्ठाप्य कृत्वा शौचं यथाविधि,
तत्संयोगात् तु पक्वान्नम् उपस्पृश्य तत: शुचिः''

[उद्ध.२१](आप.स्मृ.९।३४,३५)

इति. पक्वान्नं घृतपक्वं पुरुषसंयोगाद् यथा [७]तद् अशुचिभूतं तथा तत्संयोगात् शुच्यपि इति अर्थः. ''**प्रक्षाल्य पादौ निक्षिप्य आचम्याभ्युक्षणं पुनः, पुष्पादीनां तृणादीनां प्रोक्षणं हविषां तथा**'' इति. **निक्षिप्य** इति द्रव्यं भूमौ निधाय.

मार्कण्डेयस्तु शौचमपि अनिधायैव कार्यम् इति आह.

''**पक्वान्नेन गृहीतेन मूत्रोच्चारं करोति यः,**
अनिधायैव तद्द्रव्यम् अङ्के कृत्वा समाश्रितम्,
शौचं कृत्वा यथान्यायम् उपस्पृश्य यथाविधि,
अन्नम् अभ्युक्षयेच्चैव उद्धृत्यार्कस्य दर्शयेत्,
त्यक्त्वा ग्रासमथैतस्मात् शेषं शुद्धिम् अवाप्नुयात्'' (मार्क.स्मृ.)

इति च तत्र उपन्यस्तम्. एवं च मूत्रोच्चारादावपि यत्र दोषाभावः तत्र कुतस्तराम् उच्छिष्टस्पर्शे. किञ्च पक्वान्नं घृपक्वम् इति यद् व्याख्यातं तदपि युक्तमेव. राहुदर्शने ''**शृतमन्नं च वर्जयेद्**'' इति. निषेधसत्वेऽपि

''**आरनालं पयस्तक्रं दधि स्नेहाज्यपाचितम्,**
मरिकस्थोदकं चैव न दुष्येद् राहुसूतके''

इति घृतपक्वस्यैव अदुष्टत्वकथनेन अन्यत्रापि तस्यैव अदुष्टताया युक्तत्वाद् इति [८]वायुपुराणे[पा.भे.३] चातुर्मास्यमाहात्म्ये.

किञ्च अपरार्के आपस्तम्बः

''**अप्रयतोपहृतम् अन्नम् अप्रयतं नतु अभोज्यम् अप्रयते नतु शूद्रेण उपहतम् अभोज्यं यस्मिंश्च अन्ने केशः स्याद् अन्यद्वा अमेध्यैः अवमृष्टं कीटो वा अमेध्यसेवी मूषकलङ्गं[पा.भे.४] वा पदोपहतं सिचा वा शुना वा अपात्रेण वा दृष्टं सिचा वा उपहतं दास्या वा नक्तम् आहृतम्. भुञ्जानं वा यत्र शूद्र उपस्पृशेद् अनर्हद्भिः वा समानपंक्तौ भुञ्जानेषु वा यत्र अनुत्थाय उच्छिष्टं प्रयच्छेद् आचामेद् वा. कुत्सयित्वा यत्र अन्नं दद्युः मनुष्यैः अवघ्रातम् अन्यैर्वा अमेध्यैः**'' (आप.स्मृ.)

इति. अप्रयतं नतु अभोज्यम् इति. तथा च आग्न्यधिश्रयण-प्रोक्षण-हिरण्यस्पर्श-च्छागमुखस्पर्शान्यतमेन प्रयतं कृत्वा भोज्यम्. अशुचिना शूद्रेण स्पृष्टन्तु अभोज्यम्. मूषकलङ्गम्[पा.भे.५] इति तत्पुरीषं पुच्छादिकं वा सिचेति वस्त्रेण उपहतं दृष्टम् इति

अन्वयः. अनर्हद्भिः वा इति उपस्पृष्टम् इति अध्याहारः. स्फुटम् अन्यत्. अत्र अप्रयतशूद्रस्पर्शे अभोज्यत्वस्य उक्तत्वात् प्रयतशूद्रस्पृष्टपक्वान्नस्य भोज्यत्वानुज्ञा यद्यपि लभ्यते तथापि शिष्टा भगवत्प्रसादस्यैव तादृशस्य भोज्यत्वम् आद्रियन्ते न इतरस्य इति प्रसादव्यतिरिक्तं न भोज्यं, कलौ शिष्टाचारस्य स्मृत्यपेक्षया प्राबल्याद् इति.

२२. अथ घृतपाचितादीनां भक्ष्याभक्ष्यविचारः.

''घृतपक्वं तैलपक्वं मिष्टान्नं शूद्रसंस्कृतम्,
अभक्ष्यं ब्राह्मणानां च शूद्रभ्रष्टं त्रिपीटकम्'' (बृ.वै.पुरा.)

इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे उक्तम्.

यत्तु सुमन्त्वङ्गिरसौ

''गौरसं चैव सक्तुंश्च तैलं पिण्याकमेव च,
अपूपान् भक्षयेत् शूद्राद् यच्चान्यत् पयसा कृतम्'' (आङ्गि.स्मृ.)

इति. पिण्याकं 'तिलकूटः' इति प्रसिद्धम्. पयसेति दुग्धेन.

हारीतः

''कन्दुपक्वं स्नेहपक्वं पायसं दधिसक्तवः,
[1]एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्रवीत्'' (हारि.स्मृ.) इति.

शंखः

[2]**''अपूपाः सक्तवो धानाः तक्रं दधि घृतं मधु,**
एतत् पण्येन भोक्तव्यं भाण्डलेपो न चेद् भवेत्''

(शंखस्मृ.१।४।आह्निकप्रकरणम्)

इति तद् आपद्विषयम्. अन्यथा शूद्रान्नभोजननिषेधकवाक्ये विरोधाद् नापणीयम् अन्नमश्नीयाद् इति शङ्ख लिखितवाक्यविरोधाच्च इति अपरार्कः. सदाचार–चन्द्रोदयस्तु एतानि वचांसि लिखित्वा शूद्रगोरसाद्यपि तद्गेहाद् अन्यत्र नीत्वा भोक्तव्यम्

''घृतं तैलं तथा क्षीरं गुडं तैलेन पाचितम्,
नीत्वा नदीतटे विप्रो भुञ्जीयात् शूद्रभोजनम्'' (परा.स्मृ.११।१४)

इति पराशरोक्तेः इति आह. कश्चित्तु अलवणं स्नेहपक्वं सच्छूद्रस्य भोज्यं तेन वचसाम् अविरोधः इति आह. निर्णयामृतस्तु उक्तशङ्ख वचनात् पक्वान्नानाम् अभक्ष्यत्वम् इति आह. दिनकरोद्योते तु

''शूद्रेषु दासगोपाल–कुलमित्रार्धसीरिणाम्,
भोज्यान्नता गृहस्थस्य तीर्थयात्रातिदूरत:''

इति कलिवर्ज्येषु गणनात् कलावेव निषेध:. सोऽपि गृहस्थस्यैव न यति–ब्रह्मचारिणो:. अयं च पाकस्यैव निषेध:. ब्राह्मणादिषु शूद्रस्य पचनादिक्रिया [३]तथा इति कलिवर्ज्येषु पाकस्य च गणनाद् इति उक्तम्. तेन एतन्मते कलौ [पा.भे.६]शूद्रेण पाचितम् अन्नं गृहस्थेन ब्राह्मणादिना न भोक्तव्यम्. ब्राह्मणादिद्वारा पाचितं तु भोक्तव्यम्. ब्रह्मचार्यादिभिस्तु तेन पाचितमपि भोज्यम् इति आयाति. ममतु अन्यत् प्रतिभाति. देवलेन

''स्वदासो नापितो गोप: कुम्भकार: कृषीवल:,
ब्राह्मणैरपि भोज्यान्ना: पञ्चैते शूद्रयोनय:'' इति.

(देव.स्मृ.५[आह्निकं]।६८६)

याज्ञवल्क्येन च

''शूद्रेषु दासगोपाल–कुलमित्रार्धसीरिण:,
भोज्यन्ना नापितश्चैव यश्चात्मानं निवेदयेत्''इति.

(याज्ञ.स्मृ.१।१६६)

हारीतेन च

''कुलं मित्रं कुलपुत्रो भैक्षद: शिष्यक: सुहृत्,
भवेद् अस्य सुखं लाभे भयत्राता च यो भवेत्,
एते शूद्रेषु भोज्यान्ना मनो यत्र विभाव्यते'' (हारि.स्मृ.)

इति अपरार्के अनेकेषां भोज्यान्नताकथनात्. कलिवर्ज्येषु तु दासादीनां चतुर्णामेव गणितत्वात् तदितरेषाम् उक्तानां शूद्राणां भोज्यान्नता यद्यपि प्राप्यते तथापि **''अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेद् न तु''** इति निषेधान्तरात् तत्पक्वान्नभोजनं न कार्यम्. किञ्च एतेषु वाक्येषु 'अन्न'पदात् पक्वम् अन्नमेव न भोज्यम्, पयोविकार ऐक्षवं फलादिकं तु भोज्यम् इति. अतएव मनुरपि

''नाद्याच्छूद्रस्य पक्वान्नं विद्वान् अश्नाद्धि नो द्विज:,
आददीतान्नमेवास्माद् अवृत्तावेकरात्रिकम्'' (मनुस्मृ.४।२२३)

इत्येव आह. किञ्च

''यथा जलं निर्गमनेष्वपेयं नदीगतं तत्पुनरेव पेयम्,
तथान्नपानं विधिपूर्वमागतं द्विजादिपात्रान्तरितं न दुष्यति''( )

इति अपरार्के स्मृत्यन्तरम्. सदाचारचन्द्रोदये च.

''यथा यतस्ततोऽप्याप: शुद्धिं यान्ति नदीगता:,

शूद्रात् विप्रगृहेष्वन्नं प्रविष्टं तु तथा शुचि'' इति.

स्मृत्यन्तरं तथा तत्रैव

''तावद् भवति शूद्रान्नं यावद् न स्पृशति द्विजः,

द्विजाग्र्यकरसंस्पृष्टं सर्वं तद् हविरुच्यते''

इति पराशरवाक्यं च. तेन यच्छूद्रस्य अन्नं तद् गृहे ब्राह्मणेन पाचितं ब्राह्मणेन शुचिप्रकारेण आनीय द्विजपात्रे स्थापितं चेत् तदा न दुष्यति. तथा सक्तवो धानाश्च शूद्रपक्वाअपि लोकविद्विष्टत्वाभावाद् न दुष्यन्ति. तथा अभोज्यान्नानां गृहेऽपि ततः आमं गृहीत्वा ब्राह्मणः स्वीयपात्रेण पक्त्वा भुङ्क्ते चेत् तदापि न दोषः.

सच्छूद्रलक्षणं तु सदाचारचन्दोदये बृहत्पराशरेण उक्तम्

''विशुद्धान्वयसञ्जातो निवृत्तो मद्यमांसयोः,

द्विजभक्तिर्वणिग्वृत्तिः सच्छूद्रः परिकीर्तितः'' (परा.स्मृ.६।३१३)इति.

आत्मनिवेदिगेहे स्वयंपचने तु सुतरां न दोषः. निवेदनोत्तरं तत्र तावन्मात्रे स्वत्वोत्पत्तेः इति.

२३. अथ उदकशुद्धिविचारः.

तत्र मनुः

''आपः शुद्धा भूमिगता वैतृष्ण्यं यत्र गोर्भवेत्,

अव्याप्ताश्चेद् अमेध्येन गन्धवर्णसमन्विताः'' इति.

(मनुस्मृ. ५।१२८)

एवं शिलागतमपि

''भूमिष्ठम् उदकं शुद्धं वैतृष्ण्यं यत्र गोर्भवेत्,

अव्याप्तं चेद् अमेध्येन तद्वदेव शिलागतम्'' (विष्णु.स्मृ.)

इति विष्णुवाक्यात्.

तथा नद्यादिभ्यः शुद्धपात्रोद्धृता अपि

''उद्धृता वा प्रशस्ताः स्युः शुद्धैः पात्रैर्यथाविधि,

एकरात्रोषितास्तास्तु (द्वितीयार्थे प्रथमा) **त्यजेद् आपः समुद्धृताः''** (देव.स्मृ.९)

इति पूर्वोक्तधर्मानुवृतौ देवलवाक्यात्. आपः इति विभक्तिव्यत्ययश्छान्दसः. अत्र ताः इति सर्वनाम्ना गोतृप्तिमात्रपर्याप्ता अल्पाएव परामृश्यन्ते. अतो बहूदकात्

तडागादेः उद्धृतानां रात्र्युषितानां न दोषः इति पारिजातः. एतदपि अनुषितोदकासम्भवे. अत्र पर्युषितजलवर्जनं तीर्थोदकव्यतिरिक्तविषयम्. ''**तीर्थतोयं न दुष्येत करकादिस्थितं सदा**'' इति मर्यादसिन्धौ वचनात्. एवं चरणामृतेऽपि तीर्थत्वाद् बोध्यम्. तथा अपरार्के देवलः.

''**अक्षोभ्यानामपां नास्ति प्रसृतानां च दूषणम्,**
स्तोकानाम् उद्धृतानां च कश्मलैर्दूषणं भवेत्,
अक्षोभ्यानि तडागानि नदी वाप्यः सरांसि च,
कश्मलाशुचिसंस्पर्शे तीर्थतः परिवर्जयेत्'' (देव. स्मृ. ९)

इति. अत्र अमेध्ययुक्तः प्रदेशः तीर्थम्. क्वचित् तु चाण्डालाद्यशुचिस्पृष्टः इति पाठः. तदा तीर्थम् अवतरणमार्गः. गन्धाद्ययुक्ताः शुद्धा इति अनुवृत्तौ पैठीनसिः विपर्यस्तं महोदकमपि वर्ज्यम् इति आह. उद्धृतेषु तु विशेषं यम आह.

''**प्रपामरण्ये घटगं च कूपे द्रोण्यां जलं कोशगतास्तथापः,**
ऋतेऽपि शूद्रात् तदपेयमाहुः आपद्गतो भूमिगताः पिबेत्तु''

इति. प्रपा जलसत्रशाला. घटगं घटस्थं. घटकम् इति जलोद्धरणार्थं स्थापितः सर्वसाधारणो घटः. द्रोणी अश्मादिमयी सर्वार्था जलपात्री, काष्ठाम्बुवाहिनी वा. कोशो दृतिः. द्विजातिपतिकमपि अरण्यगतमपि प्रपादिगतं जलं शूद्रव्यतिरिक्तैः अपेयम्. आपदि तु शुद्धभूमौ क्षिप्तं पेयम् इति वाक्यार्थः. तादृशस्य भूगतस्यापि क्वचिद् अपवादम् आह मर्यादासिन्धौ हारीतः. भूगाः पुण्या अपो[पा.भे.७] अशुभागमनवर्जं यदि तदरण्ये गतं प्रपादि स्यादिति अरण्यप्रपादिजलं शुद्धभूगतमपि अशुभागमने सति वर्ज्यम् इति अर्थः.

२४. [१]अथ जलाशयशुद्धिविचारः.

देवलः

''**श्वशृगालखरोष्ट्रैश्च क्रव्याद्भिश्च जुगुप्सितम्,**
उद्धरेद् उदकं सर्वं पञ्च पिण्डान् मृदस्तथा'' इति.

(देव.स्मृ.९।जलशुद्धिः)

ब्राह्मे च

''**येषाम् अभक्ष्यं मांसं च तच्छरीरैर्युतं च यत्,**
वापीकूपतडागेषु जलं सर्वं हि दुष्यति'' (देव.स्मृ.९।जलशुद्धिः)

शरीरैः मृतशरीरैः.

''सकर्दमं सकुणपं तेभ्यस्तोयम् अपास्य तत्,
प्रक्षिपेत् पञ्चगव्यं च समन्त्रं सर्वशुद्धिकृत्,
अपास्य कुणपं तेभ्यो बहुतोयेभ्यएव च,
शतं षष्ट्यथवा त्रिंशत् तोयकुम्भान् समुद्धरेत्,
पञ्चगव्यं ततस्तेषु प्रक्षिपेत् मन्त्रसंयुतम्'' इति.

(देव.स्मृ.९।जलशुद्धिः)

वापी सोपानयुक्तो जलाशयविशेषः.

जमदग्निः.

''वापीकूपतडागेषु स्वल्पेषु स्थावरेषु च,
स्थूलसूक्ष्मप्राणिशवे क्लिन्ने जीर्णे च तज्जलम्,
सर्वम् उद्धृत्य सूत्खातं पञ्चगव्यं ततः क्षिपेत्,
पाषाणैरिष्टकाभिर्वा दहेत् तत्स्थानमेव तु,
सरबद्धे तु सम्प्रोक्ष्य विप्राशीर्वचनं तथा,
बहूदके तु दुष्टेऽस्मात् कलशान् षष्टिमुद्धरेत्,
सूक्ष्मास्थिप्राणिभिर्दुष्टे त्रिंशत् कुम्भांस्तथोद्धरेत्''. (जम.स्मृ.)

कूपविषये विष्णुः

''मृतपञ्चनखात् कूपाद् अत्यन्तोपहतात् तथा,
अपः समुद्धरेत् सर्वाः शेषं शस्त्रेण शोधयेत्'' (विष्णुस्मृ.)

शस्त्रेण कुद्दालादिना.

''वह्निप्रज्वालनं कृत्वा कूपे पक्वेष्टकाचिते,
पञ्चगव्यं न्यसेत् पश्चात् नवतोयसमुद्भवे,
जलाशये तथाल्पेषु स्थावरेषु वसुन्धरे,
कूपवत् कथिता शुद्धिः महत्सु च न दूषणम्''.

स्थावरेषु प्रवाहहीनेषु. वसुन्धरे वसुन्धरायाम् इति अर्थः. क्वचित्तु 'महीतले' इति पाठः.

आपस्तम्बः

''उपानच्छ्लेष्मविण्मूत्र–स्त्रीरजोऽमेध्यमेव च,

एभिश्च दूषिते कूपे कुम्भानां षष्टिमुद्धरेत्'' (आप.स्मृ)

बृहस्पतिः

''अस्थिचर्मविनिर्मुक्तैः दूषितैः श्वखरादिभिः,
उद्धृत्य तज्जलं सर्वं शोधनं परिमार्जनम्,
वापीकूपतडागेषु दूषितेषु विशोधनम्,
घटानां शतमुद्धृत्य पञ्चगव्यं ततः क्षिपेत्'' [उद्ध.२९] (अत्रिस्मृ.२२७,२६).

परिमार्जनम् अपद्रव्यनिरसनम्. **अस्थिचर्मविनिर्मुक्तैः** चिरवासेन विशीर्णैः इति अर्थः. अत्र इयं व्यवस्था. सर्वजलोद्धरणं तु स्वल्पतोये. एकस्मिन्नेव उपघाते यल्लघुगुरुशोधनं [२]तद् दूष्याऽनल्पत्वाल्पत्वापेक्षया [पा.भे.८] दूषकलघुत्वगुरुत्वापेक्षया च. अत्यन्तमहत्सु च उपघाते तदुपघातकयुक्तदेशातिरिक्तदेशे दोषाभावएव. कुम्भानां तु स्वल्पमध्याधिकोद्धरणं तदपि तोयतारतम्यापेक्षया इति. तेन बहुजले कूपे यदि मूषकादिसूक्ष्मप्राणिशवस्य जलदौर्गन्ध्यादिना सन्देहः तदा उक्तजमदग्निवाक्यात् त्रिंशदादिकुम्भजलोद्धरणात् पूर्वं तेन जलेन स्नानसन्ध्यादिकरणेऽपि निश्चयात्मक-ज्ञानाभावाद् न पापापत्तिः. ज्ञानोत्तरं तु उद्धरणकुम्भस्य मार्तिकत्वे त्यागो धातवीयत्वे अग्निज्वालादिसंस्पर्शो अम्लादिभिः मार्जनं च इति मे भाति.

अथ बृहस्पतिः.

''उच्छिष्टं मलिनं क्लिन्नं यच्च विष्ठानुलेपितम्,
अद्भिः शुद्ध्यति तत्सर्वम् अपां शुद्धिः कथं भवेत्,
सूर्येन्दुरश्मिपातेन मारुतस्पर्शनेन च,
गवां मूत्रपुरीषेण शुद्ध्यन्त्याप इति स्थितिः''. (बृह.स्मृ.)

यमः

''अजा गावो महिष्यश्च ब्राह्मण्यश्च प्रसूतिकाः,
दशरात्रेण शुद्ध्यन्ति भूमिष्ठं च नवोदकम्''

(देव.स्मृ.९।तैजसादिद्रव्यशुद्धिः).

अत्र 'भूमिष्ठ'पदम् अन्तरिक्षजलव्यावृत्त्यर्थम्.

बृहत्पराशरः

''वन्दत्यपां पवित्रत्वं दिवार्करश्मिवायुभिः,
मुनयो धर्मवेत्तारो रात्रौ चन्द्रांशुमारुतैः'' (वृ.परा.स्मृ.८।२६३) इति.

म्लेच्छादिखातजलविषये आपस्तम्बः

''म्लेच्छादीनां जलं पीत्वा पुष्करिण्यां ह्रदेऽपि वा,
जानुदघ्नं शुचि ज्ञेयम् अधस्ताद् अशुचि स्मृतम्,
तत्तोयं यः पिबेद् विप्रः कामतोऽकामतोऽपि वा,
अकामाद् नक्तभोजी स्याद् अहोरात्रं तु कामतः'' (आप.स्मृ.)

इति मर्यादसिन्धूक्ता उदकशुद्धिः.

२५. अथ भूशुद्धिविचारः.

तत्र मर्यादासिन्धौ अपरार्के च देवलः

''पञ्चधा वा चतुर्धा वा भूरमेध्या विशुद्ध्यति,
दुष्टा द्विधा त्रिधा वापि शुद्ध्यते मलिनैकधा''

(देव.स्मृ.९।भूमिशुद्धिः).

अशुद्धा भूमिः अमेध्य-दुष्ट-मलिनभेदेन त्रिधा. तत्र अमेध्यां तच्छुद्धिं च आह सएव

''प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः,
चण्डालैरुषितं यत्र-यत्र विन्यस्यते शवः,
विण्मूत्रोपहतं यत्र कुणपो यत्र दृश्यते,
एवं कश्मलभूयिष्ठा भूरमेध्येति लक्ष्यते,
दहनं खननं भूमेरुपलेपनवापने,
पर्जन्यवर्षणं चेति शौचं पञ्चविधं स्मृतम्'' इति.

(देव.स्मृ.९।भूमिशुद्धिः)

अपरार्के तु 'वापन'स्थाने 'धावनं' पठितम्. दहनं तृणकाष्ठादिप्रक्षेपेण ज्वालनम्. खननं तक्षणं शस्त्रादिना उल्लेखनं वा. उपलेपनं गोमूत्रभस्मगोमयादिना. वापनं मृदन्तरेण पूरणम्. एतन्मध्ये पञ्चभिः चतुर्भिः वा अमेध्या भूः शुद्धा भवति. दुष्टां मलिनां च सएव आह

''कृमिकीटपदक्षेपैः दूषिता यत्र मेदिनी,
द्रप्सापकर्षणोच्छिष्टैः घातैर्वा दुष्टतां व्रजेत्,
नखदन्ततनूजत्वक्-तुषपांसुरजोमलैः,
भस्मपङ्कतृणैर्वापि सम्पन्ना मलिना भवेत्'' इति.

अपरार्के मिताक्षरायां च

''श्वसूकरखरोष्ट्राद्यैः संस्पृष्टा दुष्टतां व्रजेत्,

अङ्गारतुषकेशास्थि–भस्माद्यैः मलिना भवेत्''

इति पाठः. पूर्वपाठे 'द्रप्सा'पदेन घनीभूतः श्लेष्मा उच्यते. तत्र दुष्टाया दहनादित्रयेण द्वयेन वा शुद्धिः. अत्र अपरार्के विकल्पो व्यवस्थापितः. तत्र श्मशानभुवः पञ्चभिः शुद्धिः. तदन्यस्या अमेध्याया वर्षणवर्जितैः चतुर्भिः. चिरकालं दुष्टाया दहन–खननोपलेपनैः त्रिभिः. अचिरकालं दुष्टाया उल्लेखनदाहाभ्याम्. चिरं मलिनाया उल्लेखनेनैव इति. विज्ञानेश्वरस्तु मार्जनानुलेपनयोः सर्वत्र समुच्चयम् आह. एवम्, अचिरं मलिनाया उपलेपनेन धावनेन वर्षणेन वा इति बोध्यम्.

यमस्तु

''खननात् पूरणाद् दाहाद् अभिवर्षणलेपनात्,

गोभिराक्रमणात् कालाद् भूमिः शुद्ध्यति सप्तधा''(यम.स्मृ.   )

इति आह. याज्ञवल्क्योऽपि

''भूशुद्धिः मार्जनाद् दाहात् कालाद् गोक्रमणात् तथा,

सेकाद् उल्लेखनात् लेपाद् गृहं मार्जनलेपनात्'' इति.

(याज्ञ.स्मृ.१।१८८)

मनुस्तु

''सम्मार्जनेनाञ्जनेन सेकेनोल्लेखनेन च,

गवां च परिवासेन भूमिः शुद्ध्यति पञ्चभिः'' (मनुस्मृ.५।१२४).

सम्मार्जनम् अवकारापनयनम्. अञ्जनं गोमयोपलेपनम्. सेको जलेन प्रक्षालनं वर्षणं वा. उल्लेखनं कश्मलापनयनहेतुः तक्षणम्. गवां परिवास एकाहमात्रं गोष्ठीकरणम्. अत्र सेकगोवासयोः निर्लेपविषयत्वम् अन्येषाम् अमेध्यालिप्तविषयत्वम् इति मर्यादासिन्धुः. मेधातिथिस्तु, मूत्रपरीषादिलेपे उल्लेखन–मार्जने. सेको नदीपुलिन–वनादिषु. आवपनन्तु अस्थ्याद्युद्धृत्य मृदन्तरप्रक्षेपः. श्मशानादिभुवस्तु सर्वं कर्तव्यम् इति आह. बौधायनस्तु अत्र विशेषम् आह. घनाया भूमेः उपघाते उपलेपनम्. सुषिरायाः कर्षणम्. क्लिन्नाया अमेध्यम् आहृत्य प्रच्छादनम्. ऊर्ध्वं शवोपघाते भित्तितक्षणम्. सूर्यरश्मिप्रवेशो अग्निज्वालाभिमर्शनम्. चतुर्भिः शोध्यते भूमिः गोभिराक्रमणात् खननाद् दहनाद् अभिवर्षणात् पञ्चमाच्च उपलेपनात् षष्ठात् कालाद् इति. घना निबिडावयवा. सुषिरा सच्छिद्रा. क्लिन्ना अमेध्यार्द्रा. अत्र घनाया इत्यादौ सर्वत्र उपघातः इति अस्य सम्बन्धः. अमेध्यम् आहृत्य इति. अमेध्यम् उद्धृत्य शुद्धमृदादिना प्रदेशपूरणम्. कालो अत्र लेपादिक्षयहेतुः तस्मात् यमः

''अरथ्या वसुधा मेध्या ग्राममध्ये क्वचित्–क्वचित्,

सर्वत्र वसुधा मेध्या यत्र लेपो न दृश्यते'' (यमस्मृ.) इति.

ब्राह्मे तु

''ग्रामाद् दण्डशतं त्यक्त्वा नगराच्च चतुर्गुणम्,
भूमिः सर्वत्र शुद्धा स्याद् यत्र लेपो न दृश्यते'' (ब्रह्म.)

इति विशेषः उक्तः.

भविष्यपुराणे

''वापयेद् यत्र नीली तु तावती त्वशुचिर्मही,
प्रमाणं द्वादशाब्दानि तत ऊर्ध्वं शुचिर् भवेत्'' (भवि.पुरा.)इति.

यमः

''ब्राह्मणावसथे भूमिर् देवागारे तथैव च,
मेध्या चैव सदा मन्ये गवां गोष्ठे तथैव च'' (यम.स्मृ.)

इति. सदा इति गोमयाद्युपलेपाभावेऽपि इति अर्थः. एतच्च अनुपहत–भूमिविषयम्. बौधायनः **''अनेकपुरुषोद्धार्ये दारुशिले भूमिसमे इष्टकाश्च सङ्कीर्णीभूता''** (बौधा.स्मृ.)इति. भूमिसमे इति भूशुद्धिसमानशुद्धिः. सङ्कीर्णभूता इति सुधादिना मिथः सम्बद्धाः. प्रतिलोमजबद्धाअपि न अशुद्धा इति मर्यादासिन्धुः. एतेषां चण्डालादिस्पर्शे भूशुद्धिवदेव शुद्धिः कार्या इति अपरार्कः.

२६. अथ गृहशुद्धिविचारः.

तत्र मर्यादासिन्धौ मनुः **''मार्जनोपाञ्जनैर्वेश्म''** इति अत्र शुद्ध्यति इति अनुषङ्गः. मार्जनं मार्जन्या मृत्तृणकाष्ठाद्यपनयनं, गृहस्य धूमान्धकाराद्यपनयनं च. उपाञ्जनं सुधागोमयादिभिः भूमिभित्तिविलेपनम्. एतच्च शवचाण्डालादिभिः भित्तिस्पर्शे व्यापिनि द्रष्टव्यम्. अव्याप्तौ तु तावन्मात्रमपि. याज्ञवल्क्येन तु भूशुद्धिम् उपक्रम्य तत्रैव तस्मिन्नेव श्लोके **''गृहं मार्जनलेपनाद्''** इति पुनः मार्जनं लेपनं च उक्तं तद् गृहस्य प्रत्यहं मार्जनलेपनप्राप्त्यर्थं वेदितव्यम्.

शवदूषिते तु संवर्तः

''गृहशुद्धिं प्रवक्ष्यामि अन्तःस्थशवदूषिते,
प्रोत्सृज्य मृण्मयं भाण्डं सिद्धिम् अन्नं तथैव च,
गृहादपास्य तत्सर्वं गोमयेनोपलेपयेत्,

गोमयेनोपलिप्याथ छागेनाक्रामयेद् बुधः,
ब्राह्मणैः मन्त्रपूतैश्च हिरण्यकुशवारिणा,
सर्वम् अभ्युक्षयेद् वेश्म ततः शुद्ध्यत्यसंशयम्'' इति.

अन्त्यादीनां गृहमरणे बृहद्यमः

''**श्वशूद्रपतितेऽन्त्ये च मृते मासचतुष्टयम्,**
अत्यन्ते वर्जयेद् गेहम् इत्येवं मनुरब्रवीत्''

इति. **अन्त्यो** म्लेच्छः. **अत्यन्तः** चण्डालः इति मर्यादासिन्धुः. सएव

''**द्विजस्य मरणे वेश्म संशुद्ध्येत्तु दिनत्रयात्,**
दिनैकेन बहिर्भूमिर् अग्निप्रोक्षणलेपनैः''

इति. अत्र यथोक्तशोधनानन्तरमपि मन्त्रप्रोक्षणं कार्यं प्रागुक्तसंवर्तोक्तेः. चण्डालादेः गृहे वासे लघुपराशरः

''**अविज्ञातस्तु चण्डालो निवसेद् यस्य वेश्मनि,**
विज्ञाते चोपसन्नस्य द्विजाः कुर्युरनुग्रहम्''   (परा.स्मृ.६।३२)

इति उपक्रम्य

''**आकारे तु भवेच्छुद्धिरारकूटे सकांस्यके,**
जलशौचं तु वस्त्राणां परित्यागस्तु मृण्मये,   (३७)
कुसुम्भगुडकार्पास–लवणं दधिसर्पिषी,
द्वारि कृत्वा तु धान्यानि गृहे दद्याद् हुताशनम्,   (३८)
ज्वालास्पृष्टं तु तत्सर्वं शुचि तन् मनुरब्रवीत्,(?)
रजकी चर्मकारी च लुब्धकी वेणुपुष्कसी,
चातुर्वर्ण्यगृहेष्वेवम् अज्ञाता यदि तिष्ठति,   (४१)
ज्ञात्वा तु निष्कृतिं कुर्यात् पूर्वोक्तस्यार्धमेव च,
गृहदाहं न कुर्वीत शेषं सर्वं तु कारयेत्,   (४२)
गृहस्याभ्यन्तरं गच्छेत् चाण्डालो यस्य कस्यचित्,
तस्माद् गेहाद् विनिःसृत्य भाण्डान्यपि च वर्जयेत्,(४३)
रसपूर्णं तु यद् भाण्डं न त्यजेत्तु कदाचन,
गोमयोदकलेपेन प्रोक्षयेत् तद्गृहं तथा''   (परा.स्मृ.६।३७–४४)

इति. उपसन्नस्य इति प्रायश्चित्तार्थं कृतपर्षदुपस्थानस्य. आकार इति द्रवीकृत्य पुनराकारकारणम्[पा.भे.९]. आरकूट इति. पित्तले हुताशनदानस्यैव व्याख्यानं ज्वालास्पृष्टं कृत्वा इति. इयं शुद्धिः चातुर्वर्ण्यस्य तुल्या, अग्रिमश्लोके तथावक्ष्यमाणत्वात्. निष्कृतिस्तु

प्रायश्चित्तप्रकरणाभावाद् इह न लिख्यते. स्मृतिं दृष्ट्वा ज्ञेया. रसाश्च गुडलवणादयो नतु दधिपयस्तक्रादय:. तेषां त्याज्यत्वात्. तद् आह च्यवन:

''चाण्डालसङ्करे स्वभवनदहनं पावनम्. सर्वमृद्भाण्ड–
भेदनम्. दारवाणां तु तक्षणं, शंखशुक्तिरजतचैलानाम् अद्भि:
प्रक्षालनम्. कांस्यताम्राणाम् आकारे शुद्धि:. सौवीरपयोदधि–
तक्राणां परित्याग:. शेषरसद्रव्यरक्षणम्'' इति.

मरीचिरपि

''गृहेष्वजातिसंवेशे शुद्धि: स्याद् उपलेपनात्,
संवासो यदि जायेत दाहतापैर्विनिर्दिशेत्'' (मरी.स्मृ.   ) इति.
''धान्यानि सर्वबीजानि गुडादिरस एव च,
कुसुम्भकार्पासमथो शुद्ध्येद् वार्यग्निशोधनात्''

इति. अजातिश्चाण्डालादि:. संवेश: प्रवेश:, शयनम् इति केचित्. संवासः चिरकालावस्थानम्. वार्यग्निशोधनं वारिणाभ्युक्षणम् अग्निना पर्यग्निकरणम् इति अपरार्क:. एवञ्च गृहे देवालयादौ वा यदि दुष्टै: पश्वादिः मार्यते उष्यते वा तदा कश्मलभूशुद्धिं पञ्चविधां चतुर्विधां वा विधाय पावमानीप्रभृतिभिः हिरण्यकुशवारिणा गोमूत्रादिभिश्च प्रोक्ष्य यथाशक्तिब्राह्मणभोजनं चाण्डालसंवासे पराशरोक्तं त्रिंशद्गावो वृषं च एकं तेभ्यो दत्वा पुनर्वासं देवायतनं च कुर्याद् इति प्रतिभाति.

२७. अथ रथ्यादिशुद्धिविचार:.

पराशर:

''रथ्याकर्दमतोयानि नाव पन्थास्तृणानि च,
मारुतार्केण शुद्ध्यन्ति निशि चन्द्रर्क्षमारुतै:''(बृ.परा.स्मृ.८।३३९)इति.

याज्ञवल्क्यः

''रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसै:,
मारुतेनैव शुद्ध्यन्ति पक्वेष्टकचितानि च'' (याज्ञ.स्मृ.१।१९७)

इति. अत्र बहुवचनं तद्गतगोमयशर्करादिप्राप्त्यर्थम्. पक्वेष्टकचितानि धवलगृहादीनि चण्डालादिस्पृष्टानि मारुतेनैव शुद्ध्यन्तीति कथनं पूर्वविहितस्य संहतप्रोक्षणस्य निवृत्त्यर्थम्. तृणकाष्ठपर्णमयानां तु प्रोक्षणमेव इति विज्ञानेश्वर:. एवं च **''अरथ्या वसुधा मेध्या''** इति पूर्वोक्तयमवाक्यस्य भोजनादौ रथ्याया अमेध्यता–बोधकत्वात् न विरोध:.

२८. अथ प्रकीर्णशुद्धिविचार:.

तत्र मर्यादासिन्धौ शंख:

''नारीणां चैव वत्सानां शकुनीनां शुनां मुखम्,

रतौ प्रस्रवणे वृक्षे मृगयायां सदा शुचिः'' (शंखस्मृ.१।शुद्धिप्रकरणम्)

इति. अत्र सर्वत्र लालासंसर्गकृतदोषापवादः. तत्रापि वत्सस्थले **''गावो मेध्या मुखादृते''** इत्यस्यापि अपवाद:. 'वत्स'पदं बालस्य उपलक्षणार्थम्. **''बालैरनुपरिक्रान्तं नित्यं मेध्यमिति स्थिति:''** इति वचनाद् इति विज्ञानेश्वर:. **शकुनि:** काकादि-विड्भुगतिरिक्तः इति मेधातिथि:. मन-विष्णू :

''नित्यं शुद्धः कारुहस्त: पण्यं यच्च प्रसारितम्,

ब्रह्मचारिगतं भैक्षम् आकरा: सर्वएव हि''

इति. अत्र हस्तो अमेध्यानुपहतो ज्ञेय:. प्रसारितम् इति नानाक्रेतृसंस्पर्शोपघात-दोषनिरासार्थम्. एतेन गृहस्य व्यावृत्ति:. शेषं प्रागेव व्याख्यातम्.

बौधायन:

''अदुष्टा संततं धारा वातोद्भूताश्च रेणव:'' (देव.स्मृ.९।११) इति.

यम:

''गौरश्वोविप्रुषश्छाया मक्षिका: शलभा: शुका:,

अजो हस्ती रणे छत्रं रश्मयश्चन्द्रसूर्ययो:,

भूमिरग्नी रजो वायुरापो दधि घृतं पय:,

सर्वाण्येतानि शुद्धानि स्पर्शे मेध्यानि सर्वश:'' (यमस्मृ.)

इति. यतः एतानि सर्वदा शुद्धानि ततो अशुचिस्पर्शेऽपि मेध्यानि इति अर्थ:. अत्र गोप्रभृतीनां स्पर्शे शुचित्वेऽपि याज्ञवल्क्येन **''अजाश्वं मुखतो मेध्यं न गौर् न नरजा मला:''** (याज्ञ.स्मृ.१।१९४) इति विशेषकथनात् तयोः मुखं विशेषेण शुद्धम् इति पात्रादीनां तत्स्पर्शेन शुद्धौ उपयुज्यते. विप्रुषां शुचित्वं नखाग्रादिच्युतव्यतिरिक्तविषयम्. लिङ्गपुराणे

''नखाग्रकेशनिर्धूत-स्नानवस्त्रदशोदकम्,

अश्रीकरम् अपुण्यं च अशुद्धं संस्पृशेद् यद्यदि'' (लिङ्गपुरा.)

इति तत्स्पर्शे दोषकथनाद् इति मर्यादसिन्धु:. विप्रुषः सूक्ष्मा जलकणाः तासां शुचिजलप्रभवानामपि चण्डालाद्यङ्गसङ्गिनां वायुना नीयमानानाम् अशुचित्वशङ्कायां [पा.भे.१०]शुचित्वे विधिः अयम् इति अपरार्क:. यत्तु याज्ञवल्क्य: **''मुखजा विप्रुषो मेध्याः तथाऽऽचमनबिन्दव:''** (याज्ञ.स्मृ.१।१९५) इति प्राह तत्र विशेष:.

''न मुख्या विप्रुष उच्छिष्टं कुर्वन्ति न चेद् अङ्गे निपतन्ति''

इति वसिष्ठवाक्यात्.

''स्पृशन्ति बिन्दवः पादौ य आचामयतः परान्,
भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत्'' (मनु.स्मृ.५।१४२)

इति मनुवाक्याच्च बोध्यः. एवं च अङ्गवद् भगवद्भोगसामग्र्यादौ तत्तत्पातेऽपि अशुचित्वं बोध्यम्. सर्वत्र जगन्नाथादिमहास्थलेषु पाकादिसेवाकर्तृणां मुखप्रावरणबन्धन-शिष्टाचाराद् इति.

छायायाः शुचित्वं चाण्डालादिच्छायाव्यतिरिक्तविषयम्.

''चाण्डालपतित-च्छायां स्पृष्ट्वा स्नानं समाचरेत्''

इति स्मृत्यन्तरे.

''यदि छायां श्वपाकस्य ब्राह्मणो ह्यधिरोहति,
तत्र स्नानं प्रकुर्वीत घृतं प्राश्य विशुद्ध्यति''

इति अङ्गिरो वाक्ये.

''दीपमञ्चकयोश्छाया बोधिच्छाया तथा निशि,
तथा नीचजनच्छाया हन्ति पुण्यं पुराकृतम्''

इति स्मृत्यन्तरे च तासां दुष्टत्वकथनात्. एवं च वितानशिबिरादिच्छायासु दोषाभावात् तत्र भोजनादिकरणे दोषाभावः.

यत्तु, **''चण्डालपतितच्छाया स्पर्शे दुष्टा तु नो भवेत्''** इति ब्राह्मं तत्तु अकामतः स्पर्शविषयं चतुर्युगादिपरिमाणाधिकच्छायाविषयं च इति न विरोधः. अग्निश्चण्डाल-शवाग्न्यादिव्यतिरिक्तः. एवं भूमिरापो दध्यादि च. रजोपि अजादिव्यतिरिक्तम्. तद् आह शातातपः

''रेणवः शुचयः सर्वे वायुना समुदीरिताः,
अन्यत्र रासभाजाविश्वसमूहनिवाससाम्'' (शाता.स्मृ.)

इति. समूहनी सम्मार्जनी. एतच्च रेण्वन्तरस्यापि उपलक्षणम्.

''श्वकाकोष्ट्रखरोलूक-सूकरग्राम्यपक्षिणाम्,
अजाविरेणुसंस्पर्शाद् आयुर्लक्ष्मीश्च हीयते''

इति मिताक्षरायां स्मृत्यन्तरात्. तत्स्पर्शे सम्मार्जनं कार्यम् इति विज्ञानेश्वरः. पवित्रास्तु रेणवो मर्यादासिन्धौ गारुडे उक्ताः

''गजाश्वरथधान्यानां गवां चैव रजः शुभम्''.

तथा

''गवां रजो धान्यरजः पुत्रस्याङ्गभवं रजः,

एतद्रजो महाशस्तं महापातकनाशनम्''

इति. धूमोऽपि शुद्धः. ''**धूमाग्निरजांसि वाय्वीरितानि शुद्धानि**'' इति अपरार्के शंखवाक्यात्. मक्षिकाग्रहणम् अवर्जनीयस्पर्शानां दंशमशकपिपीलिकादीनाम् उपलक्षणार्थम् इति अपरार्कः. वायुस्तु वहन् शुद्धो न तु वस्त्रदशादिजन्यः

''**शिग्वातः शूर्पवातश्च वातः पाण्योर्मुखस्य च,**
सुकृतानि हरन्त्येते संस्पृष्टाः पुरुषस्य च'' (लिङ्गपुरा.)

इति मर्यादासिन्धौ लैङ्गात्.

शिग्वस्त्रदशा, बृहस्पतिः

''**द्राक्षेक्षुयन्त्राकरकारुहस्ता गोदोहनी यत्र विनिःसृतानि,**
बालैरथ स्त्रीभिरनुष्ठितानि प्रत्यक्षदृष्टानि शुचीनि तानि''

(बृह.स्मृ.)

इति. स्वल्पोपहतियुक्तैः बालैः स्त्रीभिश्च यानि कृतानि तानि अशुचिभिः कृतानि इति प्रत्यक्षतो दृष्टान्यपि शुद्धानि इति व्याख्यातं मर्यादसिन्धौ.

देवलः

''**गोशकृच्छुद्धदेशस्थं श्मशानादुद्धृतं शिवम्,**
अग्राम्या मृद्भवेत् शुद्धा शुक्रविण्मूत्रवर्जिता'' (देव.स्मृ.९।१९)

इति मर्यादासिन्धुप्रभृतिषु अन्यान्यपि स्त्र्यादिशुद्धिबोधकवाक्यानि बहूनि सन्ति तानि अनुपयुक्तत्वाद् न लिख्यन्ते. इति प्रकीर्णशुद्धिः.

२९. अथ आत्मशुद्धिविचारः.

सा च क्षेत्रज्ञस्य ईश्वरज्ञानाद् इति याज्ञवल्क्येन.

''**ज्ञानं तपोऽग्निराहारोमृण्मनोवार्युपाञ्जनम्,**
वायुः कर्मार्ककालौ च शुद्धेः कर्तॄणि देहिनाम्'' इति

(मनुस्मृ.५ । १०५)

मनुना च श्रवणमननादिरूपज्ञानेन उक्ता. तथापि भगवता एकादशस्कन्धस्य एकविंशे ''**मत्स्मृत्या चाऽऽत्मनः शौचं शुद्धः कर्माचरेद् बुधः**'' (भाग.पुरा.११।२१।१४) इति कथनात्.

तृतीयस्कन्धेऽपि

''**यन्नामधेयश्रवणानुकीर्तनाद् यत्प्रह्वणाद् यत्स्मरणादपि क्वचित्,**

श्वादोऽपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगवन्नुदर्शनात्''

(भाग.पुरा.३।३३।६) इति.

द्वादशस्कन्धेऽपि

''विद्यातपःप्राणनिरोधमैत्री–तीर्थाभिषेकव्रतदानजाप्यैः,

नात्यन्तशुद्धिं लभतेन्तरात्मा यथा हृदिस्थे भगवत्यनन्ते''

(भाग.पुरा.१२।३।४८)इति.

षष्ठस्कन्धेऽपि श्रीशुकैः सर्वपापानां निःशेषनिवारकतया भक्तिरेव उक्ता

''केचित् केवलया भक्त्या वासुदेवपरायणाः,

अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः,

न तथा ह्यघवान् राजन् पूयेत तपआदिभिः,

यथा कृष्णार्पितप्राणः तत्पूरुषनिषेवया'' (भाग.पुरा.६।१।१६)

इति कथनाच्च आत्मशोधने भक्तिरेव दृढः उपायः. न च ज्ञानेन अस्या विकल्पः इति शङ्क्यम्. तत्त्वावमर्शनस्य प्रायश्चित्तत्वकथने **''वेणुगुल्ममिवाऽनलः''** (भाग.पुरा.६।१।१४) इति दृष्टान्ते[पा.भे.११] किञ्चित्कालोत्तरं पुनःप्रोहसूचनाद् भक्तौ च **''नीहारमिव भास्करः''** इति दृष्टान्तेन निःशेषपाप–नाशसूचनात्. ज्ञानोत्तरं भक्तेः कथनेन तत्पोषणाय अजामिलोपाख्यानोपन्यासेन तत्र च शैवस्य अगस्त्यस्य सम्मतिप्रदर्शनेन ज्ञानापेक्षयापि भक्तेरेव आधिक्यस्य भगवद्भक्तान् प्रति साधितत्वाच्च. किञ्च, लिङ्गशरीरस्यापि शुद्धिः आहारशुद्ध्या तच्छुद्धिश्च ज्ञानोपयोगिनी. **''आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः''** (छान्दो.उप. ७।२६।२) इति छान्दोग्यश्रुतेः. सत्त्वञ्च अन्तःकरणम्. तथा **''अन्नमयं हि सौम्य मनः, आपो मयः प्राणः तेजोमयी वाग्''** (छान्दो.उप.६।५।४) इत्यपि छान्दोग्ये मनःप्राणवाचाम् आहारपरिणामत्वं तत्पोषितत्वं च अभिप्रेतम्. आहारशुद्धिश्च स्ववर्णाश्रमवृत्त्या सम्पादितान्नेन. तस्य च सिद्धस्य भगवत्समर्पणानन्तरं प्रसादतया तद्भोजनेन. तदुक्तं हरिवल्लभसुधोदयनिबन्धे ब्रह्माण्डे

''पादोदकं पिबेद् नित्यं तन्निवेदितमग्रतः,

अद्याद् आत्मविशुद्ध्यर्थं सर्वकामाप्तये तथा'' इति.

पाद्मेपि

''मुकुन्दाशनशेषं तु यो हि भुङ्क्ते दिने–दिने,

सिक्थे–सिक्थे भवेत् पुण्यं चान्द्रायणशताधिकम्,

भुक्त्वान्यदेवनैवेद्यं द्विजश्चान्द्रायणं चरेत्,

भुक्त्वा केशवनैवेद्यं सर्वपापैः प्रमुच्यते''

इति. अतो ज्ञानपक्षेऽपि तस्य स्वरूपोपकाराय स्मरणादिरूपा भक्तिः अवश्यम् अपेक्षिता इति सुकरा इति च सैव आत्मशोधनार्थं सेवोपयोगाय च कर्तव्या इति दिक्.

इति श्रीवल्लभाचार्यचरणाब्जप्रसादतः।
नानानिबन्धानालोक्य द्वेधा शुद्धिः स्फुटीकृता ।।

इति श्रीमद्वल्लभाचार्यचरणाम्बुजदासदासेन
पीताम्बरात्मजेन पुरुषोत्तमेन स्फुटीकृता द्रव्यशुद्धिः[पा.भे.१२] सम्पूर्णा
।। श्रीकृष्णार्पणमस्तु ।।

(मुद्रितपुस्तके लिखिताः पाठभेदाः टिप्पण्यश्च)

१३.

१.यथा सक्तुहोमे अञ्जलिव्याकोशस्य औचित्यबलात् प्राप्तिः तथा. २.स्नानाङ्गीकारे दानार्थम् उपस्थापितस्य. ३.अत्र च इत्यपि पाठः. ४.निःस्रवोक्तिवैयर्थ्यापत्तिः. ५.वैयर्थ्यापत्तिवारणाय. ६.तद्वदशुचित्वापत्तेः. ७.सुप्तदोषः ८.चा.पा. ९.चकारोऽन्यपुस्तके नाऽस्ति.

१४.

१.क्वचित् शुद्धिपदं न दृश्यते ('शुद्धि'पदं ख-च पुस्तकेपि नास्ति). २.तस्याहतस्यार्थत्वबोधकं योग्यत्वबोधकम्. ३.शुचेः. ४.वस्त्रादीनि. ५.भगवतकर्मार्हत्वे. ६.दोषाभावः. ७.प्रोक्षणादिना. ८.वचनस्य. ९.त्यक्त इति पाठान्तरमपराके. १०.इति हेतोः अस्नातेन काष्ठादिभिः धौतवस्त्रस्य अपनयने अदोषः इति सम्बन्धः. ११.षटाम्बरविशेषम्. क्षौमं दुकूलं स्याद्वे तु निवीतं प्रावृतं त्रिष्वित्यमरः. १२.सहस्र.

१७.

१.पात्रस्य साधनेन गच्छति. २.शास्त्रादिनेति पाठः. ३.पनस इति भाषायाम्.

१९.

१. तन्तुवायः कुविन्दः स्याद् इति अमरः

२१.

१.अथेत्यारभ्य विचारपदपर्यन्तमन्यपुस्तके नास्ति. २.हारीतेन. ३.हारीतोक्तम्. ४.तावत्रथ्योपसर्पणादिदोषस्य. ५.ब्राह्मवाक्याशयः. ६.द्रव्यधारकपुरुषसम्बन्धेन. ७.पक्वान्नं कृतोपस्पर्शनपुरुषसंयोगात्. ८.एतदारभ्य माहात्म्यपदपर्यन्तमन्यपुस्तके नाऽस्ति.

२२.

१.ब्राह्मणादेः. २.अपूपाः दुग्धालोडिताः. ३.निषिद्धा.

२४.

१.जलाशयशुद्धिमाह इत्यन्यपु (ख–च पुस्तकेपि तथा), २.द्रव्यानल्पेति पाठः

उद्धृतवचनेषु पाठभेदाः

१. ''उदक्यास्पर्शने स्नानम् अंशुकेनान्तरापि वा,
तत्स्पृष्टेऽपि भवेत् स्नानं तुल्याः सर्वा रजस्वलाः'' (वृ.परा.स्मृ.८।३१५)

२. ''त्स्पृष्टेन संस्पृशेद् यस्तु ....'' (संव.स्मृ. १८४)

३. ''पतितचण्डालसूतिकोदक्याशवस्पृष्टि–तत्स्पृष्ट्युपस्पर्शने
सचैलोदकोपस्पर्शनात् शुद्ध्येत्''(गौत्त.स्मृ.१४)

४. ''चण्डालश्वपचैः स्पृष्टे ..., न वसेत् तत्र रात्रौ तु सद्यः स्नानेन शुद्धयति,
अथ वसेद् यदा रात्रावज्ञानाद् अविचक्षणः...''(लघुयम.स्मृ.६४,६५)

५. ''अस्तङ्गते यदा सूर्ये चाण्डालं पतितं स्त्रियम्, ...जातवेदं सुवर्णं च सोममार्गं विलोक्य च,
ब्राह्मणानुगतश्चैव स्नानं कृत्वा विशुद्धयति''(परा.स्मृ.७।११,१२)

६. ''अक्षुब्धानामपां नास्ति प्रभूतानां च दूषणम्, ..., ''(देव.स्मृ.१।९।४)

७. ''अक्षोभ्याणि तडागानि–नदीवापीसरांसि च,
कश्मलाशुचियुक्तानि तीर्थतः परिवर्जयेत्''(देव.स्मृ.१।९।५)

८. ''आतुरे ..., स्नात्वा–स्नात्वा स्पृशेद् एनं ततः शुद्ध्येत् स आतुरः''(परा.स्मृ.७।२०)

९. ''दुःस्वप्नं यदि पश्येत्तु वान्ते वा क्षुरकर्मणि,
मैथुने प्रेतधूमे च स्नानमेव विधीयते''(परा.स्मृ.१२।१)

१०. ''म्लेच्छलूताशनास्पर्शे क्षेत्रे वा यदि वा स्थले,
उपस्पृशेत् शिरः प्रोक्ष्य संशुद्धो जायते द्विजः''(वृ.परा.स्मृ.८।३१२)

११. ''विवाहोत्सवयज्ञेषु सङ्ग्रामे जलसम्प्लवे,
पलायने तथाऽरण्ये स्पर्शदोषो न विद्यते'' (वृ.परा.स्मृ.८।३०६)

१२. ''देवयात्राविवाहेषु यज्ञप्रकरणेषु च ...स्पृष्टास्पृष्टं न विद्यते''(अत्रिस्मृ.२४७)

१४. ''शूर्पवातनखाग्राम्बु–स्नानवस्त्रपदोदकं,
मार्जनीरेणुकेशाम्बु हन्ति पुण्यं दिवाकृतम्'' (अत्रिसं.३१६)

१५. ''क्षुते निष्ठीविते चैव दन्तोच्छिष्टे तथानृते,
पतितानाञ्च सम्भाषे दक्षिणं श्रवणं स्पृशेत्'' (परा.स्मृ.१२।१८)

१६. ''पित्र्यमन्त्रानुद्रवणे आत्मालम्भे अधमेक्षणे, ..., मार्जारमशकस्पर्शे ...,
निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नपः स्पृशेत्''(कात्या.स्मृ.२।१३,१४)

१७. ''स्पृश्यमानोऽथ मां भूमि वातकर्म प्रमुञ्चति, पुरीषसदृशं वायुं वायुपीडितमानसः,
मक्षिका पञ्च वर्षाणि त्रयो वर्षाणि मूषकः,
श्वा चैव त्रीणि वर्षाणि कूर्मो वै जायते नव'' (वरा.पुरा.१३२।१,२)

१८. ''अथ सर्वाणि ...,अवर्ज्यभक्ष्यभोज्यानि ...''(देव.स्मृ.५)

१९. ''वर्जिते निखिलद्रव्येऽशुचिसंज्ञा प्रवर्तते,

तस्मिन्नेवेह कर्मण्ये पूतसंज्ञा प्रवर्तते'' (देव.स्मृ.९।६)

२०. ''तस्माच्छुद्धं तु कर्मण्यं ... क्रियार्हं पूतमुच्यते''(देव.स्मृ.९।७)

२१. ''शिशवश्च ...,ब्रह्महत्या हि ..., आकरा हि ...निर्णयः,...''(देव.स्मृ.९।१०,१२,८)

२२. ''अक्षताः रोचना लाजा हरिद्रा चन्दनं यवाः'''(देव.स्मृ.९।२२)

२३. ''कालं देशं तथात्मानं द्रव्यं द्रव्यप्रयोजनम्, उपपत्तिम् अवस्थां च विज्ञाय
शौचं शौचज्ञः कुशलो धर्मेप्सुः समाचरेत्'' (बौधा.स्मृ.५।५५)

२४. ''दूषितं वर्जितं दुष्टं कश्मलं चेति लिङ्गतः, (२९) त्यक्तः पतितचाण्डालौ
ग्राम्यसूकरकुक्कुटौ,(३१) मृतबन्धुरशुद्धश्च वर्ज्यान्यष्टौ स्वकालतः,(३२)
आर्द्र चर्मासृगित्येतद् दुष्टमाहुः द्विजातयः(३३) मानुषास्थि शवं विष्ठा
रेतो मूत्रार्तवानि च,(३४) (देव.स्मृ.९।२९-३४)

२५. ''दूषिते प्रोक्षणेनापि शुद्धिस्तूक्ता विधानतः,
दृष्ये मार्जनसंस्कारैः कश्मले सर्वथा भवेत्'' (देव.स्मृ.९।३५)

२६. ''गण्डूषं पादशौचं च यः कुर्यात् कांस्यभाजने, भस्मना शुद्ध्यते कांस्यं ताम्रमम्लेन
शुद्ध्यति, ...भूमौ निःक्षिप्य षण्मासम् अत्यन्तोपहतं शुचिः'' (अङ्गि.स्मृ.४१)

२७. ''शयनासनयानादि देहबन्धानि यानि तु, ...प्रचक्षते'' (देव.स्मृ.९।तैजसादिशुद्धिः)

२८. ''देवद्रोण्यां ..., काकैः श्वभिश्च संस्पृष्टम् अन्नं तन्न विसर्जयेत्, तस्मात् तदन्नम् उद्धृत्य
..., द्रवाणां प्लावनेनैव घनानां क्षरणेन तु, पाकेन मुखसंस्पृष्यं शुचिरेव हि तद् भवेत्''
(वशि.स्मृ.१८)

२९. ''कृत्वा मूत्रं पुरीषं च द्रव्यहस्तः कथं शुचिः, भूमावन्नं ...यथार्थतः,
उत्संगे गृह्य पक्वान्नम् ...'' (आप.स्मृ.९।३४,३५)

३०. ''अस्थिचर्मावसिक्तेषु खरस्वानादिदूषिते, उद्धरेद् उदकं सर्वं शोधनं परिमार्जनम्,
वापीकूपतडागानां दूषितानां च शोधनम्,
उद्धरेत् षट्शतं पूर्णं पञ्चगव्येन शुद्ध्यति''(अत्रिस्मृ.२२७,२६).

देव.स्मृ. = देवलस्मृतिः. (१)''देवल स्मृति : रीकन्स्ट्रक्शन् एन्ड क्रिटिकल् स्टडि'' डॉ. मुकुन्द लालजी वाडेकर, आरिएन्टल् इन्स्टिट्यूट, म.स.युनि., वडोदरा. प्र.वर्ष : १९९६. (२) 'स्मृतिसन्दर्भ' खंड-३ में प्रकाशित. प्रकाशक नाग पब्लिशर्स्, दिल्ली. प्र.वर्ष : १९८८

शंखस्मृ. = शङ्ख-लिखितस्मृतिः. (१) सम्पादक : डॉ. अम्बालाल ठाकर, प्रकाशक : भारतीय कला प्रकाशन, दिल्ली. प्र.वर्ष २००३.(२) 'स्मृतिसन्दर्भ' खंड-३ में प्रकाशित. प्रकाशक नाग पब्लिशर्स्, दिल्ली. प्र.वर्ष : १९८८

नवीनपाठभेदावली

११/१. ''भाषायांभिरगुदालहरो(/टो)रा इति मध्यदेशे भासस्य नाम'' इति ख-च पुस्तके अधिकम् उपलभ्यते.

१५/२. 'सम्भारभृतानाम्' इति च पाठः.

२१/३. 'वाराहपुराणे' इति ख-च पाठः.

२१/४. 'लांङ्गम्' इति ख-च पाठः.

२१/५. 'लाङ्गम्' इति ख-च पाठः.

२२/६. ‘शूद्रकृतपाकम्’ इति घ पाठः.
२३/७. ‘आपो’ इति ख–च पाठः.
२४/८. ‘द्रव्यानल्प..’ इति च पाठः.
२६/९. ‘कारणे’ इति ख–च पाठः.
२८/१०. ‘शुचित्वविधिः’ इति ख–च पाठः.
२८/११. ‘दृष्टान्तेन’ इति ख–च पाठः.
२९/१२. ‘द्रव्यशुद्धिदीपिका’ इति ख–च पाठः.

।। श्रीकृष्णाय नमः ।।

श्रीपुरुषोत्तमचरणविरचिता

भक्तिमार्गीयापराधनिरूपणविवृतिः

श्रीविट्ठलेश्वरं नत्वाऽपराधानां निरूपकम् ।
विचार्यन्तेऽपराधस् तद्वाग्विचारप्रसङ्गतः ।।

'अप'पूर्वकाद् 'राध'धातोः संसिद्ध्यर्थकाद् भावे 'घञि' कृते 'अपराधः' इति भवति. तथाच अपकर्षजनकं साधनम् अपराधः. अपकर्षश्च भगवतो अरुच्युत्पादकत्वम्. तदुक्तं वाराहपुराणे (वरा.पुरा.अध्याय ११६)भगवता वाराहेण पृथ्वीं प्रति

''**प्रथमं च अपराधानि न रोचन्ते मम प्रिये**''.

(वराहपुराण ११६।५)

अत्र 'मम' इति पृथिव्याः सम्बोधनम्. तथाच भगवदरुचिविषयो अर्थो अपराधः. 'मम प्रिये' इति 'प्रिय'शब्दस्य सप्तम्यन्तत्वपक्षेतु पूर्वं भगवत्प्रियेऽपि जीवे यदुत्पत्या भगवतो अरुचिः उत्पद्यते सो अपराधः इति. एतदपि प्रायश्चित्तसूत्रे ''**मम विप्रियकारकः**'' इति अपराधिविशेषणेन ''**नच अहं योगम् इच्छामि क्रुद्धस्य च यशस्विनि**'' इति वाक्येन च सूचयिष्यते. तेच अपराधाः पूर्वं विधिकर्माध्यायम् उक्त्वा, ततः सुखदुःखाध्यायं च उक्त्वा, ततो विधिकर्मशेषत्वेन द्वात्रिंशद् उद्दिष्टाः. ततः प्रायश्चित्तसूत्रे

''**एवं मे परमं गुह्यं यदीश हृदि वर्तते।**
तव भक्तसुखार्थाय तत्त्वं मे वक्तुम् अर्हसि।।
देव पूर्वापराधास्तु द्वात्रिंशत् परिकीर्तिताः।
एवं कृत्वापराधानि मनुजा अल्पचेतसः।।
कर्मणा केन शुद्ध्यन्ति अपराधस्य कारिणः।
तन् ममाचक्ष्व तत्त्वेन मम प्रीत्या च माधव।।''(वरा.पुरा.१२९।४-६)

इति धरिणीप्रश्ने तावदध्यायेषु विमृष्टाः. ततो अन्येऽपि रामतीर्थयात्रोत्तरं त्रयस्त्रिंशद् उक्ताः. संक्षेपेण तत्प्रायश्चित्तं च उक्तम्. तत्र प्रथमतः पूर्वोक्ताः प्रदर्श्यन्ते.

प्रथमञ्च ''**अपराधानि न रोचन्ते**'' इति प्रतिज्ञाय ''**भुक्त्वा तु परकीयान्नं तत्परः तन्निवर्तितः**''(वरा.पुरा.११६।५) अत्र उत्तरार्धं पतितम्, अग्रे सर्वत्र स्वोपसर्पणादेः अपराधगणनायाः च दर्शनात्, तेन तत्कृत्वा उपसर्पणं प्रथमो अपराधः, नतु परान्नभोजनमात्रपरत्वं, तस्य पापत्वात्. नच अविशिष्टे पातकत्वे कः तयोः भेदः इति शङ्क्यम्. नाशकभेदेन भेदात्. पापानि हि नामोच्चारणेन नाश्यन्ते, नतु अपराधाः, नाममाहात्म्यबोधकेषु ''**कृते पापे अनुतापस्तु यस्य पुंसः प्रजायते, प्रायश्चित्तन्तु तस्य एकं हरिसंस्मरणं परम्**'' इत्यादिवाक्येषु 'पापाद्या'दिपदानामेव 'नाश्य'वाचकत्वेन दर्शनात्, 'अपराध'पदस्य तथात्वेन अदर्शनात् च. नच इदम् अप्रयोजकं, पापापराधयोः भेदाभावे भक्त्या पापनिवृत्तिबोधकवाक्यस्य अपराध-प्रायश्चित्तबोधकवाक्यानां च इतरेतर-विरोधापरिहारप्रसङ्गात्. ''**केचित् केवलया भक्त्या वासुदेवपरायणा, अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः**'' (भाग.पुरा.६।१।१५) इति वाक्यस्य ''**स चतुर्थो अपराधस्तु मम भक्तिपरायणे**'' ममचिन्तकः इति अपराधवाक्यानां च एकविधपुरुषविषयत्वदर्शनात्. एतेषां शब्दानां भूसम्बोधनपक्षेऽपि अग्रिमग्रन्थे अपराधप्रायश्चित्तप्रश्ने ''**तव भक्तसुखार्थाय तत्त्वं मे वक्तुम् अर्हसि**'' (वरा.पुरा.१२९।४) इति पृथिवीवाक्येन तथा निश्चयात्. एकादशस्कन्धीये योगप्रतिबन्धकनिवृत्त्यर्थे भगवद्वाक्ये ''**कांश्चिन् मम अनुध्यानेन नामसंकीर्तनात् च मे**'' (भाग.पुरा.३।२९।१८)इति केषाञ्चिदेव निवृत्तिकथनेन नामोच्चारणादिभिः सर्वाऽनिवृत्त्यवगमात् च. तस्मात् पापापराधयोः परस्परं भेदएव इति निश्चयः.

अथ अस्तु कथञ्चिद् ऐक्यं तथापि

''**स्वपादमूलं भजतः प्रियस्य, त्यक्तान्य-भावस्य हरिः परेशः,**
विकर्म यच्च उत्पतितं कथञ्चिद् धुनोति सर्वं हृदि सन्निविष्टः''
(भाग.पुरा.११।५।४२)

इति एकादशीये योगेश्वरवाक्ये प्रामादिकस्यैव भगवता नाशः क्रियते इति कथनेन बुद्धिपूर्वककरणे भगवदरुचिजननेन तत्प्रायश्चित्तकृतिः[१] ततो निवृत्तिश्च पुष्टिप्रवाहमर्यादामिश्राणां भक्तानाम् आवश्यकीति ते सर्वथा न कार्याएव इति शास्त्रस्य तात्पर्यम्.

अतः परं प्रस्तुतम् अनुसरामः.

अकृत्वा दन्तकाष्ठानि यस्तु माम् उपसर्पति।

स द्वितीयो अपराधस्तु धर्मविघ्नाय वर्तते।।२।।

उपसर्पति निकटे गच्छति. अत्र निकटगमनस्य अपराधत्वं नतु दन्तकाष्ठाकरणमात्रस्य. एवम् अग्रेऽपि बोध्यम्.

गत्वा मैथुनसंयोगं यश्च मां स्पृशते नरः।
तृतीयम् अपराधं च कथयामि वसुन्धरे ।।३।।

अत्र स्पर्शस्य अपराधत्वम्. अस्नातः इति च शेषः, अन्यथा गृहस्थस्य सर्वदा अपराधित्वप्रसङ्गात्.

दृष्ट्वा तु मृतकं भद्रे यो हि माम् उपसर्पति।
स चतुर्थो अपराधस्तु मम भक्तिपरायणे।।४।।

अत्रापि अस्नातः इति शेषः.

नारीं रजस्वलां दृष्ट्वा यो मां स्पृशति निर्भयः।
स पञ्चमो अपराधस्तु विज्ञेयो मत्परायणे।।५।।

अत्रापि अस्नातः इति शेषः.

यस्तु नीलेन वस्त्रेण प्रावृतो मां प्रपद्यते।
षष्ठो अयम् अपराधस्तु विज्ञेयो मम चिन्तके।।६।।

अत्र नीलवस्त्रं पट्टभिन्नं चित्रभिन्नं च ज्ञेयम्. ''**नीलीपट्टेन दूष्यति**'' इति ''**नीलीचित्रं न दुष्यति**'' इति वाक्यान्तरात्. प्रपद्यते इति प्रकर्षो नैकट्यम्. तथाच निकटे गच्छति इति यावत्.

अकृत्वा प्रापणं यस्तु मम कर्मपरायणः।
भुंक्ते भूमेः नवान्नानि सोऽपराधस्तु सप्तमः।।७।।

अत्र भोजनक्रियायाः अपराधत्वम्.

यस्तु माम् अन्धकारेषु विना दीपं स्पृशेत् नरः।
अष्टमञ्च अपराधन्तु [२]कथयामि वसुन्धरे।।८।।

स्पष्टम्.

ममैव अर्चनकाले तु यस्तु वाक्यं प्रभाषते।
नवमञ्च अपराधन्तु न रोचामि वसुन्धरे।।९।।

स्पष्टम्.

अविधानेन संस्पृश्य यस्तु मां प्रतिपद्यते।
दशमञ्च अपराधन्तु कल्पयामि वसुन्धरे।।१०।।

अत्र संस्पर्शः आचमनम्, अग्रिमेण प्रायश्चित्तग्रन्थेन तथानिश्चयात्.

अकर्मण्यानि पुष्पाणि यस्तु माम् उपकल्पयेत्।
एकादशं चापराधं कल्पयामि वसुन्धरे।।११।।

अकर्मण्यानि पुष्पाणि तु सदाचारचन्द्रोदये विष्णुरहस्ये

''न पुष्पैः पूजयेद् देवं कुसुमैः न महीगतैः,
न विशीर्णदलैः स्पृष्टैः नाशुभैः नाविकासिभिः,
पूतिगन्धीनि अगन्धीनि अम्लगन्धीनि वर्जयेत्''.

तथा पाद्मे

''गन्धवन्ति अपवित्राणि उग्रगन्धीनि वर्जयेत्,
गन्धहीनमपि ग्राह्यं पवित्रं यत्कुशादिकम्''.

तथा गारुडे

''चतुःपथाशिवावासे स्मशानस्यापि मध्यतः,
न गन्धफलपुष्पाद्यम् आददीत अर्चने बुधः''.

विष्णुधर्मोत्तरे

''न गृहे करवीरोत्थैः कुसुमैः अर्चयेद् हरिं
पतितैर् मुकुलैर् म्लानैः श्वासैः वा जन्तुदूषितैः,
आघ्रातैर् अङ्गसंस्पृष्टैर् उषितैश्चैव न अर्चयेत्,
नार्कं नोन्मत्तकं किञ्चित् तथैव गिरिकर्णिकां,
न कण्टकारिकापुष्पम् अच्युताय निवेदयेत्,
कुटजं शाल्मलीपुष्पं शिरीषं च जनार्दने,
निवेदितं भयं शोकं निःस्वतां च प्रयच्छति,
करानीतं पटानीतम् आनीतं च अर्कपत्रके,
एरण्डपत्रेषु आनीतं तत्पुष्पं सकलं त्यजेत्''.

करानीतं वामकरानीतम्. अधोवस्त्रानीतम्. यथा उक्तं

''देवोपरि धृतं यच्च वामहस्ते च यद् धृतम्,

अधोवस्त्रधृतं यच्च तत्पुष्पं परिवर्जयेत्''.

तथा हलायुधे

''जलजानां च पुष्पाणां बिल्वपत्रस्य चैव हि,

एषां पर्युषिता शङ्का कार्या पञ्चदिनोर्द्धतः'' इति.

प्रकृतम् अनुसरामः.

अगम्यागमनं कृत्वा यो मां स्पृशति निर्भयः।

द्वादशं चापराधन्तु कल्पयामि वसुन्धरे।।१२।।

यस्तु भुञ्जीत [३]राजान्नं क्षुधार्तो अथ भयेन वा।

पच्यते नरके पृथ्वि दशवर्षसहस्रकम्।।

त्रयोदशापराधन्तु कल्पयामि वसुन्धरे।।१३।।

तत्र भगवदसमर्पितस्यैव राजान्नस्य भोजने दोषः. यथा

''राज्ञान्तु भोक्तव्यं शुद्धैः भगवतैः शुभैः, स्थापयित्वा तु मां देवि विधिदृष्टेन कर्मणा, धनधान्यसमृद्धानि दत्वा भागवतेष्वपि, शुद्धैः भागवतैः च अन्नं मम प्रापणशेषकं, भुञ्जानस्तु वरारोहे न स पापेन लिप्यते''(वरा.पुरा.१२९।१७-१९)

अत्र भागवतैः इति सहार्थे तृतीया. एवं करणाभावेतु चान्द्रायणम् एकं तप्तकृच्छ्रचतुष्कं सान्तपनं च एकं प्रायश्चित्तसूत्रे उक्तम्. अन्येषामपि तन्त्रोक्तानि तान्यपि इदानीं दुष्करत्वात् न प्रदर्श्यन्ते.

अन्तकालेऽपि मां देवि स्पृशते च कदाचन।

चतुर्दशापराधन्तु कल्पयामि वसुन्धरे।।१४।।

यस्तु कृष्णेन वस्त्रेण मम कर्माणि कारयेत्।

पञ्चदशापराधन्तु कल्पयामि वसुन्धरे।।१५।।

कृष्णम् अत्यन्तमलिनम्.

अधौतेन तु वस्त्रेण यस्तु माम् उपकल्पयेत्।
षोडशञ्च अपराधन्तु कल्पयामि वसुन्धरे।।१६।।

अधौतवस्त्रं मण्डसहितम्. तेन भक्तमण्डातिरिक्त–कदल्यादिमण्डयुक्तमपि न समर्पणीयम्. उपकल्पनं मण्डनम्. सदाचारचन्द्रोदये तु ''वायसोद्धूतवस्त्रेण'' इति पठितम्.

जालपादं भक्षयित्वा यस्तु माम् उपसर्पति।
सप्तदशापराधन्तु कल्पयामि वसुन्धरे।।१७।।

यस्तु वाराहमांसानि भक्षयित्वा प्रपद्यते।
अष्टादशापराधन्तु अनुजानीहि माधवी।।१८।।

यस्तु रक्तेन वस्त्रेण कौसुम्भेन उपगच्छति।
एकोनविंशापराधं प्रतिजानामि सुन्दरि।।१९।।

इदञ्च सुवासिनीव्यतिरिक्तविषयम् इति शिष्टाचाराद् अवगम्यते.

तथा मे दीपकं स्पृष्ट्वा यो मां स्पृशति माधवि।
विंशकञ्च अपराधानां कल्पयामि वसुन्धरे।।२०।।

स्पृशति इति हस्तं सम्यग् अप्रक्षाल्य स्पृशति. शिष्टास्तु भगवद्वस्तुमात्रस्य तथास्पर्शेऽपि दोषम् इच्छति.

स्मशानं यच्च वै गत्वा यो मामेव अभिगच्छति।
एकविंशापराधन्तु कल्पयामि वसुन्धरे।।२१।।

पिण्याकं भक्षयित्वा तु यो मामेव उपचक्रमेत्।
द्वाविंशत्यपराधन्तु कल्पयामि वसुन्धरे।।२२।।

पिण्याकः तिलखलिः. अत्रापि महाराष्ट्राणाम् आगोपालपण्डितं शाकादिषु पिण्याकनिक्षेपेण यो भोजनव्यवहारः तस्यापि[४] अपराधत्वम् उच्यते, नतु दरिद्र–पामर–व्यवहारमात्रस्य इति बोध्यम्.

यस्तु वाराहमांसानि प्रापणेन उपपादयेत्।
अपराधं त्रयोविंशं कल्पयामि वसुन्धरे।।२३।।

सुरां पीत्वापि यो मर्त्यः कदाचिद् उपसर्पति।
अपराधं चतुर्विंशं कल्पयामि वसुन्धरे।।२४।।

यः कुसुम्भजशाकं च भक्षयित्वा उपगच्छति।
पञ्चविंशापराधं च कल्पयामि वसुन्धरे।।२५।।

परप्रावरणेनैव यस्तु माम् उपसर्पति।
षड्विंशत्यपराधन्तु कल्पयामि वसुन्धरे।।२६।।

प्रावरणं वस्त्रमात्रोपलक्षकम्. अग्रे ''रक्त-पारक्य-मलिन-वस्त्रधारित्वमेव च'' इति वक्ष्यमाणत्वात्.

तैलाभ्यङ्गं जनः कृत्वा यस्तु माम् उपसर्पति।
सप्तविंशापराधन्तु कल्पयामि हि अनिन्दिते।।२७।।

अत्र तैलाभ्यङ्गोत्तरं स्नाने कृते तु न दोषः इति शिष्टाचाराद् अवगन्तव्यम्.

उपानहासहासीनो मम अर्चाय उपचक्रमेत्।
अष्टाविंशापराधन्तु कल्पयामि गुणान्विते।।२८।।

शरीरं मण्डयित्वा तु यो माम् आप्नोति माधवि।
एकोनत्रिंशापराधन्तु न स स्वर्गेषु गच्छति।।२९।।

शरीरमण्डनं च उष्णीषादिकृतं पूजाकर्मणि दोषावहं बोध्यम्, नतु निकटगमनमात्रे, शिष्टाचारे सर्वत्र तथैव दर्शनात्.

विना भेर्यादिशब्देन द्वारस्योद्घाटनं मम।
त्रिंशकञ्च अपराधानां कल्पयामि यशस्विनि।।३०।।

अत्र 'भेर्यादि'पदं वाद्यमात्रोपलक्षणम्. तेन घण्टा-शङ्खादिशब्देनापि

तद्दोषनिवृत्तिः बोध्या.

अन्नं भुक्त्वा यस्तु बहु अजीर्णेन परिप्लुतः।
उद्गारेण समायुक्तो हि अस्नातः उपगच्छति।
एकत्रिंशापराधन्तु कल्पयामि वसुन्धरे।।३१।।

मद्भक्तद्वेषणं कृत्वा यो मां स्पृशति नित्यशः।
कृत्वा तु पुष्कलं कर्म मम लोकं न गच्छति।
महापराधं बुध्येथा द्वात्रिंशम् इमम् उत्तमे।।३२।।

एवम् उद्दिष्टेषु द्वात्रिंशत्सु [१]मृतकदर्शनं [२]पूजाव्यभिचारः [३]रजोरक्तवस्त्र–युक्तोपसर्पणं, [४]गन्धमाल्यदानं विना धूपदानं, [५]सक्रोधस्पर्शः, [६]पूजाकर्मणि वातकर्म, [७]पूजाकर्मणि पुरीषोत्सर्गश्च इति सप्तापराधाः प्रायश्चित्तसूत्रेषु विमृष्टाः अत्र न दृश्यन्ते. प्राश्चित्तसूत्रे च अत्र उक्ताः अगम्यागमन–कौसुम्भ[८] वस्त्रधारणान्तकालिक–भगवत्स्पर्श–तैलाभ्यङ्गोपसर्पण–शरीरमण्डन–पूर्वकोपसर्पण–भगवद्भक्तद्वेषणपूर्वकनित्य–भगवत्स्पर्शलक्षणाः सप्त न उपलभ्यन्ते. तेन उद्देशग्रन्थ–विमर्शग्रन्थयोः परस्परविरोधेन वैरूप्यं न समाधातुं शक्यम्. अतः पुस्तकान्तरम् अवलोक्य बुद्धिमद्भिः तत्र विचारणीयम्. यथाकथञ्चिद् अस्तु परम् अपराधत्वन्तु न व्यभिचरति.

सदाचारचन्द्रोदयेतु विमर्शग्रन्थस्थाः पातकश्लोकाएव लिखिताः, प्रायश्चित्तश्लोकास्तु न उक्ताः. कश्चित् पाठभेदोऽपि तत्र अस्तीति तेऽपि प्रदर्श्यन्ते.

यस्तु भुञ्जीत राजान्नं क्षुधार्तो बुभुजे पुरा।
भुङ्क्ते तु आपद्गतश्चापि राजान्नं च वसुन्धरे।
दशवर्षसहस्राणि पच्यन्ते नरके वने।।१।।(वरा.पुरा.१२९।८,९)

दन्तकाष्ठम् अखादित्वा यस्तु माम् उपसर्पति।
सर्वं कालकृतं कर्म तेन एकेन च नश्यति।।२।।(वरा.पुरा.१३०।१)

इदञ्च दन्तकाष्ठार्हवासरएव दोषकरम्. ‘‘दन्तकाष्ठम् अखादित्वा(’’? ?‘‘)दन्तकाष्ठार्हवासरे’’ इति हलायुधोक्तेः.

गत्वा तु मैथुनं भद्रे यो अस्नातो माम् उपस्पृशेत्।

रेतः पिबति वर्षाणां सहस्राणि चतुर्दशः।।३।।(वरा.पुरा.१३१।१)

दृष्ट्वा तु मृतकं भद्रे नरं पञ्चत्वम् आगतम्।
मम शास्त्रं बहिः कृत्वा अस्माकं यः प्रपद्यते।।
पितरः तस्य सुश्रोणि तथैव च पितामहाः।
स्मशाने जम्बुका भूत्वा भक्षयन्ति शवं तथा।।४।।
(वरा.पुरा.१३१।११,१२)

नारीं रजस्वलां स्पृष्ट्वा यो मां स्पृशति निर्भयः।
रागमोहसमायुक्तः कामेन च वशीकृतः।।
वर्षाणां च सहस्रैकं रजः पिबति निर्घृणः।
अथवा जायते भूमि दरिद्रो मूर्खएव च।।५।।(वरा.पुरा.१३१।१९,२०)

स्पृष्ट्वा तु मृतकं भूमि यो मे क्षेत्रेषु तिष्ठति।
शतवर्षसहस्राणां गर्भेषु परिवर्तते।।
दशवर्षसहस्राणि चाण्डालो जायते नरः।।६।।(वरा.पुरा.१३१।२६,२७)
तिष्ठति इति अत्र स्नानम् अकृत्वा इति शेषः. परिवर्तते पुनः पुनः प्रविशति.

स्पृशन् मम अग्रतो भूमि वातकर्म प्रमुञ्चति।
वायुं पुरीषसंयुक्तं स पिबेत्तु न संशयः।।
मक्षिका पञ्चवर्षाणि सप्तवर्षाणि मूषकः।
श्वा चैव त्रीणि वर्षाणि नववर्षाणि कच्छपः।।७।।(वरा.पुरा.१३२।१,२)
भवति इति शेषः.

करोति च पुरीषं यो मम कर्म समाचरन्।
दिव्यवर्षसहस्राणि रौरवे नरके स्थितः।।
पुरीषं भक्षयेत् तत्र स्वापराधात् तु नित्यशः।।८।।(वरा.पुरा.१३३।१,२)

त्यक्त्वा तु मम शास्त्राणि वाक्यम् अन्यत् प्रभाषते।
कुर्मो भवति सुश्रोणि जातीः सप्त च सप्त च।।९।।(वरा.पुरा.१३४।१)
त्यक्त्वा अनादृत्य **प्रभाषते** प्रमाणयति, **जातीः** जन्मानि.

प्रावृतो नीलवस्त्रेण यस्तु मां प्रतिपद्यते।
शतानि पञ्चवर्षाणि कृमिः भूत्वा स तिष्ठति।।१०।।(वरा.पुरा.१३४।४)

नीलम् अत्यन्तमलिनम्.

अविधानेन वा स्पृश्य यस्तु माम् उपसर्पति।
स मूर्खः पापकर्मा वै मम विप्रियकारकः।।
तेन इदं तु वरारोहे गन्धमाल्यं सुगन्ध्यपि।
प्रापणं च न गृह्णामि मिष्टं वापि कथञ्चन।।११।।

(वरा.पुरा.१३४।७,८)

स्पृश्य आचम्य **प्रापणं** नैवेद्यम्.

व्यभिचारं च मे कृत्वा यो हि माम् उपसर्पति।
दशवर्षसहस्राणि दशवर्षशतानि च।।
कृमिः भूत्वा यथान्यायं तिष्ठते पुरुषाधमः।।१२।।(वरा.पुरा.१३४।२७)

व्यभिचारो अत्र तत्पूजामध्ये देवान्तरपूजनम्.

यस्तु क्रोधसमायुक्तो मम कर्मपरायणः।
स्पृशेत्तु मम गात्राणि चित्तं कृत्वा चलाचलम्।।
नच अहं योगम् इच्छामि क्रुद्धस्य च यशस्विनि।
इच्छामि शान्तं दान्तं वै भूमि भागवतं शुचिम्।।
अन्यच्च ते प्रवक्ष्यामि तत् श्रुणुष्व वसुन्धरे।(वरा.पुरा.१३४।३१,३२)
योनिदोषांश्च लभते क्रुद्धो भागवतोऽशुचिः।।
मूषको अब्दशतं यावत् सर्पो वर्षशतं पुनः।
त्रिंशद्वर्षाणि मण्डूकः शृगालो जायते पुनः।।१३।।(?)

अकर्मण्येन पुष्पेण यो माम् अर्चयते नरः।
पतनं तस्य वक्ष्यामि तत् श्रुणुष्व वसुन्धरे।।
नाहं तत् प्रतिगृह्णामि नच एते च मम प्रियाः।
पतन्ति नरके घोरे रौरवे तदनन्तरम्।।१४।।(वरा.पुरा.१३४।६०-६२)

अकर्मण्यं विष्णुपूजा[६] निषिद्धम्.

रक्तवस्त्रेण संयुक्तो यस्तु माम् उपसर्पति।

रजस्वलासु नारीषु रजो यत्र प्रवर्तते।।

तेन असौ रजसा स्पृष्टः कर्मदोषेण जायते।।१५।।(वरा.पुरा.१३५।३१,३२)

रजसा इति रजस्वलायाम् आधानेन जायते इति अर्थः.

यस्तु माम् अन्धकारेऽपि विना दीपेन सुन्दरि।

स्पृशते च विना मन्त्रैः अवशो रागमोहितः।।

पतनं तस्य वक्ष्यामि तत् श्रुणुष्व वसुन्धरे।

यस्य क्लेशं समासाद्य क्लिश्यते च नराधमः।।

अन्धो भूत्वा महाभागे जन्मैकं सतु तिष्ठति।

सर्वाशी सर्वभक्षो वै मानवश्चैव जायते।।१६।।(वरा.पुरा.१३५।८-१०)

यस्तु कृष्णेन वस्त्रेण मम कर्मपरायणः।

भूमि कर्माणि कुर्वीत तस्य वै पतनं श्रुणु।।

घुणश्च पञ्चवर्षाणि काष्ठभक्षश्च जायते।।१७।।(वरा.पुरा.१३५१६,१७)

कृष्णं कज्जलाभम्.

वायसोद्धूतवस्त्रेण यो मे कर्माणि कारयेत्।

शुचिः भागवतो भूत्वा मम कर्मानुसारतः।।

सो अस्मिन् पतति संसारे वायसोच्छिष्टहारकः।।१८।।

(वरा.पुरा.१३५।२३,२४)

कारयेत् करोति इति अर्थः.

शुनोच्छिष्टन्तु यो दद्याद् मम कर्मपरायणः।

श्वाचैव सप्तवर्षाणि शशो जायेत पञ्च च।।१९।।

(वरा.पुरा.१३५।३३,३४)

दद्याद् मह्यम् इति अर्थः.

भुक्त्वा वराहमांसन्तु यस्तु माम् उपसर्पति।(वरा.पुरा.१३५।४०)

वराहो दशवर्षाणि भूत्वा वै चरते वने।।२०।। (वरा.पुरा.१३५।४१)

जालपादं भक्षयित्वा यस्तु माम् उपसर्पति।

जालपादः ततो भूत्वा वर्षाणि दशपञ्च च।।

कुम्भीरो दशवर्षाणि शतं वर्षाणि कच्छपः।।२१।।(वरा.पुरा.१३५।५२)

जालपादः शरालिः.

स्पष्ट्वा तु दीपकं सुभ्रूः यस्तु मां स्पृशते नरः।

अप्रक्षाल्यैव हस्तौ च मम कर्मपरायणः।।(?)

जायते षष्ठिवर्षाणि कुम्भीगात्रपरिप्लुतः।

चाण्डालस्य गृहे तत्र एवम् एतद् न संशयः।।२२।।(वरा.पुरा.१३६ । २)

गात्रपरिप्लुतो गलन्मदः.

स्मशानं यो नरो गत्वा अस्नात्वा माम् उपसर्पति।

जम्बूको जायते भूमि वर्षाणि नवपञ्च च।

गृध्रश्च सप्तवर्षाणि जायते खचरः तथा।।२३।।(वरा.पुरा.१३६।८,९)

पिण्याकं भक्षयित्वा तु यस्तु माम् उपसर्पति।

उलूको दश वर्षाणि बकश्चैव स मानवः।।

जायते पुरुषः तत्र मम कर्मपरायणः।।२४।।(वरा.पुरा.१३६।५२)

पिण्याकः तिलखलिः.

यो वै वराहमांसेन मम कुर्वीत प्रापणम्।

तस्माद् दोषात् प्रपद्येत संसारं च वसुन्धरे।।

यावन्मात्राणि वाराह-गात्ररोमाणि सन्ति हि।

तावद्वर्षसहस्राणि नरके पतते अशुभे।।

यावन्ति तत्र सिक्थानि भाजनेषु स्थितानि वै।

तावद्वर्षसहस्राणि सौकरीं योनिम् आप्नुयात्।।२५।।

(वरा.पुरा.१३६।५६-६१)

प्रापणं नैवेद्यम्. **सिक्थानि** मांसप्रलेहबिन्दवः.

मद्यपस्तु समासाद्य प्रविशेद् भवनं मम।

दशवर्षसहस्राणि दरिद्रो जायते पुनः।।

यस्तु भागवतो भूत्वा कामरागेण पीडितः।

दीक्षितो वा पिबेत् मद्यं प्रायश्चित्तं न तस्य वै।।२६।।

(वरा.पुरा.१३६।७०,७१)

समासाद्य गृहीत्वा पीत्वा स्पृष्ट्वा वा इति शूद्रविषयो निषेधः ‘‘प्रसक्तः प्रतिषिध्यते न अप्रसक्तः’’ इति न्यायात्.

यः पारक्येन वस्त्रेण अवधूतेन च अवनि।
प्रावारयेत् तु मां मूर्खो मम कर्मपरायणः।।
मृगो जायेत सुश्रोणि वर्षाणि त्रीणि सप्त च।।२७।।

(वरा.पुरा.१३६।८०,८१)

पारक्येन परकीयेन. **अवधूतेन** अशुचिना.

अदत्वा यो नवान्नानि मम कर्मपरायणः।
भुंक्ते भूमि नवान्नानि परदत्तानि कानिचित्।। (वरा.पुरा.१३६।८८)
पितरः तस्य न अश्नन्ति दशवर्षाणि पञ्च च।।२८।।(वरा.पुरा.१३६।९०)

अदत्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति।
मृतोऽसौ जायते भूमि यातुधानो न संशयः।।२९।।(वरा.पुरा.१३६।९६)

उपानद्दृढपादस्तु मम स्थानं विशेत्तु यः।
चर्मकारस्तु जायेत स वर्षाणि त्रयोदश।।
ततो जन्मपरिभ्रष्टः शूकरो जायते नरः।।३०।।(वरा.पुरा.१३६।१०१,२)

भेरीशब्दम् अकृत्वा तु यस्तु मां प्रतिबोधयेत्।
बधिरो जायते भूमि एकं जन्म न संशयः।।३१।।(वरा.पुरा.१३६।१०६)

भेरी इति वाद्योपलक्षणम्.

प्रभूतम् अन्नं भुक्त्वा वै अजीर्णेन परिप्लुतः।
उद्गारेण समायुक्तो यस्तु माम् उपसर्पति।।
जन्मैकं तु भवेत् श्वा वै जन्म चैकं तु वानरः।।३२।।(वरा.पुरा.१३६।११०)

तथा वाराहे

''अवैष्णवस्य पक्वान्नं यो मह्यं विनिवेदयेत्।

अवैष्णवेषु पश्यत्सु मत्पूजां विदधाति यः।।

दिनान्तरितपक्वान्नं यो मह्यं विनिवेदयेत्।

भूताष्टम्योर्न कुरुते नक्तं न हरिवासरम्।।

उरुभूँ कपलाशस्थैः पुष्पैः कुर्यात् मम अर्चनम्''

इत्यादि अन्येऽपि सन्ति. न ते ग्रन्थगौरवात् लिख्यन्ते. **पक्वान्नं** सिद्धान्नम् इह.

तथा नारसिंहे नरसिंहनिर्माल्यलंघन-भग्नदिव्यरथारोहणशक्तिं शन्तनुं प्रति नारदवाक्यम्.

''अतःपरं तु निर्माल्यं न लंघय महीपते

नरसिंहस्य देवस्य तथा अन्येषां दिवौकसाम्''

इत्यपि सदाचारचन्द्रोदये उक्तम्. अत्र ''मम क्षेत्रेषु तिष्ठति'' इति श्लोके 'क्षेत्र'पदं भगवन्मन्दिरपरं नतु ग्रामादिपरम्, मथुरादिवासबोधकवाक्यस्य विरोधप्रसङ्गात्, तत्रत्यानां सर्वदापराधप्रसङ्गात् च. यत्पुनः 'शुनोच्छिष्टम्' इति उक्तं तत् ''श्वामृगग्रहणे शुचिः'' इति वाक्योक्तशुचित्वस्यापि निवारकम्, अन्यथा तत्प्रसक्त्यभावात्, अग्रे मांसप्रकरणात् च. यद् गन्धमाल्यसमर्पणात् पूर्वं धूपदानस्य अपराधत्वम् उक्तं तत् षोडशोपचारैः पूजाकरणएव, उपचाराणां क्रमस्य तत्रैव दर्शनात्, नतु भक्तिमार्गे, तत्र क्रमस्य अनुक्तत्वाद् इति. तथा भेरीघोषं विना भगवत्प्रबोधनस्य अपराधत्वम् उक्तम्. तस्यतु तादृशाढ्यं प्रत्येव तथात्वं, नतु अशक्तं प्रति. अतो घण्टादिवादनादपि तदभावः तस्य सिध्यति इति प्रागेव उक्तम्. एवं दिनान्तरित-पक्वान्नार्पणस्यापि शक्तं प्रत्येव तथात्वं बोध्यम्. भूताष्टम्योः नक्तकरणाभावस्यतु पातिव्रत्यव्रतं प्रति न अपराधत्वम्, तस्य जन्माष्टम्यादिव्रतपञ्चकस्यैव पाद्मे उक्तत्वात्. अन्ये तु त्याज्याएव. नारसिंहोक्त-निर्माल्योङ्घनस्यतु न अपराधत्वम्, तदुपक्रमोपसंहारे च 'अपराध'पदाभावात्, किन्तु पापत्वं, निषिद्धत्वात्. तत्रापि शनि-भौमादिक्षुरकर्मवद् ऐहिकदोषजनकत्वमेव नतु पातः. नारसिंहे ऐहिकानिष्टमात्रजनकत्वस्यैव उक्तत्वात्, नतु पातकत्वम्. किन्तु 'निर्माल्यं' नाम निर्गतं माल्यं नतु नैवेद्यशेषः, तत्र निर्माल्यव्यवहारस्य शास्त्रेषु अदर्शनत्. यदितु न्यायसाम्येन श्रीजगन्नाथप्रसादापचारदृष्टान्तेन वा तस्यापि अपराधत्वम् अङ्गीक्रियते तदापि भोगोत्सारणादि-सेवाकरण-व्यतिरिक्त-दशायामेव अपराधजनकम्, राजोपचारेण सेवाकरणे भोगबाहुल्येन तदुत्सारणदशायां तदुल्लंघनस्य निवारयितुम् अशक्यत्वात्.

तद्भीतिप्राचुर्ये च बहुभोगासमर्पणापत्त्या महाराजोपचारबोधक–वाक्यबाधकप्रसक्तेः च, ''शक्तौ गौणोपचारश्च'' इति उक्तस्य अपराधान्तरस्य प्रसक्तेश्च. तस्माद् अन्यदेव अपराधत्वम्. तदानीमपि तस्य अपराधत्वाङ्गीकारे तु

''यत् कीर्तनं यत् स्मरणं यद् ईक्षणं यद् वन्दनं यत् श्रवणं यद् अर्हणं
जनस्य सद्यो विधुनोति किल्बिषं तस्मै सुभद्रश्रवसे नमो नमः''

(भाग.पुरा.२।४।१५।)

इति द्वितीयस्कन्धवाक्ये षण्णां भक्तीनां सद्यः पापनाशकत्वेन कथनात् तदनन्तरभाविभिः तैः तन्निवृत्तिसिद्धेः च. तस्मात् तस्य प्रायिकत्वमेव इति निश्चयः. ये पुनः वराहपुराणएव निरपराधः सापराधः च पुरुषः कथं पूजाफलं प्राप्नोति इति धरिणीप्रश्ने

''कर्मणा मनसा वाचा पापरूपाश्च ये जनाः,
अपराधगृहीतास्ते विपरीतास्तु साधवः,
अज्ञानाच्च प्रमादाच्च येषां पापमथान्तरम्,
प्रायश्चित्तं दहेत् सर्वम् अपराधमलोत्थितम्''

(वराहपुरण १७७।३,४)

इति द्वाभ्यां प्रायश्चित्तानधिकारिणः तदधिकारिणश्च उक्त्वा त्रयस्त्रिंशदपराधाः उक्ताः–

भक्षणं दन्तकाष्ठस्य राजान्नस्य च भोजनम्।
मैथुनं शवसंस्पर्शं पुरीषोत्सर्गमेव च।।
श्रुतश्चैवात्यतीतानां स्पर्शनं मेहनं तथा।
अभाष्यभाषणं कोपः पिण्याकस्य च भक्षणम्।।
रक्तपारक्यमलिन–वस्त्रधारित्वनीलिजम्।
गुरोश्चालीकनिर्बन्धं पतितान्नस्य भक्षणम्।।
अभक्ष्यभक्षणं चैव तन्दुलीयबिभीषणम्।
अनिवेद्य नवान्नस्य जालपादवराहयोः।।
भक्षणं देवातागारे सोपानत्कोपसर्पणम्।
तथैव देवपूजार्थम् अकर्मण्यैः मम अर्चनम्।।
अनिर्माल्यस्य वै विष्णोर् नमस्करणमेव च।
पानं सुरायाः, देवस्य विना तूर्यं प्रबोधनम्।।
वातकर्म अर्चने विष्णोः पूजा वार्णान्धकारयोः

अपराधान् त्रयस्त्रिंशत् कृत्वा विष्णुं न पश्यति।।(वरा.पुरा.१७७।५-११)

इति. अत्र दन्तकाष्ठस्य भक्षणम् अपराधत्वेन उक्तम्. तच्च निषिद्धदिने इति भाति, पूर्वं तदखादनस्य तथात्वेन उक्तत्वात्. नीलिजम् इति अत्र द्वयोः संग्रहः उत्तरद्ग्रन्थाद् भाति. ''तन्दुलीयबिभीषणम्'' इति अत्र तन्दुलीयस्य भक्षणम् इति पाठो भाति, भक्षणप्रायपाठात्. अपराधद्वयन्तु त्रुटितम्. आरम्भतो गणनेऽपि एकत्रिंशतामेव भवनेन त्रयस्त्रिंशत्संख्यायाः अपूर्तेः इति. एतदग्रे प्रायश्चित्तमपि स्वल्पम् उक्तम्.

एकरात्रं द्विरात्रं च त्रिरात्रं स्नानमेव च।
सामभिः पञ्चगव्याशी मम वस्त्राङ्कितः क्रमात्।।
नीलीरङ्गापनोदार्थं गोमयेन प्रघर्षणम्।
प्राजापत्येन शुद्ध्येत नीलीसूत्रस्य धारणे[१०]
चान्द्रायणद्वयं कुर्याद् गुरोः क्षपित उत्तमम्।[११]
चान्द्रायणं पराकं[१२] **च पतितान्नस्य भक्षणे।।**[१३]
चान्द्रायणं पराकं च प्राजापत्यं तथैव च।
गोप्रदानं च भोज्यं च अभक्ष्याभक्षणे कृते।।
कृतोपवासः पञ्चाहं पञ्चगव्येन शुद्ध्यति।
सोपानत्कश्चरेत् पादं कृछ्रस्य द्विजभोजनम्।।
पुष्पाभावे अर्चनं स्नानं देवस्यैव च कारयेत्।
अनिर्माल्यमनस्कारे स्नानं पञ्चामृतेन तु।।
सुरापाने द्विजातीनां चान्द्रायणचतुष्टयम्।
अथैवं द्वादशानां च प्राजापत्यं त्रयं चरेत्।।
ब्रह्मकूर्चेन शुद्धिः स्याद् गोप्रदानत्रयेण च।
त्रयाणाम् एकरात्रेण पञ्चामृताभिषेचनात्[१४]**।।**
मुच्यते च अपराधैस्तु तथा विष्णुस्तवान् पठ।

(वराहपुरण १७७।१२-२०)

नित्यं [१५]च एतत्प्रायश्चित्तं च उक्तम्. तत्र ''वस्त्राङ्कितः क्रमाद्'' इति रक्तपारक्यमलिनवस्त्राङ्कितः. ''चान्द्रायणं पराकं च'' इत्यादिभिः ''पञ्चगव्येन शुद्ध्यति'' इति अन्तैः अभक्ष्यभक्षणादीनां पञ्चानां प्रायश्चित्तम् उक्तम्. ''अनिर्माल्यमनस्कारे'' इति अत्र 'नमस्कारो' इति पाठो भाति. ''चिन्ताभोगो 'मनस्कार''' इति कोशात्. चिन्ताभोगः चित्तस्य तदेकप्रवणत्वं पूर्णता वा. उचितं च

एतत्. चित्तस्य भगवदनिर्माल्यभोगपरत्वे यद् अपराधत्वं द्वादशानाम् इति अत्र आदितो दश विना तूर्यम् इत्यादिद्वयं च इति द्वादशानां त्रयाणाम् इति अत्र [१६]वातकर्माणान्धकारपूजानां त्रयाणां प्रायश्चित्तम् उक्तम् इति बोध्यम्. एवं स्वल्पप्रायश्चित्ते श्रुतेऽपि मुहूर्तमात्रं विसञ्ज्ञा सती धरिणी यदि सञ्ज्ञां लब्धवती तदा पुनरपि

''अपराधे कृते देव पातकी नहि जायते,
प्रायश्चित्तातिभीरूणि दुश्चराणि नरैः सदा,
तेन वै मानसं दुःखं येन मोहः समन्वितः''(वरा.पुरा.१७७।२३)

इति स्वावस्थां दर्शयित्वा

''अस्ति कश्चिद् उपायो अत्र येन त्वं नृषु तुष्यसि,
पूजितः सफलश्चासि अपराधविशोधनात्'' (वरा.पुरा. १७७।२४)

इति प्रश्ने कृते कुब्जाम्रकं सूकरक्षेत्रं मथुरा च इति त्रयाणां प्रशंसाम् उक्त्वा, सर्वेभ्योऽपि मथुरायाम् उत्कर्षम् उक्त्वा, तत्र स्थितिः प्रायश्चित्तत्त्वेन उक्ता. ततो अग्रे व्रतजागरोपवास–पूजासहिता प्रबोधिनी मोक्षप्रदत्वेन उक्ता. तेन सैव सर्वप्रायश्चित्तत्वेन सिध्यति. एतेषाम् अपराधानां यद्यपि पूजाकर्मशेषत्वेन त्याज्यत्वं तथापि आचार्यैः निबन्धे सेवाप्रकरणे **''स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनम्, इन्द्रियाश्वविनिग्राहः सर्वथा न त्यजेत्**'' (तत्त्वा.दी.निब.२।) इति आज्ञापनात्, सप्तमस्कन्धेऽपि **''विधर्मः परधर्मश्च आभास उपमाच्छलः, अधर्मशाखाः पञ्चेमा धर्मज्ञो अधर्मवत् त्यजेत्''** (भाग.पुरा.७।१५।१२) इति कथनाच्च पूजाकर्मशेषत्वेन अत्र तत्त्याज्यत्वाभावेऽपि तत्त्यागस्य सेवाङ्गत्वात् तेषामपि त्याज्यत्वं बोध्यम्.

रामार्चनचन्द्रिकायाम् आगमे–

यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे।
देवोत्सवाद्यसेवा च अप्रणामः तदग्रतः।।
उच्छिष्टे वा अथवा आशौचे भगवद्वन्दनादिकम्।
एकहस्तप्रणामस्तु तत्पुरस्तात् प्रदक्षिणम्।।
पादप्रसारणं चाग्रे तथा पर्यङ्कबन्धनम्।
शयनं भक्षणं चापि मिथ्याभाषणमेव च।।
उच्चैर्भाषा मिथो जल्पो रोदनानि च विग्रहः।
निग्रहानुग्रहौ चैव नृषु च क्रूरभाषणम्।।
कम्बलावरणं चैव परनिन्दा परस्तुतिः।
अश्लीलभाषणं चैवम् अधोवायुविमोक्षणम्।।

शक्तौ गौणोपचारस्तु अनिवेदितभक्षणम्।
तत्तत्कालोद्भवानां च फलादीनाम् अनर्पणम्।।
विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनादिके।
पृष्ठीकृत्यासनं चैव परेषाम् अभिवादनम्।।
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा।
अपराधाः इमे विष्णोः द्वात्रिंशत् परिकीर्तिताः।।

(नारदपञ्चरात्रम् चतुर्थरात्रे एकादशे अध्याये १०-१७)

अत्र ''उच्छिष्टे वा अथवा आशौचे'' इति अत्र 'उच्छिष्ट'पदेन ऊर्ध्वोच्छिष्टादित्रयं बोध्यम्. 'आशौच'पदेन च चाण्डालादिस्पर्शजन्यम् अशुचित्वं ग्राह्यम् इति प्रतिभाति.

सदाचारचन्द्रोदये मदनपारिजाते

''शैवी वा वैष्णवी दीक्षा यस्य च अग्निपरिग्रहः,
यतिश्च ब्रह्मचारी च नाशौचं तस्य विग्रहः'' (ब्रह्मा.पुरा. ।।।)

इति ब्रह्माण्डवचनात्.

''जपो देवार्चनविधिः कार्यो दीक्षासमन्वितैः,
आशौचं नैव विद्येत सूतके मृतके तथा''.

जपो अत्र इष्टमन्त्रस्य, देवार्चनम् इष्टदेवपूजा. अस्पृश्याशौचे सोऽपि मानसः. सापि[१७] अस्पर्शवतीति शिष्टा इति व्यवस्थापनात्. तेन जननाशौचे भगवत्स्पर्शादिकं पूजां च ये[१८] कुर्वन्ति, मृताशौचे दूरतएव भगवद्दर्शनं नमस्कारं च यत् कुर्वन्ति तद् युक्तमेव. अथवा वन्दनादिपदेन पूजानिकटपरिचर्या च ग्राह्या नतु श्रवणस्मरणादिकमपि. आसुरभावप्रवेशाभावार्थं तेषां सर्वदा कर्तव्यत्वस्य **''जप्यो नारायणः सदा''** (।।।) **''स्मर्तव्यो सततं विष्णुः''** (।।।) इत्यादिभिः बोधनात्. एवं ''तत्पुरस्तात् प्रदक्षिणम्'' इति अत्रापि भगवन्मन्दिरे प्रदक्षिणास्थलाभावे आत्मप्रदक्षिणं ये[१९] केचित् कुर्वन्ति तस्य अपराधत्वं बोध्यते. पर्यङ्कबन्धनं नाम सर्वतः उत्सङ्गदेशस्य बन्धनं तेन च वस्त्रादिना योगपट्टेन हस्ताभ्यां वा भगवदग्रे पादौ सङ्कोच्य उत्सङ्गबन्धनस्य अपराधत्वं बोध्यते, अविनयापादकत्वात्. तेन प्रौढपादोपवेशनस्यापि तथात्वं भाति. मिथो जल्पस्य तु लौकिकविषयस्यैव अपराधत्वं नतु भगवद्विषयस्य. **''येऽन्योऽन्यतो भागवताः प्रसज्य सभाजयन्ते मम पौरुषाणि''** (भाग.पुरा.३।२५।३४) इत्यादिवाक्येभ्यः तस्य फलानुकूलत्वात् फलत्वात् च इति बोध्यम्. कम्बलावरणम् इति अत्र शिष्टाः भगवदावरणं

तथात्वेन मन्यन्ते, स्वयन्तु निकटपूजायां न कुर्वन्ति. शेषन्तु स्फुटम्.

एतेषां निवृत्युपायस्तु तत्रैव उक्तः.

अपराधसहस्राणि क्रियन्ते अहर्निशं मया।
दासोऽयम् इति मां मत्वा क्षमस्व परमेश्वर।।
इति मन्त्रं समुच्चार्य प्रणमेद् दण्डवद् भुवि।
अपराधसहस्राणि क्षमते सर्वगो हरिः।।
एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय।।

इति पाण्डवगीतावचनञ्च उक्तम्.

अथ हरिवल्लभसुधोदयस्थाः अथ नारदपञ्चरात्रोक्ताः षट्षष्टि अपराधाः–

प्रोच्यन्ते पञ्चरात्रोक्ताः श्रुता ये भगवन्मुखात्।
नारदेन ततश्च उक्ताः कुमारान् प्रति सादरम्।।
विष्णुसेवनदार्ढ्याय तथा तत्तोषणाय च।

श्रीनारद उवाच

श्रुणु ब्रह्मन् प्रवक्ष्यामि वैष्णवानां हिताय च।
श्रुता नारायणमुखाद् अपराधा मया पुरा।।
ते त्याज्या वैष्णवैः पुण्यैः विष्णुसेवनतत्परैः।
संख्याताः षष्टिषट् चैव ते प्रोच्यन्ते अधुना मया।।
अश्रद्धा वैष्णवे शास्त्रे श्रद्धायुक्ताहि अवैष्णवे।
तथा सर्वेश्वरं विष्णुं मन्यन्ते [२०]निर्जरैः समम्।।
श्लोकार्धं श्लोकपादं वा नास्ति भागवतं गृहे।
शिलाधीः कृष्णश्रीमूर्तौ गुरौ ये नरबुद्धयः।।
वैष्णवे जातिधीः येषां ते अपराधपराः जनाः।
विष्णोर्वा वैष्णवानां च पादतीर्थे अम्बुबुद्धयः।।
विष्णोर्वा वैष्णवानां च शृण्वन् निन्दां च तिष्ठति।
वैष्णवे गृहमायाते सन्मानं ये न कुर्वते।।
हरेः पूजनकाले वा तां दृष्ट्वा यो न पूजयेत्।

पूजनाय कृतस्यापि परिकीर्तनम् आचरेत्।।
पूजयित्वा [२१] तु ये मानं प्रकुर्वन्ति विमोहिताः।
अवैष्णवानां संसर्गं तैः मन्त्रैः वा अर्थलोभतः।।
तेषां प्रसाददानं च जलमन्नादिभक्षणम्।
मुद्रातिलकमालाद्यैः विना स्थितिः कदाचन।।
दशमी वेधसंयुक्तं ये कुर्वन्ति हरेः व्रतम्।
श्रीमद्भागवते ये वै पुराणे तुल्यबुद्धयः।।
येषां स्वरूपभेदोऽस्ति हरेः भागवतस्य च।
न्यासं विना जपन् मन्त्रं विकलाङ्गञ्च वा पुनः।।
तथाच अर्थापरिज्ञानाद् विना ध्यानाच्च वै हरेः।
जपकाले भाषणात् च तथा पार्श्वविलोकनात्।।
पादुकोपानहैः यानैः ये गच्छन्ति हरेः गृहम्।
तिर्यक्पुण्ड्रधरा भूत्वा ये कुर्वन्ति मम अर्चनम्।।
ऊर्ध्वपुण्ड्रं परित्यज्य तिर्यक्पुण्ड्रधराः च ये।
अचक्राङ्कितपक्वान्नं यश्च मह्यं निवेदयेत्।।
अवैष्णवफलं मूलं पत्रं पुष्पं तथा जलम्।
अन्नं चैव अर्पयेत् मह्यं महताम् अपराधकृत्।।
सर्वोत्तमे हरेः नाम्नि हि अर्थवादेतिबुद्धयः।
नाम्नो बलाच्च पापानि ये कुर्वन्ति विमोहिताः।।
नीलीक्षेत्रं वापयन्ति तस्या विक्रयकारकाः।
तद्रञ्जितेन वस्त्रेण ये कुर्वन्ति मम अर्चनम्।।
तथा तद्रङ्गितं वस्त्रं स्वयं च धारयन्ति ये।
ब्रह्महत्यादिदोषघ्ने प्रसादे हि अन्नबुद्धयः।।
भुक्त्वा च तत्प्रसादान्नम् उच्छिष्टं परिमुञ्चति।
मदुत्सवे पर्वबुद्धिः येषां क्वापि प्रजायते।।
शक्तौ गौणोपचारं ये मत्पूजां कल्पयन्ति हि।
येषां वन्ध्यो हि दिवसो भागवतश्रवणं विना।।
यथा हरिस्तथा पूजा येषां नो विद्यते गुरौ।
यथा हरिः तथा तस्य पूजा येषां न विद्यते।।
मद्रूपगुणनामानि जन्मकर्माणि यानि च।
मायामया विजानाति ते अपराधमहत्कृताः।।

अपराधेषु सर्वेषु षडेते सर्वतो अधिकाः।
गुरोः निन्दा सतां निन्दा निन्दा भागवतस्य च।।
श्रीभागवतधर्माणां हरेः नाम्नां तथैव च।
[२२]**मानुषं जनुरासाद्य खण्डे भारतसञ्ज्ञके।।**
गुरुकर्णधारं सम्प्राप्य न तरन्ति भवार्णवम्।
अपराधपरास्ते हि सर्वेषाम् अधिका मताः।।
एतद् मया गुह्यतमं नारायणमुखात् श्रुतम्।
निरापराधो भवति सकृत् श्रुत्वापि केवलम्।।
किं पुनः श्रद्धया भक्त्या हि अपराधान् विहाय च।
ये कुर्वन्ति हरेः सेवां सदा सर्वेश्वरस्य च।।
अपराधसहस्राणि क्रियन्ते अहर्निशं मया।
'दासोऽयम्' इति मां मत्वा क्षमस्व परमेश्वर।।

इति. अत्र अश्रद्धा वैष्णवे इति न विद्यते श्रद्धा येषां ते इति बहुव्रीहिः द्रष्टव्यः. वैष्णवे जातिधीः येषाम् इति अत्र वैष्णवे भगवद्धर्मवति तद् अनादृत्य उत्कर्षापकर्षप्रयोजिका तज्जातिबुद्धिः ज्ञातव्या. तत्र भगवत्सम्बन्धात् कृतस्य उत्कर्षस्य तस्य[२३] अभानाद् इति. संसर्गम् इति अस्य ''प्रकुर्वन्ति विमोहिताः'' इति अनेनैव सम्बन्धः. तथाच अवैष्णवमन्त्रसंसर्गएव अपराधः इति अर्थः. ''तैः मन्त्रैः'' वा इति अस्य 'संसर्ग'पदेन सम्बन्धः. अथ लोभतः इत्यस्य तेषां प्रसाददानम् इति अनेन सम्बन्धः. लोभो अत्र द्रव्यादिविषयकः. तेन भीत्या वा अनिष्टनिवृत्तिबुद्धया वा दानं न अपराधः इति भाति. जलम् इति अत्र पानं विनापि तेषां जलसंसर्गस्यैव अपराधत्वं बोध्यते. स्थितिः कदाचन इति सेवाव्यतिरिक्तसमयेऽपि इति बोध्यते. जपमन्त्रम् इति पदद्वयम् अग्रेऽपि त्रिषु सम्बध्यते. अत्र न्यासं विना इति यस्य न्यासः उक्तो अस्ति तम् इति बोध्यम्. तेन भक्तिमार्गीयमन्त्रजपे न्यासाभावो[२४] न दोषः, तत्र तदनुक्तेः. शेषन्तु मन्त्रमात्रे जपकाले भाषणाच्च इति वाक्यद्वयेऽपि अपराधो अस्ति इति शेषो बोध्यः. अचक्राङ्कितपक्वान्नम् इति तु अन्नकूटविषयम् इति प्रतिभाति, तत्रैव भक्तपाकोपरि चक्रधारणशिष्टाचारात्. अवैष्णवफलम् इति अत्र अर्पणम्. प्रत्येकं मदपराधरूपम्. महताम् अपराधकृद् इति भिन्नो अपराधः. ''तद्रङ्गितेन वस्त्रेण'' इति अत्र नीलीरङ्गितवस्त्रं पट्टभिन्नं चित्रभिन्नं वा इति प्रागेव व्युत्पादितम्. तेन हरितवर्णवस्त्रे नीलीहरिद्रावयवमेलनेन चित्रप्रायत्वमिति अदोषः. ''**वर्णश्च मे हरिच्चेष्टः तस्माद् हरिरहं स्मृतः**'' इति महाभारते भगवद्वाक्ये प्रियत्वबोधनात् च इति ज्ञेयम्. शेषं स्फुटम्. तदेतत् सर्वं प्रसङ्गाद् विचारितम्.

श्रीमत्प्रभुचरणैः तेभ्यो अन्ये भक्तिमार्गीया द्वात्रिंशद् अपराधाः निरूपिताः तदुत्तरं च एते द्वात्रिंशदपराधाः ते भक्तिमार्गस्थेन न कर्तव्याः. करणे अनिष्टप्राप्तिः इति उक्तम्. तत्र कस्मात् का अनिष्टप्राप्तिः इति विवेक्तुं ते विव्रियन्ते.

तत्र आदौ

गुरौ भेदबुद्धिः प्रथमो अपराधः॥१॥

सतु स्वस्य भगवन्मार्गोपदेष्टरि ''**मदभिज्ञं गुरुं शान्तम् उपासीत मदात्मकम्**'' (भाग.पुरा.११।१०।५) इति एकादशे भगवद्वाक्याद् अभेदबुद्धिरेव कर्तव्या इति तत्र भगवद्भिन्नत्वज्ञानं प्रथमो अपराधः.

अयञ्च नारदपञ्चरात्रेऽपि उक्तः ''**गुरौ ये नरबुद्धयः**'' इति. एतेन गुरुपूजाभावोऽपि संगृहीतः. एतत्करणे

''**यस्य देवे परा भक्तिः यथा देवे तथा गुरौ**
तस्य एते कथिताः हि अर्थाः प्रकाशन्ते महात्मनः'' (श्वेता.उप.६।२३)

इति श्रुत्युक्तगुरुभक्तिभङ्गात्.

''**यस्य साक्षाद् भगवति ज्ञानदीपप्रदे गुरौ,**
मर्त्याऽसद्धीः कृतं तस्य मन्ये कुञ्जरशौचवत्'' (भाग.पुरा.७।१५।२६)

इति वाक्योक्तसत्कृतिवैय्यर्थ्यात् च भगवज्ज्ञानाभाव-रूपानिष्टप्राप्तिः.

आत्मसमर्पणं विना सेवाकरणम्॥२॥

एतत्करणे चेतनाचेतनेषु वस्तुषु स्वाभिमानानपायाद् भगवता तत्सेवानङ्गीकृतौ ''**एवंधर्मैः मनुष्याणाम् उद्धव आत्मनिवेदिनाम्**'' (भाग.पुरा.११।१९।२४) इति भगवदुक्तभक्त्यनुत्पत्तिरूपानिष्टप्राप्तिः.

भगवन्नाम्नि साधरणाक्षरबुद्धिः॥३॥

अयमपि पञ्चरात्रे उक्तः ''**सर्वोत्तमे हरेः नाम्नि हि अर्थवादेति बुद्धयः**'' इति एतत्करणे.

''**नाम चिन्तामणिः कृष्ण-चैतन्यरसविग्रहः**
पूर्णः शुद्धो नित्यमुक्तो अभिन्नत्वाद् नामनामिनोः''

इति हरिवल्लभसुधोदयस्थ-पाद्मवाक्योक्तस्य तेषाम् अखण्डशब्द-ब्रह्मात्मकत्वस्य अज्ञानेन

''सतां निन्दां नाम्नां परमम् अपराधं वितनुते,
यतः ख्यातिं यातः कथमु सहते तद्विगणनाम्,
शिवस्य श्रीविष्णोः य इह गुणनामादिसकलं,
धिया भिन्नं पश्येत् स खलु हरिनामाहितकरः''

इति तत्रैव पाद्मे नारदं प्रति सनत्कुमारवाक्यात्. ततः सवासन–पापक्षयरूप–निष्पावनाभावात्मकानिष्टप्राप्तिः तद् मुख्यफलाप्राप्तिः च.

''सर्वापराधकृदपि मुच्यते हरिसंश्रयः,
हरेरपि अपराधान्यः कुर्याद् द्विपदपांसनो
नामाश्रयः कदाचित् स्यात् तरत्येव स नामतः,
नाम्नोऽपि सर्वसुहृदोतु अपराधात् पतति अधः''

इति वाक्यात् पातोऽपि.

एते अत्र यो अग्रे महापराधमध्येऽपि गणिताः

गुर्वाज्ञोल्लङ्घनम्।।४।।

''ये गुर्वाज्ञां न कुर्वन्ति पापिष्ठाः पुरुषाधमाः,
न तेषां नरकक्लेशनिस्तारो मुनिसत्तम''

इति साधनदीपिकायाम् अगस्त्यसंहितावाक्याद् नरकप्राप्तिरूपा अनिष्टप्राप्तिः.

गुर्वासनादिस्थितिः।।५।।

''गुरुशय्यासनं यानं पादुकोपानहादिकं,
स्नानोदकं तथा छायां लंघयेद् न कदाचन''

इति रामार्चनचन्द्रिकायाम् आगमवाक्यात् तत्करणे अवज्ञायां गुरुभक्ति–भङ्गरूपानिष्टप्राप्तिः.

वेदाज्ञात्यागः।।६।।

अत्र 'वेद'पदेन पुराणपञ्चरात्रयोरपि वेदमूलकयोः संग्रहाद् वाराहपुराणस्य भगवच्छास्त्रत्वात् च तदुक्तापराधाः त्याज्यत्वेन संगृह्यन्ते इति बोध्यम्.

''नाचरेद् यस्तु वेदोक्तं स्वयम् अज्ञो अजितेन्द्रियो,
विकर्मणा हि अधर्मेण मृत्योर्मृत्युम् उपैति सः''(भाग.पुरा.११।३।४५)

इति एकादशस्कन्धे आविर्होत्रवाक्याद् अधर्मेण मरणरूपानिष्टप्राप्तिः.

गुर्वमर्यादा।।७।।

''यैः शिष्यैः शश्वदाराध्या गुरवो हि अवमानिताः,
पुत्रमित्रकलत्रादि-सम्पद्भ्यः प्रच्युता हि ते,
इहैव अत्यन्तदुःखानि पश्यन्ति आमुष्मिके किमु''

इत्यादिवचनोक्त्या लोकद्वयेऽपि अनिष्टप्राप्तिः.

सेवाकाले जीवस्तुति-निन्दे।।८।।

इदञ्च रामार्चनचन्द्रिकायामपि अपराधेषु गणितम्. श्रीभागवते **''गुणदोष-दृशिर्दोषो गुणस्तु उभयवर्जितः''** (भाग.पुरा.११।१९।४५) इति एकादशे भगवद्वाक्याद् गुणदोषदृशेः दोषत्वेन स्तुतिनिन्दयोः च तत्प्रयुक्तत्वेन[२५] सेवाकाले तत्करणे कर्तृदोषात् सेवादुष्टत्वापत्तिरूपानिष्टप्राप्तिः.

सेवायां लोकानुकूल्यम्।।९।।

लोकाः जनाः तदानुकूल्यस्य तदपेक्षाप्रयुक्तत्वात् तत्करणे भगवदप्रसादरूपा लौकिकक्लेशरूपा च अनिष्टप्राप्तिः **''लोकार्थी चेद् भजेत् कृष्णं क्लिष्टो भवति सर्वथा''** (सिद्धान्तमुक्तावली १६) इति श्रीमदाचार्यवाक्यात्.

पाषण्डमार्गसंसर्गः।।१०।।

''उपधर्मस्तु पाषण्डः'' (भाग.पुरा.७।१५।१३) इति सप्तमस्कन्धे तल्लक्षणात्. **''तानि पापस्य खण्डानि लिङ्गं 'षण्डम्' इह उच्यते''** (भाग.पुरा. ४।१९।२३) इति चतुर्थस्कन्धे पापलिङ्गत्वोक्तेः च तन्मार्गस्य पेशल-वाग्मित्वादिना संसर्गे पापरूपा बुद्धिभ्रंशरूपा च अनिष्टप्राप्तिः.

भगवद्भोगं विना कृतभोगसामग्रीप्रकाशः।।११।।

तत्करणे सामग्र्याम् अन्यमनसो गमनात् तस्या भगवतानङ्गीकरणात् तद्वैय्यर्थ्यरूपानिष्टप्राप्तिः. इदञ्च पञ्चरात्रेऽपि **''पूजनाय कृतस्यापि परिकीर्तनम् आचरेत्''** इत्यनेन उक्तम्.

सेवायाम् अपशब्दापलापौ।।१२।।

एतत्करणे या अनिष्टप्राप्तिः सातु वाराहपुराणे **''वायुं पुरिषसंयुक्तम्''** इत्यादिभिः उक्ता.

अविश्वासेन भजनम्।।१३।।

अयमपि महापराधमध्ये गणितः. एतत्करणे ब्रह्मास्त्रन्यायाद् भजनवैय्यर्थ्यरूपा अनिष्टप्राप्तिः.

श्रीमदाचार्याविश्वासः।।१४।।

एतत्करणे गुरौ भेदबुद्ध्या अनिष्टं तस्मादपि अधिकं ब्राह्मणश्रमणन्यायाद् अवगन्तव्यम्. अयमपि अग्रे श्रीमदाचार्याज्ञोल्लङ्घनस्य महापराधमध्ये गणनात् तेष्वेव निवेशितः.

स्वमार्गीयसेव्यभगवद्रूपे भेदबुद्धिः।।१५।।

स्वमार्गीयसेव्यः पुरुषोत्तमः. भगवद्रूपं सेव्यमानं तयोः भेदबुद्धौ सत्याम् अयोगोलके वह्निरिव व्याप्त्यनवगमात् तत्र कृतोपचारस्य साक्षाद् अनङ्गीकारएव अनिष्टरूपः तत्प्राप्तिः. अतएव अयमपि महापराधेषु गणितः.

माला-मुद्रा-तिलकरहितसेवाकरणम्।।१६।।

एतत्करणे सेवावैय्यर्थ्यरूपा अनिष्टप्राप्तिः

''**धारयन्ति न ये मालां हैतुकाः पापबुद्धयः**'' इति.

''**शङ्ख ादिचिह्नरहितः**'' इति

''**ऊर्ध्वपुण्ड्रं विना कृतम्**'' इति वाक्येभ्यः.

अनिवेदितभक्षणम्।।१७।।

''**अम्बरीष गृहे पक्वं सदा अभीष्टं यद् आत्मनो**
अनिवेद्य हरेः भुञ्जन् सप्तजन्मनि नारकी''

इति हरिवल्लभसुधोदये पाद्मे गौत्तमवाक्यात्. [२६]एतत्करणे [२७]एतद्वाक्योक्ता अनिष्टप्राप्तिः.

क्लिष्टसमर्पणम्।।१८।।

आत्मक्लिष्टं चित्तक्लिष्टं [२८]परक्लिष्टं च इति क्लिष्टं त्रिविधं निबन्धे निरूपितम्. तत्समर्पणे तस्य पदार्थस्य भगवदनङ्गीकाररूपा अनिष्टप्राप्तिः.

हस्तप्रक्षालनं विना हरिसामग्रीस्पर्शः।।१९।।

अत्रापि हस्तयोः यत्[२९] तत्स्पर्शदुष्टत्वेन तदप्रक्षालनेन पूर्वोक्तदोषः.

कलिङ्ग–मूलादिभक्षणम्।।२०।।

''वृन्ताकं च कलिङ्गं च दग्धम् अन्नं मसूरिका,

उदरे यस्य तिष्ठन्ति तस्य दूरतरो हरिः'' इति.

''यो अर्चयेद् माधवं मूढो भक्षयित्वा तु मूलकम्

अपराधशतं तेन कृतं नात्र विचारणा''

इत्यादिवाक्येभ्यः. अत्र 'आदि'पदेन कलिकाले अभक्ष्याणां तत्तत्तिथौ च अभक्ष्याणाम् अन्येषां च संग्रहः. तद्भक्षणे तत्तद्वाक्योक्तैव अनिष्टप्राप्तिः.

अवैष्णवमुखात् श्रीमद्भागवतश्रवणम्।।२१।।

हरिवल्लभसुधोदये

''मत्कथावाचकं चैव मत्कथाश्रवणे रतम्,

मत्कथाप्रीतमनसं नाहं त्यक्ष्यामि अनन्तरम्''

इति विष्णुधर्मे भगवद्वाक्यात्, अतादृशस्य भगवता त्यागाद्, अवैष्णवस्य भगवति विश्वासाभावेन सर्वोत्कृष्टतन्माहात्म्यज्ञानाभावात् तादृशस्य मुखात् श्रीभागवतश्रवणे तत्तद्वाक्योक्तैव अनिष्टप्राप्तिः. इदञ्च

''अवैष्णवोपदिष्टेन मन्त्रेण नरकं व्रजेत,

पुनश्च विधिना सम्यग् वैष्णवाद् ग्राहयेद् गुरोः''

इति नारदपञ्चरात्रोक्तवाक्यसिद्धन्यायादपि सिध्यति इति बोध्यम्.

श्रीभागवताविश्वासः।।२२।।

एतत्करणेतु

''श्रीमद्भागवते ये तु पुराणैः तुल्यबुद्धयः,

येषां स्वरूपभेदो अस्ति हरेः भागवतस्य च''

इति हरिवल्लभसुधोदये नारदपञ्चरात्रवाक्योक्तापराधद्वय[३०]–भवनात् तत्फलाभावरूपानिष्टप्राप्तिः. अतएव अयमपि महापराधेषु गणितः.

अनधिकारिणि मार्गरहस्यप्रकाशः।।२३।।

तस्य स्वसर्वस्वत्वाज्ञानएव स्वोत्कर्षज्ञापनाद्यर्थं तत्संवादाद् एतत्करणे

रहस्यभेत्तृत्वात् प्रभुकोपेन मार्गफलाभावो अत्यन्तबाहिर्मुख्यसम्भवः च इति महत्येव अनिष्टप्राप्तिः. अतएव च अस्यापि महापराधेषु गणना.

अन्यदेवपूजाकरणम्।।२४।।

यज्ञविवाहादिरूप-नित्यावश्यक-श्रौतस्मार्त-कर्मानङ्गतया स्वतन्त्रतया फलदातृत्वानुसन्धानेन अन्यदेवपूजाकरणम् इति अर्थः. एतत्करणे अन्याश्रयाद्

''यावद् अन्याश्रयः तावद् भगवानपि तं जनं,
विलोकयेद् न दयया हि अनन्यजनवत्सलः''

इति वाक्योक्ता अनिष्टप्राप्तिः. अतएव अस्यापि महापराधेषु गणना.

तन्निर्माल्यादिग्रहणं च।।२५।।

'आदि'पदेन नैवेद्यस्य तद्ग्रहणे

''भुक्त्वा अन्यदेवनैवेद्यं द्विजः चान्द्रायणं चरेद्
भुक्त्वा केशवनैवेद्यं सर्वपापैः प्रमुच्यते''

इति पाद्मे माघमाहात्म्यवाक्योक्त-प्रायश्चित्तप्राप्तिः अधिका.

सेवानुकूलगृहपरित्यागः।।२६।।

भक्तिमार्गीयसंन्यासाधिकाराभावे गृहिणोपसंहारन्यायेन गृहमेव फलानुकूलम् इति तदभावेऽपि गृहपरित्यागो अपराधः इति अर्थः. एतत्करणे पाषण्डित्वभवन-रूपानिष्टप्राप्तिः. एतच्च संन्यासनिर्णयाद् भक्तिवर्धिनीतः च अवगन्तव्यम्.

तत्प्रतिकूल-तत्परिग्रहश्च।।२७।।

ततकरणे भक्तिमार्गात् च्युतिरेव अनिष्टरूपा.

अविद्धभगवद्व्रतत्यागः।।२८।।

निषिद्धविद्धतत्त्यागस्य शास्त्रेणैव प्राप्तत्वाद् अविद्ध-तत्त्यागे शास्त्रोल्लङ्घनमेव अनिष्टजनकम्.

वेद-गुरु-देव-ब्राह्मणनिन्दा।।२९।।

एतेषां चतुर्णां प्रत्येकमपि निन्दायां हीनयोनिप्राप्त्यादिरूपम् अनिष्टं शास्त्रेषु प्रसिद्धमेव.

सेवाभिमानः।।३०।।

एतत्करणे भगवदपरितोषादेव तदनङ्गीकाररूपमेव अनिष्टम्.

सेवादित्यागः।।३१।।

एतत्करणे भक्तिमार्गाद् भ्रंशरूपमेव अनिष्टम्.

श्रीमदाचार्योल्लङ्घनम्।।३२।।

एतत्करणे

''**आचार्यवान् पुरुषो वेद**'' (छान्दो.उप.६।१४।२) इति श्रुत्या

''**लब्धानुग्रह आचार्यात् तेन संदर्शितागमः**'' (भाग.पुरा.११।३।४८)

इति एकादशस्कन्धीयवाक्यात् च मार्गज्ञानं प्रति आचार्याणामेव कारणत्वात् तदाज्ञायां प्रामाण्यभङ्गाद् मार्गाज्ञानरूपा मार्गफलाप्राप्तिरूपा च अनिष्टप्राप्तिः. अतएव अस्य महापराधेषु गणना.

एवम् अत्र पूर्वोक्तेभ्यो अतिरिक्ताः भक्तिमार्गीयाः अपराधाः विचारिताः. तेषां निवृत्युपायस्तु अत्र न उक्तः. तेन एतेषां सर्वथा अकरणमेव प्रभूणाम् अभिप्रेतम्. नतु तत्र प्रमादो विधेयः इति. यदि पुनः दैवात् कदाचित् कश्चिद् भवेत् तदातु क्रच्छ्रादिरूपस्य उपायस्य दुष्करत्वाद् भगवता श्रीवराहेणापि अवनिकृपया मथुरागमनस्यैव आज्ञप्तत्वात् तत्रापि अप्रमादेन स्थित्वा सेवाकृतेरेव आवश्यकत्वाद् अन्यथा ''**पुण्यक्षेत्रे कृतं पापं वज्रलेपो भविष्यति**'' इति वाक्येन दोषस्यैव सम्भवात्. प्रबोधिनीव्रतपूजादिकमेव सुगमतया अवशिष्यते. आगमिकेषु तु क्षमाप्रार्थनं प्रणामः च निवृत्युपायत्वेन उक्तः. तत्र प्रार्थनन्तु अनुचितं, विवेकविरुद्धत्वात् ''**प्रार्थिते वा ततः किं स्यात् स्वाम्यभिप्रायसंशयाद्**'' (विवेकधैर्याश्रयः २) इति न्यायेन वैय्यर्थ्यात् च. भगवदाज्ञायाः अभावे मथुरादौ विशेषगतेरपि कर्तुम् अशक्यत्वात्. पाञ्चरात्रिकेषु तु अपराधश्रवणं तत्त्यागपूर्वकं भगवत्सेवनं च निवृत्युपायत्वेन उक्तम्. तत्र आद्यन्तु अपराधप्रागभाव–परिपालकत्वेन प्रतिभाति. अन्यथा द्वितीयं न वदेत्, प्रयोजनाभावात्. तस्यापि निर्वाहकत्वेन शरणगमनस्यैव अपेक्षितत्वात् च. एवम् आगमिकेऽपि बोध्यम्, न्यायतौल्यात्. अतः सर्वथा शरणगमनमेव मुख्योपायः. विवेकधैर्याश्रयग्रन्थे ''**दुःखहानौ तथा पापे**'' (विवेकधैर्याश्रयः १०) इत्यारभ्य ''**एवं चित्ते सदा भाव्यम्**'' (विवेकधैर्याश्रयः १३) इत्यन्तेन तस्यैव उक्तत्वात्. अन्तःकरणप्रबोधादिष्वपि तस्यैव

उपदेशात्. सदा शरणभावनप्रभावेण अग्रेऽपि तदुत्पत्यसम्भवात्. ''**सर्वधर्मान् परित्यज्य**'' (भग.गीता १८।६६) इत्यनेन भगवता तस्यैव आज्ञापनात्. एकादशस्कन्धेऽपि उद्धवं प्रति तस्यैव उपदेशात्. व्रजस्थैरपि तत्र-तत्र शरणगमनस्यैव कृतत्वात् च एषए उपायः इति विभाव्य एतदेव सदा कार्यम्.

इति श्रीवल्लभाचार्य श्रीविट्ठलपदाश्रयः।
अपराधोक्तिविवृत्तिं कृतवान् पुरुषोत्तमः।।

इति श्रीवल्लभाचार्यविट्ठलेश्वरचरणैकतान-पीताम्बरात्मजपुरुषोत्तमविरचिता
भक्तिमार्गीयापराधनिरूपणविवृति
सम्पूर्णा

पाठभेदाः

१. 'प्रायश्चित्तप्रवृत्तिः' इति मां. पाठः.
२. 'कल्पयामि' इति ख,ग,मा पाठः.
३. ''राजान्नन्तु न भोक्तव्यम्'' इति मां. पाठः.
४. ''भोजनव्यवहारः तत्र आहारस्य अपराधत्वम्'' इति मां. पाठः.
५. 'कौसम्भ' इति ग,मां,ख पाठः.
६. 'पूजायां' इति मां पाठः.
७. 'व्र/षू' इति ग-ख/मां पाठः.
८. 'मतान्तरम्' इति ख, 'मर्थान्तरम्' इति ग पाठः.
९. ''पूजा जीर्णान्ध'' इति मां. पाठः.
१०. 'धारणं' इति ग-ख पाठः.
११. ख पुस्तके नास्ति.
१२. 'यणापराकं' इति ग पाठः.
१३. ख पुस्तके नास्ति.
१४. '...निषेचनात्' इति मां. पाठः.
१५. 'नित्यं तैस्तत्प्रा' इति ख,मां,ग पाठः.
१६. 'इत्यत्र कर्माणान्तध...' इति ख पाठः. 'वातकर्माजीर्णान्धिकार' इति मां. पाठः.
१७. 'सा पूजा' इति मां. पाठः.
१८. 'यत्' इति मां., ग पाठः.
१९. 'यत्' इति ख, ग, मां. पाठः.
२०. 'मन्यते' मां.,ख पाठः.

२१. 'च' इति ख,ग,मां पाठः.
२२. 'मानुष्यं जन्ममासाद्य' इति ख, 'जन्ममासाद्य' इति ग-मां. पाठः.
२३. 'तया' इति ख,ग 'तथा' इति मां पाठः.
२४. 'न्यासाभावे' इति ख-मां. पाठः.
२५. 'तदायुक्तत्वेन' इति मां. पाठः.
२६. 'तत्करणे' इति ख.-मां. पाठः.
२७. 'गौत्तमवाक्योक्तानिष्टप्राप्तिः' इति ग. पाठः.
२८. 'लोकक्लिष्टं' इति ग. पाठः.
२९. 'यत्पर्शादुष्टत्वेन' इति ख. 'हयस्तयो अत्र स्पर्शाद् उच्छिष्टः तेन' इति मां. पाठः.
३०. 'द्वयं' इति ख., 'द्वयस्य' इति मां. पाठः.

श्रीविट्ठलनाथप्रभुचरणविरचितः

।। श्रीजन्माष्टमीनिर्णयः ।।

प्रणम्य पितृपादाब्जयुगलं विगलन् मधु।।
जन्माष्टमी का अष्टमी इति संशयान् नाशयामि अहम्।।१।।

तत्र जन्माष्टमीव्रतस्य नित्यत्वं जन्माष्टमीजयन्त्योः भेदश्च माधवाचार्यादिभिः प्रपञ्चितएव अस्तीति न अस्माभिः प्रपञ्च्यते. किन्तु उपोष्या

गोस्वामिश्रीपुरुषोत्तमचरणविरचितः

जन्माष्टमीनिर्णयप्रकाशः

श्रीमदाचार्यचरणान् प्रभून् श्रीविट्ठलेश्वरान्।।
नत्वा उत्सवानां समयः सोपपत्तिकः उच्यते।।१।।

तत्र तावत् प्रथमं जन्माष्टमीसमयएव निर्णेयः, सकलोत्सवमूलत्वात् आविर्भावोत्सवस्य. स च प्रभुभिरेव निर्णीतः इति प्रथमं तन्निर्णयाशयएव प्रकाश्यते. तथा हि, अथ श्रीमत्प्रभुचरणाः स्वीयानां श्रीगोकुलाधीश-प्रादुर्भावदिवस-व्रतविषयकं कलिकलितवादिकलिकलितम् अन्तःकरणकलिलम् असहमानाः तन्निरासाय[१] प्रादुर्भावतिथिनिर्णयं प्रतिजानते **प्रणम्य** इत्यादि, **का अष्टमी इति संशयान्** इति. **का अष्टमी** इति प्रश्नहेतुभूतान् संशयान् इति अर्थः.

ते च पूज्यतिथिः विद्धा अविद्धा वा, अविद्धा चेत् क्षये **कीदृशी** उपोष्या इत्यादिरूपा उन्नेयाः. उत्तरे स्फुटिष्यन्ति च. ननु अत्र व्रतस्य नित्यत्व-काम्यत्वादिकं जन्माष्टमीजयन्त्योः भेदाभेदादिकं च कुतो न विचार्यते इति अतः आहुः, **तत्र** इत्यादि. तत्र तादृशसंशयो **न अस्माभिः प्रपञ्च्यते**. तयोः यदि [२]व्रतभेदात् तिथिप्रकारभेदाद् वा[३] भेदः. उभयथाऽपि यस्मिन् वर्षे जयन्तीयोगो नास्ति तस्मिन् वर्षे जन्माष्टम्यैव निर्वाहात् अनतिप्रयोजनत्वेन[-१] मुख्यतया न प्रपञ्च्यते इति अर्थः. ननु एवं सति संशयान्तरमपि ततएव नङ्क्ष्यत इति निर्णयारम्भो व्यर्थः इति अतः आहुः, किन्तु इत्यादि. तथा च

कीदृशी तिथिः इति सन्देहो निवार्यते. सा च विद्धा शुद्धा च इति द्विविधा.

तत्र कैश्चिद् वेधविचारे जन्माष्टम्या जयन्त्याश्च रात्रिप्रधानत्वाद् रात्रिवेधः प्रशस्तः इति उक्त्वा

''अष्टमी रोहिणीयुक्ता निश्यर्द्धे दृश्यते यदि,
मुख्यकाल इति ख्यातः तत्र जातो हरिः स्वयम्''

इति वसिष्ठसंहितावचनम् उक्तम्.

''रोहिण्याम् अर्धरात्रे तु यदा कृष्णाष्टमी भवेत्,
तस्याम् अभ्यर्चनं शौरेः हन्ति पापं त्रिजन्मजम्''

इति विष्णुरहस्यवचनं प्रोक्तम्. ततः

''अर्द्धरात्राद् अधश्चोर्ध्वं कलयाऽपि यदा भवेत्,
'जयन्ती' नाम सा प्रोक्ता सर्वपापप्रणाशिनी''

इत्यादिपुराणवचनं च.

''सिंहे अर्के रोहिणीयुक्ता भवेत् कृष्णाष्टमी यदि,
रात्यर्द्धपूर्वपरगा जयन्ती कलयापि च''

इति वराहसंहितावचनं च. एतद् अग्रे च अन्यान्यपि एतादृशानि वचनानि उक्तानि. तत्र आदिपुराणे वराहसंहितायां योगीश्वरादिवचनेषु च स्फुटं 'जयन्ती'पदम् अस्ति इति तदेकवाक्यतार्थम् अन्येषामपि ईदृशानां वचनानां जयन्तीव्रतपरत्वम् अभ्युपेयम्. यत्तु

उक्तविधसंशयः ततो न अपयाति इति निर्णयारम्भो न व्यर्थः इति अर्थः. उपोष्यनिर्णयार्थं विप्रतिपत्त्युत्पादकप्रकारद्वयं[४] प्रथमतः आहुः **सा च** इत्यादि.

तत्र विद्धायाः प्रथमोद्दिष्टत्वात् का विद्धा इति आकाङ्क्षायां वेधं निर्णिनीषन्तः तद्द्वारा जयन्ती-जन्माष्टम्योः भेदं च निर्णिनीषन्तः प्रथमतः परमतम् अनुवदन्ति **तत्र** इत्यादि **वचनानि उक्तानि** इति अन्तम्. व्यवस्थापयन्ति **तत्र** इत्यादि **अभ्युपेयम्** इत्यन्तम्. ईदृशानां रात्रिप्राधान्यज्ञापकानाम् इति अर्थः. ननु 'दिवा वे'तिवाक्ये रोहिण्यभावे रात्रिप्रधानत्वम् अष्टम्या उच्यते इति कथं सर्वेषां तादृशां जयन्तीपरत्वम् इति अतः आहुः **यत्तु** इत्यादि **न वदेद्** इत्यन्तम्. तथा च जयन्त्याम् अर्द्धरात्रे रोहिण्यष्टमीयोगस्य

''दिवा वा यदि वा रात्रौ नास्ति चेद् रोहिणीकला,

रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुताम्''

इति वचनं तदपि जयन्तीपरम् इति ज्ञेयम्. तत्र अर्द्धरात्रे रोहिण्यष्टमीयोगस्य मुख्यत्वात्.

''प्रतिवर्षं विधानेन मद्भक्तो धर्मनन्दन,

नरो वा यदि वा नारी यथोक्तफलम् आप्नुयाद्''

इति भविष्योत्तरीय-जयन्तीकल्पीयवचनात्

''प्राजापत्यर्क्षसंयुक्ता श्रावणस्य असिताष्टमी,

वर्षे वर्षे तु कर्त्तव्या तुष्ट्यर्थं चक्रपाणिनः''

इति स्मृत्यन्तरे जयन्तीप्रकरणीयवचनाच्च प्रतिवर्षं कार्यम्. एवं सति यस्मिन् वर्षे मुख्यो जयन्तीयोगो नास्ति तस्मिन् वर्षे जन्माष्टम्याम् अहोरात्रमध्ये मुहूर्तमपि यदा रोहिणीयोगः तदा उपवासः कार्यः इति जयन्तीपरत्वादेव इन्दुसंयुतत्वम् उक्तम्. तत्र जयन्तीव्रते चन्द्रार्घदानस्य आवश्यकत्वात्.

''मुहूर्तमपि अहोरात्रे यस्मिन् युक्तं तु लभ्यते,

अष्टम्यां रोहिणी-ऋक्षं तां सुपुण्याम् उपावसेद्''

इति विष्णुरहस्यवचनस्यापि अयमेव विषयः. यदा तु जन्माष्टम्यामपि अहोरात्रमध्ये रोहिणीयोगो नास्ति तदा विशिष्टाभावे निशीथव्यापीनी अष्टम्येव उपोष्या, नतु जयन्तीव्रतविच्छेदः कार्यः इति [२]आशयो ''दिवा वे''ति वचनस्य. (अत एव इन्दुसंयुतत्वम् उक्तम्, तत्र चन्द्रार्घदानस्य आवश्यकत्वात्.) अन्यथा ''सऋक्षापि न कर्तव्या'' इतिवचनाद् जन्माष्टम्याम् ऋक्षयोगस्य अप्रयोजकत्वात् तदावश्यकत्व-ज्ञापकरोहिणीकलासत्त्वाभावं निमित्तत्वेन न वदेत्. यत्तु जयन्तीव्रते यो निर्णयः सएव जन्माष्टम्याम् इति उक्तं तद् न विचारक्षमम्.

मुख्यत्वात्, तत्र चन्द्रार्घदानस्य आवश्यकत्वेन इन्दुसंयुतत्वकथनाद् जयन्त्या नित्यत्वज्ञापनार्थं रोहिण्यभावेऽपि निशीथव्यापिनी अष्टम्या गौणतरादिकालत्व-ज्ञापनार्थत्वात् च अस्य जयन्त्येव विषय इति तादृशाम् अन्येषामपि सएव विषयः इति अर्थः. ननु एतेषां वचसां जयन्तीपरत्वेन व्यवस्थायां भवतां किम् आयातम् इति अतः आहुः **यत्तु** इत्यादि **ग्राह्य** इत्यन्तम्. अत्र अयम् अर्थः, जन्माष्टमीप्रकरणस्थवाक्यान्तरेषु

''पूर्वविद्धाष्टमी या तु उदये नवमीदिने,
मुहूर्तमपि संयुक्ता सम्पूर्णा साऽष्टमी भवेत्''.
''कलाकाष्ठामुहूर्ताऽपि यदा कृष्णाष्टमीतिथिः,
नवम्यां सैव ग्राह्या स्यात् सप्तमीसंयुता न हि''

इति पद्मपुराणवचनम्. 'उदय'पदेन जन्माष्टम्यां सूर्योदयकाले सत्वे एव वेध, जयन्त्याम् अर्द्धरात्रवेधएव ग्राह्यः.

उपवासातिरिक्ताष्टयामिक-व्रतान्तरादर्शनाद् अस्मिन् वाक्ये[५] विद्धायाधिकायां पूर्णत्वातिदेशाच्च अस्य उपवासव्रतत्वे निश्चिते तस्याष्टयामिकत्वेन

''कर्मणो यस्य यः कालः तत्कालव्यापिनी तिथिः,
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम्,
उदयादुदयात् प्रोक्ता हरिवासरवर्जिता''

इति च वाक्यात् तावद्व्यापिन्येव[६] मुख्यः कालः तदभावे च पारिभाषिक-तावद्व्यापिनी गौणः कालः इति सिद्ध्यति. तत्र[७] च गौणकाले कर्मविशेषतिथिसामान्य-पुरस्कारेण प्रवृत्ताभ्यां

''उदये तूपवासस्य नक्तस्यास्तमये तिथिः,
मध्याह्नव्यापिनी ग्राह्या एकभक्तव्रते तिथिः,
आदित्योदयवेलायां याऽल्पापि च तिथिः भवेत्,
पूर्णा इत्येव मन्तव्या प्रभूता[८] नोदयं विना''

इति बौधायनस्य **''प्रायः प्रान्त उपोष्या हि तिथिः दैवफलेप्सुभिः''** इति शिवरहस्यस्य च वाक्याभ्यां सूर्योदयास्तमयव्यापित्वघटितं पक्षद्वयम् इति प्रकृते कः आदरणीयः इति आकाङ्क्षायाम् अनेन प्रातिस्विकवाक्येन[९] जन्माष्टम्याम् अस्तमयपक्षो अपोद्यते. यदि जन्माष्टम्या रात्रिप्रधानत्वं स्यात् स न अपोद्येत. तस्मात् न जयन्तीवद् अस्या अर्द्धरात्रव्याप्त्या निर्णयः किन्तु उक्तरीत्या[१०] निर्णयः इति आयातम् इति अर्थः. किञ्च, ''कलाकाष्ठा'' इति वाक्योपन्यासात् नवमीविद्धा नक्षत्रहीना तु मुहूर्त्तमात्रा ग्राह्या, इति वदन् अपरार्कोऽपि प्रत्युक्तो ज्ञेयः. यत्तु 'कलाकाष्ठा' इति उक्तवाक्यस्य त्रिमुहूर्त्तस्तावकत्वम्, इति कैश्चिद् उक्तम्, तदपि न विचारचारु.

''नागो द्वादशनाडीभिः दिक् पञ्चदशभिः तथा,
भूतोऽष्टादशनाडीभिः दूषयति उत्तरां[११] तिथिम्''

इतिवद् अस्य[१२] विशेषवचनत्वात्[१३]. अतएव नृसिंहपरिचर्यायां हरिवल्लभ-सुधोदये च

''पलवेधेऽपि[१४] विप्रेन्द्र सप्तम्या अष्टमीं त्यजेत्,
सुराया बिंदुना स्पृष्टं गङ्गाम्भःकलशं यथा''

इति स्कन्दवचनम् उक्तम्.

अपरार्कोऽपि **''त्रुटिमात्रयापि सप्तम्या विद्धाऽष्टमी सनक्षत्रापि न ग्राह्या''** इति आह इति दिक्. न च निषेधस्य प्राप्तिपूर्वकत्वनियमेन विषयभेदाच्च तदभावेन निषेधानुपपत्तिः इति वाच्यं, **''भूमौ अग्निः चेतव्यो न अन्तरिक्षे न दिवि''** इत्यादिवत् नित्यानुवादरूपत्वात्. परधर्मकरणवद् भ्रमात् करणप्राप्तेः सुवचत्वाच्च. न च विधिनिषेधयोः उभयप्रकरणस्थत्वदर्शनाद् न एवम् इति वाच्यं, यथासम्भवं [१५]श्रुतिलिङ्गाभ्यां[१६] प्रकरणबाधस्य वक्तुं शक्यत्वात् इति दिक्. यत्तु कश्चित् जन्माष्टम्या रात्रिप्रधानत्वम् अङ्गीकृत्य

''प्रस्तुतविधिनिषेधानां पूर्वोक्तरीत्या व्यवस्थापनम् अनुचितं सर्ववाद्यसम्मतत्वात्''

इति आह, तद् अति तुच्छम्, तेषु नियतविरोधदर्शनात्. न च[१७] पूर्वेद्युरेव निशीथव्याप्तौ विध्यवकाशः परेद्युरेव निशीथव्याप्तौ च निषेधावकाशो दिनद्वयेपि तद्व्याप्तौ अव्याप्तौ च विरोधः इति अनियतएव सः इति वाच्यम्, अवकाशस्थले कर्मकालशास्त्रेणैव निर्वाहाद् उभयोः आनर्थक्यप्रसङ्गात्. न च सामान्यविशेषभावेन उभयसार्थकत्वम् इति वाच्यम्. विशेषशास्त्रेण सामान्यस्य अस्य सङ्कोचे चतुर्द्धाकरणवत्कर्मकालशास्त्रस्य अन्यत्र प्रवृत्तिप्रतिरोधप्रसङ्गात् यच्छब्दबोधित-सामान्यताबाधप्रसङ्गाच्च. असङ्कोचे विरोधस्य अपरिहाराच्च. ननु विरोधस्थले कर्मोपक्रमकालशास्त्रं सङ्कल्पकाले सत्वम् अधिकव्याप्तिं च यथासम्भवम् आमादाय निबन्धकारैः विधिनिषेधव्यवस्थापनेन सोऽपि परिह्रियते इति चेत् न, पूजाप्राधान्यवादे अर्द्धरात्रस्थपूजायाः प्रातरुपक्रमाभावेन कर्मकालशास्त्रस्य च क्वचित् तुल्यत्वेन क्वचिद् उदासीनत्वेन विरोधतादवस्थ्यात् उपवासप्राधान्यवादेऽपि यदा प्रथमदिने अधिकनिशीथव्याप्तेः द्वितीयदिने संकल्प-कालाल्पनिशीथव्याप्तिः तदानीं विरोधतादवस्थ्यात् पक्षद्वयेऽपि अव्यवस्थित-विकल्पदोषप्रसक्तेः.

अतएव स्कन्दपुराणे **‘‘उदये चाष्टमी किञ्चिद् नवमी सकला यदि’’** इति उक्तम्.

यत्तु विष्णुधर्मोत्तरवचनम्

न च तत्र रोहिण्या निर्णयः इति वाच्यं, तस्या अप्रयोजकत्वात्

‘‘याः काश्चित् तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः.

तास्वेव तद्व्रतं कुर्यात् विना श्रवणरोहिणीम्’’

इति वाक्यात्. न च अधिकनिशीथव्याप्त्या निर्णयः इति वाच्यम्, काल्पनिकत्वात्. समव्याप्तौ तद्दोषतादवस्थ्याच्च. न च निषेधबाधितः कर्मकालो विधिना प्रतिप्रसूयते इति वाच्यं, निषेधानवकाशप्रसङ्गात्. ‘‘प्रक्षालनाद्धि पङ्कस्य’’ इति न्यायेन उभयानर्थक्यप्रसङ्गाच्च. एतेनैव विधिबोधितं निषिध्यते इत्यपि प्रत्युक्तं ज्ञेयम्. न च वारेण निर्णयः इति साम्प्रतं, तस्य उपलक्षकत्वाद् अनियतत्वाच्च. एतेनैव चन्द्रोदयोपि प्रत्युक्तः[-३]. वादिविसम्मतिस्तु ‘‘शतमपि अन्धा न पश्यन्ति’’ इति न्यायात्. **‘‘ज्ञानिनामपि चेतांसि’’** इति वाक्याच्च परिहणीया. भगवद्दासेषु तु सा न समर्था, **‘‘मामेव ये प्रपद्यन्ते’’** इति वाक्यात्. तस्माद् नियतएव विरोधः इति पूर्वोक्तैव व्यवस्था सदादरणीया इति. मानहीनो रात्रिप्रधानत्वाङ्गीकारोऽपार्थ एवेति दिक्. (सामान्य-विशेषाभावात् सर्वसार्थक्यम् इति दिक्).

सूर्योदयकाले अष्टमीसत्त्वं पुराणान्तरेऽपि अभिप्रेतम् इति आत्याशयेन आहुः. **अत एव** इत्यादि. अतएव सूर्योदयवेधस्य[१८] परिहार्यत्वादेव. यस्तु द्वैतनिर्णये भगवद्भास्करे च एकमूलकल्पनालाघवलिप्सया ‘उदय’पदेन **‘‘तारापत्युदये सति’’** इति अनेन एकवाक्यत्वात् चन्द्रोदयो ग्राह्यः, इति एकः पक्षः उक्तः, स तु न सङ्गच्छते, नवमी-साकल्योक्तिविरोधात्. नहि प्रहरषट्कव्यापिनी अष्टम्यपेक्षया प्रहरद्वयव्यापिन्या नवम्याः साकल्यं युज्यते. न च ‘सकला’शब्देन निशीथे सकला इति अर्थः उच्यते इति वाच्यम्, अनुक्तसिद्धत्वात्. अतएव कालतत्त्वविवेकेऽपि ‘‘अत्र च सूर्योदयप्रतीतिः’’ इत्येव उक्तम्. [१९]तस्मात् तयोः व्याख्येयवाक्यविरोध[२०] एव इति.

प्रकृतम् अनुसरामः. ननु वेधविचारस्य व्रतानुष्ठानोपयोगित्वाद् व्रतस्य च प्रत्यक्षोन्नीतान्यतरविध्यधीनत्वाद् जन्माष्टमी-जयन्तीविध्योश्च भगवत्प्रादुर्भाव-प्रयुक्तत्वेन तुल्यतया व्रतभेदस्य बहुवाद्यसंमतत्वाद् नाममात्रेण तिथिप्रकारमात्रभेदेऽपि

''रोहिणीसहिता कृष्णा मासि भाद्रपदे अष्टमी,
सप्तम्याम् अर्धरात्राधः कलयाऽपि यदा भवेत्,
तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः''

इति. तत्तु **''अविद्धायां तु सर्क्षायां जातो देवकीनन्दनः''** इति

जयन्त्यां गुणफलसम्बन्धाङ्गीकारात् 'व्रत'पदाभावे[२१] तदुपयोगिवेधविचारो[२२] व्यर्थः इति आकांक्षायां वेधविचारवैयर्थ्यपरिजिहीर्षया प्रयोजकभेदरूपभेदशब्दान्तरैः व्रतभेदं वक्तुं प्रयोजकादिभेदबोधकं विष्णुधर्मोत्तरवाक्यम् उपन्यस्यन्ति **यत्तु** इत्यादि.

तदर्थम् आहु: **तत्तु** इत्यादि **व्रतपरमेव** इत्यन्तम्. अत्र अयम् अर्थ: सम्पद्यते

''रोहिणीसहिता कृष्णा मासि भाद्रपदेऽष्टमी,
सप्तम्यामर्द्धरात्राध: कलयापि यदा भवेत्.
तत्र जातो जगन्नाथ: कौस्तुभी हरिरीश्वर:.
तमेवोपवसेत् कालं तत्र कुर्याच्च जागरम्.
अर्द्धरात्रे तु योगोऽयं तारापत्युदये सति.
नियतात्मा शुचि: स्नात: पूजां तत्र प्रवर्त्तयेत्''

इति वाक्ये प्रथमपादत्रयेण जयन्तीरूपं कालम् अनूद्य सम्भावनार्थक-लिङ्-घटित-तुरीयपादेन अग्रिमार्द्धेन[२३] च आपादकम् उक्त्वा तदग्रिमार्द्धेन आपाद्यम् उक्तम्. एवं च अयम् अर्थो भवति : उक्तविधकाले यदि भगवान् जातो भवेत् तमेव उपवसेत् तत्र जागरं च कुर्यात्. यतो न एवम् अतो न एवम् इति तर्कनिरूपणद्वारा तदुभयं निषिध्य तादृशे काले किं कुर्यात् इति आकांक्षायां तत्स्वरूपनिरूपणपूर्वकं तत्र कर्तव्यम् आह 'अर्द्धरात्रे' इति पद्येन. अतएव भगवज्जन्मकालत्वशङ्कानिरासकः 'तु' उक्त:. एवं सति जयन्तीव्रतं भाद्रकृष्णसप्तम्यष्टमी रोहिण्यर्द्धरात्रादिसमुदायप्रयुक्तं, दशहरावत् पूजारूपकं(पं!?) च ''पूजां प्रवर्त्तयेद्'' इति शब्दान्तरप्राप्तं च. जन्माष्टमीव्रतं तु भगवत्प्रादुर्भावयुक्तम् उपवासरूपकम्(पं!?) 'उपवसेत[२४]' इति शब्दान्तरप्राप्तं च इति तयोः भेदएव सिद्ध्यति. यदि आपाद्यकोटौ उपवासाद्यनुवादः[२५] उच्यते तदाऽपि तस्य[२६] विध्यनुवादत्वात् तेनापि विधिः उन्नेतुं शक्यः इति न कोऽपि दोष:. यदि च

''अभिजिन्नाम नक्षत्रं जयन्तीनाम शर्वरी.
मुहूर्त्तो विजयो नाम यत्र जातो हरि: स्वयम्''

इति वाक्याद् जयन्तीत्वं जन्माष्टम्यामपि विभाव्यते. तदापि ''अर्द्धरात्रे तु योगोऽयम्'' इति वाक्यात् पदप्रवृत्तिनिमित्तभेदाद् भेद[२७] एव तयोः इति न दोष:. यस्तु

जन्माष्टमीजयन्त्योः भिन्नत्वे जयन्तीव्रताकर्तॄणां वर्षविशेषे प्रत्यवायः केनचिद् आशङ्कितः सोपि अनेनैव समाहितो ज्ञेयः. यदि च योगविशेषप्रयुक्तोपवासस्य नित्यत्वम् आगृह्णीयात् तदाऽपि पूर्वविद्धायां जन्माभावात् योगभङ्गएव इति न नित्योपवासप्राप्तिः. यत्र तु शुद्धाधिकायां जयन्तीयोगः तत्र तु फलातिशयमात्रं न तु नित्योपवासः इति वक्ष्यते इति दिक्.

यत्तु माधवाचार्यैः

''अर्द्धरात्राद् अधश्चोर्ध्वं कलयापि यदा भवेत्,
जयन्तीनाम सा प्रोक्ता सर्वपापप्रणाशिनी''

इति आदित्यपुराणीयम्, **''रात्यर्द्धपूर्वा परगा जयन्ती फलयापि च''** इति वराहसंहितावचनं च उक्त्वा कलास्वरूपं च व्याख्याय ''खण्डतिथिरूपा कृष्णाष्टमी द्विधा, पूर्वेद्युः सप्तमीयुक्ता परेद्युर्नवमीयुक्ता च इति. तत्र **''सप्तमीयुक्तायाः रात्रिपूर्वार्द्धावसाने कलासद्भावो विधीयते''** इत्यादि च उक्त्वा सप्तमीपूर्वार्द्ध-रात्रावसानाष्टमीकलाभिधायकत्वं विष्णुधर्मोत्तरीयवाक्यस्य[२८] दर्शितं तदपि तदा संगतं भवति यदा **''तत्र जातो जगन्नाथः''** इति अर्द्धं[२९] मध्ये न भवति. तत्सत्त्वात् च अनुपदोक्तएव अर्थः प्राञ्जलः प्रतिभाति इति. यदि च 'रोहिणी' इति पदस्य सम्भावितकालानुवादकत्वं 'तत्र जातः' इति अर्द्धस्य च भूतार्थबोधकत्वेन उनोपवासादिकं प्रति हेतुत्वम् इति विभाव्यते तदापि सम्भावितकाले भूतार्थकथनात् कल्पनावैरूप्यापत्तिः अनिवार्यैव. यदि च **''यदा स्थिता तत्र जातः अतो यदा भवेत् तमेव उपवसेत्''** इति एवं लाप्यते तदापि अध्याहारदोषो मूलद्वयकल्पना[३०] च इत्याग्रहवादिषु जोषंभावएव सताम् उचित इति दिक्. यच्च द्वैतनिर्णयभगवद्भास्करकाराभ्यां भविष्यविष्णुधर्मोत्तरयोः इति अभिधाय

''रोहिण्याम् अर्द्धरात्रे तु''
''प्राजापत्यर्क्षसंयुक्ता''
''अर्द्धरात्रे तु योगो अयं''
''रोहिणीसहिता कृष्णा''
''अर्द्धरात्राद् अधश्चोर्ध्वं कलयाऽपि यदा भवेत्,
तत्र जातो जगन्नाथः''

इति अवधिवाक्यक्रमभेदेन पाठभेदो अलेखि, ''तमेव उपवसेद्'' इति अर्धं च न

ब्रह्मवैवर्त्तवचनविरोधाद् रोहिण्यष्टमीयोगमात्रपरम् इति जयन्तीव्रतपरमेव. भगवदाविर्भावे जाते मुहूर्तमात्रानन्तरं योगमायाया नवम्याम् आविर्भावात्. एवं सति सप्तमीवेधासम्भवात् पूर्ववचनेन पूर्वविद्धायाम् आविर्भावो न वक्तुं शक्यः. यदुक्तं भविष्ये

''नवम्यां योगमायाया जन्माष्टम्यां हरेः अतः,

नवमीसहितो पोष्या रोहिणीबुधसंयुता''.

तस्मात् सूर्योदयकाले सप्तमी भवति, तदुपरि वर्त्तमानाष्टमी सा विद्धा. सूर्योदयम् आरभ्य प्रवर्त्तमानाष्टमी सा शुद्धा. तत्रापि विद्धा अधिका शुद्धा अधिका च

अलेखि तदपि माधवीयादिषु प्राचीनेषु कालतत्त्वविवेके अर्वाचीने च तथापाठादर्शनात् पुराणवाक्यसाङ्कर्येण लिखनात् पूर्वोक्तदोषापत्तेश्च तदनुसारिणामेव विश्वसनीयम् इति ध्येयम्.

ननु कल्पभेदेन अविद्धाविद्धयोः प्रादुर्भावाङ्गीकारे कः दोषः इति चेत् तत्र आहुः **भगवद्**...इत्यादि **संयुता** इत्यन्तम्. तथा च ब्रह्मवैवर्तेन सप्तमीविद्धानिषेधपूर्वकम् अविद्धायां प्रादुर्भावः उक्तः. श्रीमद्भागवते च भगवत्प्रादुर्भावोत्तरं **''यदा बहिर्गन्तुमिवेष तर्ह्यजा या योगमायाऽजनि नन्दजायया''** इति मुहूर्त्तानन्तरं योगमायाजन्मोक्तम्. तच्च भविष्ये नवम्याम् उक्तं

''नवम्यां योगनिद्राया जन्माष्टम्यां हरेरतः,

नवमीसहिता उपोष्या रोहिणीबुधसंयुता''

इति. विष्णुपुराणे पञ्चमे अंशे प्रथमाध्याये. ब्रह्मपुराणे च

''प्रावृट्काले च नभसि कृष्णाष्टम्यां महानिशि,

उत्पत्स्यामि नवम्यां च प्रसूतिं त्वम् अवाप्स्यसि''

इति च नवम्याम् उक्तम्. एवं[३१] सति पुराणचतुष्टयैकवाक्यतया[३२] न पूर्वविद्धायाम् आविर्भावो वक्तुं शक्यः. किन्तु योगविशेषमात्रपरत्वमेव अभ्युपेयम् इति अर्थः. एतेन कालतत्वविवेके यः कल्पभेदेन जन्मकालभेदो अङ्गीकृतः सोऽपि प्रत्युक्तो ज्ञेयः. वशिष्ठवचनं[३३] तु प्रादुर्भावकालमात्रबोधकत्वाद् विद्धाविद्धयोः समानम् इति न तेनापि आग्रहो युज्यते. फलितम् आहुः **तस्मात्** इत्यादि **द्वैविध्यम्** इत्यन्तम्. **तस्मात्** उपोष्यतिथेः जन्मसामयिककालानुरोधेन विचार्यत्वाद्, अत्र 'विद्धा'-'शुद्धा'पदाभ्यां विद्धन्यूनाशुद्धन्यूने उच्येते. शुद्धसमाविद्धसमयोः एकादश्यादौ पुराणसिद्धत्वेऽपि इदानींतनज्योतिर्विद्भिः सूक्ष्मकालानवगमेन अनङ्गीकारात्. शुद्धाधिकाविद्धाधिके च

इति द्वैविध्यम्. तत्रापि निशीथव्यापित्वाव्यापित्वाभ्यां प्रत्येकं द्वैविध्यम्. तत्र शुद्धाधिकायां पूर्वदिने एव उपवासो बाधकाभावात्. विद्धाधिकायां तु परदिने एव उपवासः, विद्धायाम् उपवासनिषेधश्रवणात्. तथा हि ब्रह्मवैवर्त्ते

''वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी''.

''सऋक्षापि न कर्तव्या सप्तमीसंयुताष्टमी,
अविद्धायां तु सर्क्षायां जातो देवकीनन्दनः'' इति.

ननु

''कार्या विद्धापि सप्तम्यां रोहिणीसहिताष्टमी,
तत्रोपवासं कुर्वीत तिथिभान्ते च पारणम्''

इति पद्मपुराणवचनाद् न एवं निर्णयः उचितः इति चेद्, मा एवम्.

''जयन्त्यां पूर्वविद्धायाम् उपवासं समाचरेत्,
तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्वीत पारणम्''

इति गारुडपुराणवचनाद् जयन्तीव्रतविषयत्वाद् एतादृशानां वचनानां **''सऋक्षापि न कर्त्तव्या''** इति वचनाद् जन्माष्टमीव्रते रोहिणीयोगस्य अप्रयोजकत्वात्. तेषु सर्वेषु वचनेषु रोहिणीयोगस्य श्रूयमाणत्वात्. जयन्त्याश्च

''श्रावणे वा नभस्ये वा रोहिणीसहिताऽष्टमी,
यदा कृष्णा नरैः लब्धा सा जयन्ती इति कीर्तिता''.

विष्णुधर्मोत्तरे च,

''रोहिणी च यदा कृष्णे पक्षे अष्टम्यां द्विजोत्तम,
जयन्तीनाम सा प्रोक्ता सर्वपापहरा तिथिः''.

ननु यदा दिनद्वयेऽपि निशीथयोगो अष्टम्याः तद्विषयकानि सप्तमीविद्धा-निषेधवचनानि इति चेद्, मा एवम्,

---

ईषदधिकव्यापिन्यौ. तत्रापि इति बहुकालव्यापिन्यां विद्धाधिकायां शिष्टौ द्वौ भेदौ. एवं षट्. **तत्रापि** इत्यस्य शुद्धाधिकाविद्धाधिकयोः [-४]इत्यर्थकत्वेपि आद्याधिक्यस्य अविवक्षितत्वेन[३४] षडेव. सर्वेषामपि निर्णयम् आहुः **तत्र**... इत्यादिना. अत्र द्वयोः कण्ठोक्तत्वेऽपि त्यागात्यागहेतूक्त्या शिष्टानाम् अनुक्तसिद्धएव इति आशयो ज्ञेयः.

अत्र विद्धाविधीनाम् उभयविषयत्वं मन्वाना उभयाभेदं च मन्वानाः शङ्कन्ते.

''पूर्वविद्धाष्टमी या तु उदये नवमीदिने,
मुहूर्त्तमपि संयुक्ता सम्पूर्णा सा अष्टमी भवेत्,
कलाकाष्ठामुहूर्त्तापि यदा कृष्णाष्टमी तिथिः,
नवम्यां सैव ग्राह्या स्यात् सप्तमीसंयुता न हि''

तन्मतम् अनुवदन्ति **ननु...** इत्यादि. समादधते **मैवम्...** इत्यादि **तिथिः** इत्यन्तम्.

एवं विधिवाक्यानि व्यवस्थाप्य निषेधवाक्यानि व्यवस्थापयितुं पूर्ववद् **ननु** इत्यादिना परमतम् अनूद्य दूषयन्ति **मैवम्** इत्यारभ्य **उक्तवचनविरोधाद्** इत्यन्तम्.

यत्तु द्वैतनिर्णयकारैः यदा तु पूर्वेद्युः निशीथात् ऊर्ध्वं परेद्युश्च प्राङ्निशीथाद् इति दिनद्वयेऽपि रोहिणीयोगः तदा त्रैविध्यं, दिनद्वयेऽपि निशीथे अष्टमीसत्त्वं, परेद्युरेव वा-पूर्वेद्युरेव वा इति. तत्र आद्ययो: कल्पयोः द्वितीयैव उपोष्या. तदुक्तं स्कन्दपुराणे

''सप्तमीसंयुताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम,
प्राजापत्यं द्वितीयेऽह्नि मुहूर्त्तार्द्धं भवेत् यदि,
तदाष्टयामिकं ज्ञेयं प्रोक्तं व्यासादिभिः पुरा''.
''मुहूर्त्तेनापि संयुक्ता''

इति प्रदर्शितपाद्मवचनात् च इति उक्त्वा यत्तु कैश्चित् पाद्मम् इति अलेखी इति च उक्त्वा पूर्वविद्धाष्टमी इतिवाक्यद्वयं[३५] च धृत्वा तदपि एवंविधएव विषये योजनीयम्. सप्तमीसंयुताष्टम्या नवमीदिने उदयावच्छेदेन मुहूर्त्तादिसंयुक्तत्वस्य सम्भवाद् इति [३६]कथनाद् आतिदैशिकजयन्तीयोगविषयत्वम् अस्य इति[३७] स्वाशयः उद्घाटितः. सोऽपि विनिगमकाभावाद् अविचाररुचिरएव. (न च तौल्यम् इति वाच्यम्. ऋक्षानुक्तेरेव गमकत्वात्.)[३८]

यत्तु भगवद्भास्करे उपवासस्य पूजाङ्गत्वस्य प्राक् स्थापितत्वेन न स्वातन्त्र्येण कालनिर्णयप्रयोजकत्वम् इति उक्तं, यच्च **''सोपवासो हरेः पूजां शुचिः सम्यग् उपोषितः''** इत्यादौ उपवासस्य गुणत्वप्रतीतेः ''सदतो धावति'' इत्यादिवत् फलिसंस्कारः. पूजैव प्रधानम्. एवं च उपवासस्य पारार्थ्ये निर्बाधे ज्ञाते यः तद्वाक्ये फलोल्लेखः स केवलं स्तावकएव, पर्णतादिवत्[३९]. ''अङ्गे फलश्रुतिः अर्थवादः'' इति न्यायाद् इति उक्तम्. यच्च उक्तयुक्त्या[४०] पूजायाएव फलसम्बन्धे **''श्रावणे बहुले पक्षे''** इत्यादिवाक्येषु कृष्णजन्माष्टमीव्रतशब्देन पूजाया ग्रहणाद् युक्तो अकरण-निन्दार्थवादश्रवणाद् नित्यत्वोद्घोषः इति. तस्माद् उपवासो अङ्गं पूजैव तु प्रधानम् इति

इति पद्मपुराणवचनविरोधात्. एतेनैव नक्तादिव्रतयोगेषु रात्रियोगो विशिष्यते इति वचनं जन्माष्टम्यतिरिक्तव्रतपरम् इति ज्ञेयम्, उक्तवचनविरोधात्.

यत्तु

''जन्माष्टमी जयन्ती च शिवरात्रिः तथैव च,
पूर्वविद्धैव कर्त्तव्या तिथिभान्ते च पारणम्''

इति भृगुवचनम् तस्य अयम् अर्थः **''श्रावणे वा नभस्ये वा''** इति वाक्याद् मासद्वयेऽपि जयन्तीव्रतं सम्भवति तत्र पूर्वविद्धायामेव अष्टम्यां रोहिणी यदा भवति न परदिने तदा

''सप्तमीसंयुताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम,
प्राजापत्यं द्वितीये अह्नि मुहूर्त्तार्द्धं भवेद् यदि,

उक्तं तदपि आपातरमणीयमेव. ''श्रावणे बहुले'' इत्यादौ 'जन्माष्टमीव्रत'शब्देन पूजाग्रहणसम्भवेऽपि **''तां सुपुण्याम् उपावसेद्''** **''उपोष्या सा प्रयत्नतः''** इत्यादौ उपवासस्यैव स्फुटोक्तेः

''जयन्तीवासरे प्राप्ते करोत्युदरपूरणम्,
सम्पीड्यते अतिमात्रं तु यमदूतैः कलेवरम्''
''यो भुञ्जीत विमूढात्मा जयन्तीवासरे नृप''

इति माधवधृतस्कान्दे च उपवासाकरणस्यैव निन्दनाद् उपवासस्यैव नित्यत्वप्रतीतेः तदेकमूलतया[४१] ''श्रावणे बहुले'' इत्यादावपि उपवासग्रहणमेव उचितं, नतु पूजाग्रहणम्. न च जयन्ती-जन्माष्टम्योः भेदाद् न इदं साम्प्रतम् इति वाच्यम्. इयं हि अस्मदुक्तिः नतु तदुक्तिः. तैस्तु पूजाप्राधान्यम् अङ्गीकुर्वद्भिः जन्माष्टमीजयन्त्योः अभेदएव द्योत्यते. यदि न इत्थं तदा तदुपन्यस्त-जन्माष्टमीवाक्येषु कुत्र वा पूजा उक्ता येन तत्प्राधान्यम् अङ्गीक्रियते. 'सोपवासः' 'सम्यगुपोषितः' इति तु प्राप्तानुवादकम्[४२], ''कृत्वा तु पार्वणश्राद्धम्'' इत्यादिवद्, नतु अङ्गत्वबोधकम्. अन्यथा

''केवलेनोपवासेन तस्मिन् जन्मदिने मम,
शतजन्मकृतात् पापात् मुच्यते नात्र संशयः''

इति वाक्ये ''न अत्र संशयः'' इत्युक्तिबाधापत्तेः. तस्माद् अङ्गत्वप्रतीतिः विपर्यास[४३] एव इति तस्यापि[४४] प्राधान्यम् अप्रत्यूहम् इति सोऽपि कालनिर्णये प्रयोजकः इति अङ्गीकार्यमेव. अतएव द्वैतनिर्णयेऽपि उपवासमेव उल्लिख्य द्वैतं निरणायि. माधवादयः कालतत्त्वविवेकादयोऽपि तस्य प्राधान्यम् ऊचुः इति दिक्.

तदाष्टयामिकं ज्ञेयं प्रोक्तं व्यासादिभिः पुरा''

इति स्कन्दपुराणवचनात्,

''पूर्वविद्धाष्टमी या तु उदये नवमीदिने,
मुहूर्तमपि संयुक्ता सम्पूर्णा साऽष्टमी भवेत्''

इति पद्मपुराणवचनाच्च परदिनेपि आतिदेशिको जयन्तीयोगो अस्तीति जन्माष्टमीवद् जयन्त्यपि परदिनएव कार्या इति भ्रमः स्यात् तन्निवृत्यर्थम् आह **जन्माष्टमी** इत्यादिना. **चो** 'अपि' अर्थे. यथा श्रावणे पूर्वविद्धैव जयन्ती कार्या, एवमेव जन्माष्टम्यां या जयन्ती सापि पूर्वविद्धैव कार्या इति. यदा 'रोहिणी' इति पाठः तदा जन्माष्टम्यां या रोहिणी जयन्ती इति यावत् सा तथा इति अर्थः.

जन्माष्टमीप्रकरणस्थत्वाद् एतयोः वचनयोः न जयन्तीपरत्वं वक्तुं शक्यं, जयन्त्यां रोहिणीयोगस्य प्राधान्यात् तस्य मुख्यतया निर्देशः कृतः,

''पूर्वविद्धाष्टमी या तु उदये नवमीदिने,
मुहूर्तमपि संयुक्ता सम्पूर्णा साऽष्टमी भवेत्''

एवं द्विविधवाक्यगतिम् उपपाद्य जन्माष्टम्या रात्रिप्रधानत्ववादिनः प्रति वदन्तो वाक्यान्तरव्यवस्थाम् आहुः **एतेनैव** इति, अविद्धायां जन्मनिश्चयाद् उक्तवाक्य-व्यवस्थापनेन इति अर्थः. एवं वेधरहितैव उपोष्या इति प्रतिपाद्य वक्ष्यमाण-भृगुवाक्यदर्शनज-विद्धाकार्यत्व-भ्रमभङ्गाय भृगुवाक्यम् उपन्यस्य तदर्थम् आहुः **यत्तु** इति आरभ्य **तथा इति अर्थः** इत्यन्तम्. **न परदिने** इति न द्वितीयदिने निशीथव्यापिनी इति अर्थः. अत्र यथा 'श्रावणे' इत्यादिग्रन्थेन **''श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतम्''** इत्यादौ 'श्रावण'शब्द-'व्रत'शब्दयोः श्रवणात् **''तिथिकृत्ये च कृष्णादिव्रते शुक्लादिमेव च''** इति श्रवणाच्च तिथिकृत्यत्वात् कृष्णादिश्रावणे जन्माष्टमी कार्या इति कस्यचिद् भ्रमः स्यात् स न कार्यः, किन्तु तिथिकृत्यत्वेऽपि व्रतत्वस्य अक्षतत्वाद् जयन्तीवत् कालान्तराविधानाच्च शुक्लादिरेव ग्राह्यः. जयन्त्यां तु उभयोरपि[४५] ग्रहणाद् उभौ कृष्णादी ग्राह्यौ इत्यपि उक्तं ज्ञेयम्[४६]. ननु स्कान्द-पाद्मवचनयोरपि जयन्तीपरत्वोक्तौ किं बाधकम् इति अतः आहुः **जन्माष्टमी** इत्यादि. 'रोहिणी'पदतात्पर्यम् आहुः **जयन्त्याम्** इत्यादि. ननु विद्धाधिकायां भवतु अयं निर्णयः, शुद्धाधिकायां तु **''विहीनशल्यापि विवर्जनीया पद्यग्रतो वृद्धिम् उपैति पक्षः''** इति

इति वाक्यात् पूर्ववेधाभावे नवम्याम् उदयसमये अष्टमीसद्भावेऽपि न सा ग्राह्या, किन्तु पूर्वैव, त्यागहेताः वेधस्य अभावात्. तद् एवं सप्तमीवेधरहिता जन्माष्टमी निशीथयोगे तदयोगे च नक्षत्रयोगे तदयोगेऽपि सा[-५] कार्या. एतावान् परं विशेषः, वेधरहितायामेव चेद् नक्षत्रयोगे निशीथे बुधस्य सोमस्य वा वारश्च भवति तदा तत्प्रयुक्तः फलविशेषो भवति. तदुक्तं स्कन्दपुराणे

''उदये चाष्टमी किञ्चिद् नवमी सकला यदि,
भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता,
अपि वर्षशतेनापि लभ्यते वाऽथवा न वा''.

पद्मपुराणेऽपि

''प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः,
यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता,
किं पुनः बुधवारेण सोमेनापि विशेषतः,
किं पुनः नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा''

इति.

''यथा मलिम्लुचः पूर्वो दैवो मासः तथोत्तरः,
त्याज्या तिथिः तथा पूर्वा वृद्धौ ग्राह्या तथोत्तरा''

इति वाक्याद् द्वितीयैव कार्या इति पूर्वोक्तः शुद्धाधिकानिर्णयो न साधुः इत्यतः आहुः **पूर्वे**त्यादि **अभावाद्** इत्यन्तम्. तथा च तेषां सामान्यत्वाद् न तैः एतन्निर्णयः किन्तु प्रातिस्विकेन अनेनैव निर्णयः इति पूर्वोक्तं साध्वेव इति अर्थः[४७].

फलितम् आहुः, **तदेवम्**... इत्यादि **कार्या** इत्यन्तम्. **तत्** तस्माद् उक्तहेतोः.

''पुरा देवैः ऋषिगणैः स्वपदच्युतिशङ्कया,
सप्तमीवेधजालेन गोपितं चाष्टमीव्रतम्,
तस्मात् सर्वप्रयत्नेन त्याज्यमेवाशुभं बुधैः,
वेधे पुण्यं क्षयं याति तमः सूर्योदये यथा''

इति स्कान्दात्.

''पञ्चगव्यं यथा शुद्धं न ग्राह्यं मद्यसंयुतम्,
रविविद्धा तथा त्याज्या रोहिणीसहिता यदि''

इति पाद्मात् च वा इति अर्थः. **एतावान्** इत्यादि **मुक्तिदा** इत्यन्तो ग्रन्थः स्पष्टः.

“**पूर्वविद्धाष्टमी या तु उदये नवमीदिने**” इति वाक्यात् पूर्वविद्धायाः परदिने मुहूर्त्तमपि सत्त्व एव पूर्वविद्धायाः त्यागो नतु असत्त्वेऽपि. केचित्तु

“जन्माष्टमीं पूर्वविद्धां स ऋक्षां सकलामपि,

विहाय नवमीं शुद्धाम् उपोष्य व्रतम् आचरेत्”

इति व्यासवचनात् पूर्वविद्धायाः क्षये (तु) शुद्धैव नवमी उपोष्या वचनबलाद्, एकादश्या दशमीवेधे शुद्धद्वादशीवद् इति वदन्ति. तत्र यदि एतद् वचनं समूलकं तदा तथैव. नो चेत् पूर्वोक्तरीतिरेव अनुसर्त्तव्या.

ननु विद्धाक्षये किं कार्यम् इति आकाङ्क्षायां प्राचोर्वादिनोः मतद्वयम् अनुवदन्ति **पूर्वे**त्यादि **वदन्ति** इति अन्तम्. **इति** इति अन्तं मतम् अपरार्ककृष्णपण्डितादीनाम्, द्वितीयं विष्णुभक्तिचन्द्रोदयादीनां ज्ञेयम्. एवं मतद्वयम् अनूद्य सिद्धान्तम् आहुः तत्र इत्यादि. **नो चेद्,** वचनमूलालाभे **पूर्वोक्तरीतिः अनुसर्त्तव्या,** अव्यवहितपूर्वोक्त एकादश्या दशमीवेधे शुद्धद्वादशीवद् इति प्रकारो अनुसर्त्तव्यः. यद्वा पूर्वविद्धाष्टमी इति वाक्यस्य या अगत्या अन्यग्रहणरूपा रीतिः विद्धाक्षये परैः आदृता सा रीतिः नवम्याम् अनुसर्त्तव्या. अयम् अर्थः

“पूर्वविद्धा यथा नन्दा वर्जिता श्रवणान्विता,

तथाऽष्टमीं पूर्वविद्धां सऋक्षामपि सन्त्यजेत्”

ति अपरार्कधृतपाद्मवचनेन अष्टमीत्यागः एकादशीत्यागवद् अतिदिश्यते. एकादशीत्यागप्रकारश्च

“दिनक्षये तु शुद्धैव द्वादशी मोक्षकाङ्क्षिभिः,

उपोष्या दशमीयुक्ता नोपोष्यैकादशी तिथिः”

इति सुमन्तुना द्वादशीं गौणकालं गृहीत्वा मोक्षकामपरत्वेन व्यवस्थापितः तथैव अष्टमीं त्यजेत्. नवमीं गौणकालं गृहीत्वा त्यजेद् इति प्रकारो अनुसर्त्तव्यः इति. (हरिवल्लभसुधोदये) कूर्मपुराणेऽपि

“दिनक्षये तु संप्राप्ते उपोष्या द्वादशी भवेत्,

दशमीशेषसंयुक्तां न कुर्वीत कदाचन”

इति. यद्यपि

“अर्द्धरात्रम् अतिक्रम्य दशमी दृश्यते यदि,

तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्”

इत्यपि कूर्मपुराणे अस्ति तथापि स त्यागो न अत्र अतिदेशविषयः[४९], **“उदयाद्**

उदयात् प्रोक्ता'' इति वाक्येन प्रतिबद्धत्वात्. तस्माद् अयमेव विषयः इति दिक्. न च भवतु अष्टमीत्यागः तथा, तथापि द्वादशीवद् नवमीप्रापकवचनाभावाद् नवम्युपोषणं न सांप्रतम् इति वाच्यं, विद्धानिषेधैरेव त्यागस्य सिद्धौ अतिदेशस्य अनारभ्यत्वापातात्. अथ ग्रहिलतया विधिवाक्यएव चेद् आग्रहः क्रियते तदा तथैव विधिवाक्यमपि सोपपत्तिकम् उदाह्रियते. तथाहि

''विना ऋक्षेण कर्त्तव्या नवमी संयुताऽष्टमी,
सऋक्षापि न कर्त्तव्या सप्तमीसंयुताष्टमी''

इति हरिवल्लभसुधोदये स्कान्दम् अवधारय. कथम् अत्र विधिलाभः इति चेद् इत्थम्. अमिश्रणार्थक'यु'धातुप्रयोगेण सम्यक्-लेशमात्रेणापि युता अमिश्रिता अष्टमी यस्यां सा संयुताष्टमी तादृशी नवमी कर्त्तव्या उपोष्या. तत्र हेतुः उत्तरार्द्धाद् अवधेयः इति एवं वचनव्यक्तेः इति जानीहि. न च अत्र विनिगमकाभावः शङ्क्यः. तर्कैः तन्निश्चयात्. तथा हि.

प्रस्तुतनवमी यदि स्वानुगुणतिथिगौणकालत्वेन उपोष्या[५०] न स्यात् तत्तिथ्यदूषक-वेधनिरूपणयोग्या[५१] न स्यात्, तत्तिथिदूषक-वेधनिरूपणायोग्यत्वे सति यद्यदूषक-वेधनिरूपणयोग्या[५२] न स्यात्, तत्तिथिवेधनिरूपणयोग्यैव न स्याद् इति.

किञ्च अनेन व्याप्तिमूलभूतेन तर्केण उपोष्यत्वम् अनुमातुमपि शक्यम्. तथा हि. प्रस्तुतनवमी स्वानुगुणतिथिगौणकालत्वेन उपोष्या तत्तिथ्यदूषकवेधनिरूपण-योग्यत्वाद्, यद् एवं तद् एवं द्वादशीवद्, यद् न एवं तद् न एवं दशमीवत्. अनुगुणत्वं च अत्र तद्वेधघटितत्वे सति तन्निरूपितदोषरहितत्वं, तन्निरूपितगुणवत्वं वा. वेधत्वं च गुणदोषान्यतर-प्रयोजक-सम्बन्धविशेषत्वं बोध्यम्. विषयशोधकाश्च तर्काः सन्ति. प्रस्तुतनवमी यदि जन्माष्टमीगौणकालत्वेन उपोष्या न स्यात् प्रातिस्विकवाक्येषु तद्विद्धजन्माष्टमी प्रशंसापि न स्यात्. इत्थं प्रशंसा यदि योगविशेषज-फलविशेष-सूचनमात्रफलिका स्याद्, बुधसोमादिवद् उपलक्षणविधामात्रेणैव स्यात्. किञ्च नवमी यदि तथा उपोष्या न स्याद्, भगवज्जन्मतिथिः नवमीसहिता न स्याद् इति एवं रूपा अन्येऽपि उन्नेयाः. तस्माद् अदूषकवेधघटकत्व-प्रशस्तवेधघटकत्वोत्सवाधिकरणत्व-रूपानुकूल-तर्कत्रयेण **''यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः''** इति वाक्येन च उक्तवाक्यार्थो[५३] नवम्युपोषणविधायकएव विनिगन्तव्यः. उत्सवाधिकरणत्वं च सुबोधिन्यां पुत्रोत्सवादिकं

च शुद्धनवम्यामेव जातम् इति श्रीमदाचार्यचरणोक्तिभिः अवगन्तव्यम्.

यत्तु कैश्चिद् विद्धाक्षये विद्धोपवासो अगत्या कर्त्तव्यः इति प्रत्यपादि तद् अप्रयोजकत्वाद् विद्धानिन्दार्थवादाद् निबन्धेषु परस्परं व्यवस्थाकलहदर्शनाच्च अनवधानविजृम्भितमेव[५४].

प्रकृतम् अनुसरामः. यद्वा अत्र 'रीति'शब्दः संप्रदायवाची. तथा च प्राचीनशिष्ट–वैष्णवोक्तसंप्रदायो अनुसर्त्तव्यः इति अर्थः. न च एवम् अन्धपरम्परापत्तिः, सदाचारस्यापि धर्ममूलत्वात्, ''**श्रुतिः स्मृतिः सदाचारः**'' इति वाक्यात्. नच स्मृत्यपेक्षया सदाचारो निर्बलः इति वाच्यं ''**साधूनां समयश्चापि प्रमाणं वेदवद् भवेत्**'' इति वाक्ये वेदवद् इति अतिदेशेन स्मृत्यपेक्षया कलौ तस्य सबलत्वबोधनात्. न[५५] च इदं वाक्यं

''**यत्र सायं गृहत्वं च मुनिभिः तत्त्वतत्परैः,**
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः,
निवर्त्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः''

इति कलिवर्ज्यम् उपक्रम्य पठनात् तत्रैव प्राबल्यं बोधयतीति न अन्यत्र तस्य प्राबल्यम् इति वाच्यं, वचनस्य स्मार्त्तत्वेन स्मृत्यैव निवृत्तिसम्भवे[५६] एतानि इति सार्द्धपद्यवैयर्थ्यापातात्. तस्मात् तत्प्राबल्यबोधनायैव[५७] तदुक्तिः इति[५८] दिक्. अतएव माधवोपि गौरीतृतीयानिर्णये मुहूर्त्तमात्रायां विद्धाधिकायां व्रतकरणे शिष्टाचारमेव शरणीचकार. न च शिष्टानामपि बहुविधत्वात् पुनर्विनिगमनाविरहः इति वाच्यम्, अवतारकालिकशिष्टानाम् अत्र विवक्षितत्वात्. ते तु शुद्धनवम्यामेव जन्मोत्सवादिकं चक्रिरे, नवम्यामेव ज्ञानात्. यदि च विद्धाक्षये कदाचिद् विद्धायां तैः कृतः स्यात् तथा इतिहासोपि क्वापि भवेदेव. तदभावाच्च एवमेव निश्चीयते इति न कापि अनुपपत्तिः. ननु यद्येवं तदा निर्णये स्फुटमेव कुतो न उक्तम् इति चेत्, इतः. व्रते हि निमित्तं भगवज्जन्म तत्तु विद्धायामिव नवम्यामपि न प्राप्यते, लोकन्यायेन प्राप्तः कालस्तु ''वर्जनीया प्रयत्नेन'' इति वाक्ये हेतूक्तिपुरःसरं वर्ज्यते, तथा सति व्रताभावे प्रसक्ते उत्सवाधिकरणकालम् आदायैव व्रतं कार्यम्. उत्सवान्ते पारणविधानाद् व्रते उत्सवाङ्गत्वस्यापि शक्यवचनत्वात्. उत्सवस्तु श्रीनन्दादिकृतः स्फुटएव नवम्याम् इति प्रकृते ते एव शिष्टाः 'पूर्व'शब्देन परामृष्टाः, भक्तिमार्गस्य गोप्यत्वाच्च स्फुटं न उक्ता इति जानीहि. अतएव श्रीमदाचार्यचरणैः ''यदा बहिर्गन्तुमियेष'' इत्यस्य व्याख्याने ''मुहूर्त्तानन्तरं सा जाता'' इति ज्ञायते. नवम्यां च सा जाता. रोहिणी तु तुल्या. अतो रोहिण्याः कृत्तिकावेधो न

इत्थं[-६] श्रीगोकुलाधीशप्रादुर्भावदिनव्रतम्।।
अस्माभिर्निरणाय्येतत् पदाम्भोजप्रसादतः।।

।। इति श्रीविट्ठलदीक्षितविरचितो जन्माष्टमीनिर्णयः ।।

दोषाय. सप्तमीवेधस्तु दोषायैव, इति विद्धात्यागबीजम् उक्त्वा ''पुत्रोत्सवादिकं च शुद्धनवम्यामेव जातम् इति शुद्धाष्टम्यभावे केवला नवमी उपोष्या इति केवलनवम्युपोषणे बीजम् उक्तम् इति पूर्वोक्तम् अनवद्यम् इति दिक्.

ननु व्रतस्य पारणान्तत्वनियमात् तद्विचारः कुतो न कृतः इति चेद्, विद्धात्यागे कृते द्वितीयदिने तिथ्यभावेन ऋक्षाप्रयोजकत्वस्य च साधितत्वेन तदोत्सवान्तस्यापि जातत्वेन अनुक्तसिद्धत्वादेव इति जानीहि.

उपसंहरन्ति **इत्थम्** इत्यादि. यद्वा एवं योज्यं **–श्रीगोकुलाधीश–प्रादुर्भावदिनव्रतम् इत्थम्**, एवंप्रकारकमेव न अन्यथा इति अर्थः. **अस्माभिः एतद् निरणायि**, एवं निर्णयकरणे किं बीजम् इति आकाङ्क्षायाम् आहुः, **पदे**त्यादि. पदं सुप्ति(?)–तिङन्यतर–विशिष्टवर्णसमुदायः. तदेव अम्भोजमिव अम्भोजम् आह्लाद–कारित्वादिना, तत्प्रसादतः तदाशयस्फुटीकाराद् इति अर्थः. तथा च ''**पदद्वयं सुप्–तिङन्तं ताभ्यां चलति वाक्पतिः**'' इति तत्त्वदीपोक्तेः नामात्मकस्य भगवतः चरणरूपम् इदम् इति तत्प्रसाद एवंलक्षणएव उचितः. यथा मनसो हर्षलक्षणो दिशां दूरदर्शनलक्षणो नीरस्य नैर्मल्यलक्षण आकाशस्य व्यभ्रत्वलक्षणः तथा शब्दस्य तात्पर्यवैशद्यलक्षणः तस्माद् इति भावः इति दिक्.

इति सत्तर्कसहस्रैस्तदुपोद्बलकैरमीभिरपि वाक्यैः।।
बाधेऽपि वादभाजां धीराः किं नेह लज्जते धीर्वः।।१।।
सद्भिर्विचारचातुर्यविद्भिर्विद्धातिथिक्षये।।
शास्त्रोक्तिबलमाश्रित्य नवम्येवमुपोष्यताम्।।२।।
इति प्रभुपदाम्भोजमधुव्रततया मया।।
कृपाबलमुपाश्रित्य विवृतो निर्णयाशयः।।३।।
यदत्र सदसद्वापि जीवबुध्या मयोदितम्।।
प्रभुभिस्तत्तदीयैश्च क्षम्यतां बालचापलम्।।४।।

इति श्रीवल्लभनन्दनचरणैकतान–पुरुषोत्तमविरचितो
जन्माष्टमीनिर्णयप्रकाशः सम्पूर्णः.

(प्राचिनतमप्रतानपुस्तके कुत्रचित् कैश्चित् कृता कठिनांशबोधिनी टिप्पणी. अर्थसौकर्यार्थम् अत्र मुद्रिता.

१.कलिना युगेन कलितः सम्पादितः यो वादिषु कलिः कलहः, तेन कलितं सम्पादितम् अन्तःकरण–कलिलम्.

२.स्वरूपभेदाद् इति अर्थः.

३.ऋक्षसाहित्यासाहित्याभ्याम्.

४.विरुद्धमानोत्पादकम्.

५.'पूर्वविद्धाष्टमी'वाक्ये.

६.अष्टयामव्यापिन्यष्टम्येव.

७.मुख्यकालगौणकालयोः मध्ये.

८.अधिकदेशव्याप्तियुता.

९.निषेधस्य निषेधकं वाक्यं प्रातिस्विकम्, पूर्वविद्धेत्यादिना इति अर्थः.

१०.सूर्योदयव्याप्त्या इति अर्थः.

११.विद्ध्यति इति अर्थः.

१२.कलाकाष्ठा इति वाक्यस्य.

१३.कलाकाष्ठा इत्यस्य विशेषवाक्यत्वेन स्तावकत्वाभावादेव.

१४.ननु 'अविद्धायां तु सर्क्षायां जातो देवकीनन्दनः' इत्यादिवाक्याद् अष्टम्यामेव जन्मप्राप्ति! न तु सप्तमीविद्धायाम् अतः 'पलवेधेपि विप्रेन्द्रे'त्यादिना निषेधो अनुपपन्नः. न च ''कार्या विद्धापि सप्तम्या रोहिणी सहिताष्टमी''त्यादिना प्राप्तस्यैव निषेध इति वाच्यम्. 'कार्या विद्धे'त्यादितिथौ जयन्ती सप्तमीविद्धानिषेधकवाक्यानां जन्माष्टमीपरत्वं तद्विधायकवाक्यानां जयन्तीपरत्वम् इति उभय–प्रकरणस्थत्वं, सप्तमीविद्धायां व्रतविधायकवाक्यानां तत्रैव व्रतनिषेधकवाक्यानां च जयन्ती–जन्माष्टमीरूपविषयभेदेन व्यवस्थापनम् अनुचितम् इति अर्थः.

१५.श्रुति–लिङ्ग–वाक्य–प्रकरण–स्थान–समाख्यानां समवाये पारदौर्बल्यम्. अर्थविप्रकर्षाद् इति जैमिनीसूत्रात्.

१६.'सिंहेऽर्के रोहिणीयुक्ते'त्यादिषु 'जयन्ती'पदस्य श्रुतिः, मुहूर्तमपि–अहोरात्र इत्यादिषु यज्जयन्तीलिङ्गं ताभ्याम् इति अर्थः.

१७.न* च अनियतएव स इति वाच्यम्. अनियतत्वस्य अशक्यवचनत्वात्. तथा हि, किम् अत्र पूर्वेद्युरेव निशीथव्याप्तौ विध्यवकाशः, परेद्युरेव निशीथव्याप्तौ च निषेधावकाशो, दिनद्वयेपि तद्व्याप्तावव्याप्तौ च विरोध, उत उभयत्र, परेद्युश्च तद्व्याप्तौ निषेधाकाशः, उभयेद्युरव्याप्तौ च विरोधः शेषे विध्यवकाशः इति न आद्यः, अवकाशस्थले कर्मकालशास्त्रेणैव निर्वाहाद् उभयोः आनर्थक्यप्रसङ्गात्. न द्वितीयः उभयत्र व्याप्तिस्थले कर्मकालशास्त्रस्योभयपक्षपातितया विरोधस्यैव आपातात्. अन्यत्र च आनर्थक्यस्यैव दर्शितत्वात्. यदि च सामान्यविशेषभावेन उभयसार्थकत्वम् इति भाव्यते तथापि विरोधस्तु दुष्परिहर* एव.

(–१७ ख–ग पुस्तकेऽपि एवमेव पाठः)

(*अयं भागो अत्र एकस्मिन् प्राचीनतमे पुस्तके वर्तमानोपि बहुषु प्राचीनेषु पुस्तकेषु अविद्यमानत्वाद्

अधस्ताद् रक्षित:. श्रीपुरुषोत्तमचरणै: पुन: संशोध्य वर्धितोसौ प्रतानग्रन्थ:. प्रतानकाराणां समये एव लिखितेषु पुस्तकेषु शोधवृद्ध्योः उपलम्भाद् इत्येवम् अनुभवयुजो मीमांसन्ते.

*विशेषशास्त्रेण सामान्यस्य अस्य सङ्कोचे चतुर्धाकरणवत् कर्मकालशास्त्रस्य अन्यत्र प्रवृत्तिप्रतिरोध–प्रसङ्गात्, 'यत्'शब्दबोधित–सामान्यताबाधप्रसङ्गाच्च. असङ्कोचे विरोधापरिहाराच्च. ''यो यस्य विहितः कालः कर्मणस्तदुपक्रमे, तिथिर्याभिमता सा तु कार्या नोपक्रमोज्झते''ति.)

यदि च विरोधस्थले कर्मोपक्रमकालशास्त्रस्य निषेधानुग्राहकत्वं विभाव्य स परिह्रियते. तदापि अर्द्धरात्रस्य पूजाकालत्वमिति तत्रत्यपूजाया: प्रातरुपक्रमाभावेन प्रातः तत्कालाभावात् तद्दोषतादवस्थ्यम्. उपवासस्य तु अहोरात्रभोजनाभावरूपस्य कर्मत्वमेव दुर्घटम् इति पूर्ववदेव दोष:. यदि च प्रत्यवायप्रागभावपरिपालनस्य विद्धाया इव गौणकर्मत्वं विभाव्यते तदापि विद्धाक्षयातिरिक्तस्थले निषेधस्यैव प्राबल्यम् इति तदीयव्यवस्था वो दुष्टा इत्येव दोष:. सिद्धान्ते तु श्रीमदाचार्यचरणैः एकादश्यतिदेशेनैव जन्माष्टमी निर्णीतेति निमित्तकालस्यैव निर्णयप्रयोजकत्वं न तु अधिकरणकालस्यापि इति न कोपि दोषः इति दिक्.

१८.सूर्योदये सप्तमीवेधस्य इति अर्थः.

१९.द्वैतनिर्णयकारभगवद्भास्करयोः.

२०.तां पुण्यां समुपावसेद् इति प्रत्यक्षविधिः. ''ये न कुर्वन्ति जानन्तः कृष्णजन्माष्टमीव्रतम्, ते भवन्ति महाप्राज्ञ व्याला महति कानने'' इत्युन्नीतविधिः व्रताकरणे दोषो वा. 'उदये चाष्टमी'तिव्याख्येयवाक्यम्.

२१.गुणऋक्षयोगः फलं तद्वाक्योक्तम्.

२२.व्रतोपयोगी इति अर्थः.

२३.'भवेद्' इति लिङ्घटितेत्यर्थः.

२४.ननु जन्माष्टमीव्रतम् उपवसेद् इति शब्दप्रायं न भवति. तत्र हि यदि जातो भवेत् तदोपवसेद् इति सम्भावनार्थकत्वात् लिङ्विधेः अप्राप्तत्वाद् इत्यतः आहुः यदीत्यादि.

२५.तमेव उपवसेत् कालं तत्र कुर्याद् जागरम् इत्यापाद्यकोटौ.

२६.विध्यभावे तदनुवादस्य अशक्यनिरूपणत्वाद् इति भावः.

२७.जन्माष्टम्यां भगवज्जन्म शर्वरीत्वं च जयन्त्यां योगविशेषः तयोर्भेदाद् इत्यर्थः.

२८.''रोहिणीसहिता कृष्णा मासे भाद्रपदेष्टमी'' इति वाक्यस्य.

२९.अनन्वितत्वाद् विद्धायां तु सर्क्षायां जातः इति वाक्यविरुद्धार्थापाताच्च इति भावः.

३०.मूलभूतश्रुतिकल्पना. स्मृतेः श्रुतिमूलकत्वात् स्मृत्युक्तोपवासद्वयमूलभूतश्रुतिद्वयकल्पना च स्मृत्युक्तपदार्थस्य श्रुतिमूलकत्वाद् इति भावः.

३१.''हरिवंशेऽपि तथा 'नवम्यामेव संजाता कृष्णपक्षस्य वै तिथौ' इति वचनात्''. इति अर्वाचीने सर्वपुस्तकेषु वर्तते. हरिवंशेन साकं गणने अत्र 'पुराणपञ्चक' पाठः.

३२.श्रीभागवत–विष्णुपुराण–भविष्यपुराण–ब्रह्मपुराण–हरिवंशाख्येति पुराणपञ्चकम्.

३३.वशिष्ठवचनम् ''अष्टमी रोहिणीयुक्ता निश्यर्द्धे दृश्यते यदि, मुख्यकाल इति ख्यातः तत्र जातो हरिः स्वयम्''.

३४.'ईषदाधिक्यस्य' प्राचीनपाठः.

३५.''पूर्वविद्धाष्टमी या तु उदये नवमीदिने'' इति. ''कलाकाष्ठा मुहूर्तापि यदा कृष्णाष्टमी तिथिः'' इति च.

३६-३७.'पूर्वविद्धाष्टमी'त्यादिवाक्यद्वयस्य.

३८.परेद्युर्दिनद्वये च अष्टम्या निशीथसत्वविषयकं निर्णयं पुरस्कृत्यैव अस्य लिखनात्. 'पूर्वविद्धाष्टमी' इत्यादिवाक्यद्वयस्थ'नवमी'पदविचारे च सूर्योदयोत्तरप्रवृत्तसंपूर्णनवम्या एव सम्यग्भानेन उक्तविधविषयस्य तत्र अलाभात्. (इति वर्धितपाठः)

३९.''यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति''.

४०.'सोपवासे'तिवाक्योक्तयुक्त्या इति अर्थः.

४१.माधवधृतस्कान्दवचनैकमूलतया.

४२.न तु गुणत्वप्रतिपादकम् इति शेषः.

४३.व्रतस्य पूजाङ्गत्वप्रतीतिः.

४४.उपवासस्य.

४५.श्रावणभाद्रपदयोः.

४६.''सप्तमी संयुताष्टम्याम्'' इति स्कान्दम्. ''पूर्वविद्धाष्टमी या तु'' इति पाद्मम्.

४७.''वस्तुतस्तु ते द्वे अपि वाक्ये एकादशीविशेषविषये इति न च आशङ्का न च उत्तरम्'' इति अधिकम्.

४८.अत्र क्वचित् पुस्तके ''पूर्वं यथा विद्धाधिकायां विद्धानिषेधश्रवणात् परोपोष्या तथा विद्धाक्षयेऽपि विद्धानिषेधश्रवणात् परैवोपोष्या इति अर्थः.(इति नाथद्वारीयमुद्रिते)

४९.जन्माष्टमीविषये.

५०.'स्व'पदेन नवमी ग्राह्या. स्वानुगुणतिथिः शुद्धाष्टमी तस्या गौणकालत्वेन इति अर्थः.

५१.स्वानुगुणतिथ्यदूषको यो वेधः तन्निरूपणयोग्या इति अर्थः.

५२.नवम्याः तत्तिथ्यदूषकवेधनिरूपणयोग्यत्वेपि तर्कं प्रमाणयन्ति तत्तिथीत्यादि.

५३.''विना ऋक्षेण कर्तव्या नवमी संयुताष्टमी'' इति स्कान्दवाक्यार्थः.

५४.प्रमादग्रस्तम्.

५५.'साधूनां समय' इति वाक्यम्. इदं निर्णयसिन्धौ कलिवर्ज्यप्रकरणे उक्तम्. तत्रैव ''अटन्ति वसुधां विप्राः पृथिवीदर्शनाय च, अनिकेता अनाहारा यत्र सत्यं गृहास्तु ते'' इति विष्णुपुराणीयम् उक्तम्.

५६.कलिवर्ज्यानां कलौ निवृत्तिसम्भवे.

५७.सर्वत्र तत्प्राबल्येत्यर्थः.

५८.सार्धपद्योक्तिः.

नवीनपाठभेदाः

-१'प्रयोजनतया' इति ख-ग पाठः.

-२'आशयेन दिवावेत्यादिवचनम् उक्तम्' इति ख-ग पाठः.

-३'प्रत्युक्तो ज्ञेयः' इति ख पाठः.

-४''अर्थकत्वे अष्टौ वा. सर्वेषामपि...'' इति ख पाठः.

-५'सदा कार्या' इति ख-ग पाठः.

श्रीपुरुषोत्तमचरणविरचितः

।। उत्सवप्रतानः ।।

अथ भाद्रपदोत्सवः

अतः परं स्वतन्त्रतया निर्णीयन्ते.

अथ भाद्रपदशुक्लाष्टम्यां श्रीमत्स्वामिन्युत्सवः.

स[1] च पाद्मोत्तरखण्डे उक्तः.

''वृषभानुरितिख्यातो गोपो ज्ञातिमतां वरः.
तस्य पत्नी महाभागा नाम्ना सौभाग्यसुन्दरी.
तावुभौ ब्रह्मसावित्र्यौ स्वांशेन जगतीं गतौ.
तयोः गेहे महालक्ष्मीः प्रादुर्भूता सुरेश्वरी.
अयोनिजा विशालाक्षी कृष्णस्यानन्दकारिणी.
मासि भाद्रपदेऽष्टम्यां भौमे मूलर्क्षमण्डिते''.

इति. सतु लोकन्यायेन[2] विद्धायामेव कार्यो विद्धाक्षये. अन्यथातु औदयिक्येव तिथिः ग्राह्या

''युगाद्या[3] वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया.
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता[4]''

इति निर्णयसिन्धौ कृत्यतत्त्वार्णववचनात्. दिनद्वये तद्व्याप्तौ तु पूर्वैव

''षष्टिदण्डात्मिकायास्तु तिथेर्निष्क्रमणं परे.
अकर्मण्यं तिथिमलं विद्यादेकादशीं विना''

इति ज्योतिर्निबन्धे वाक्यात्. अयं भक्तिमार्गसम्प्रदायप्राप्तत्वाद् आवश्यको न विशेषतो मार्यादिकपदवीम् अधिरोढुम् अर्हति इति उपरम्यते.

[**कैश्चित् प्राचीनैः विरचिता प्रतानटिप्पण्यः**

१.वर्धितपाठः. २.लोकजन्मदिवसादिन्यायेन. ३.कार्त्तिकशुक्लनवमी सत्ययुगादिः, वैशाखशुक्लतृतीया त्रेतादिः, माघस्य अमावास्या द्वापरादिः, भाद्रपदकृष्णत्रयोदशी कलियुगादिः. ४.युग्मवाक्यं न प्रवर्त्तते निर्बलत्वात् इति भावः.]

परिवर्त्तनोत्सवः

अत्र एकादश्यां द्वादश्यां वा परिवर्त्तनोत्सवः. स च सम्प्रदायाभावाद् न अत्र विविच्यते. श्रद्धया कश्चित् करोति चेद् वक्ष्यमाणप्रबोधिनीवत् तिथिं गृह्णातु.

भाद्रपदशुक्लद्वादश्यां श्रवणयुतायां वामनोत्सवः.

तदुक्तं निर्णयसिन्धौ श्रीभागवते अष्टमस्कन्धे

''श्रोणायां[1] श्रवणद्वादश्यां मुहूर्त्तेऽभिजिति[2] प्रभो,
सर्वे नक्षत्रताराद्याः चक्रुः तज्जन्मदक्षिणम्,
द्वादश्यां सविता तिष्ठन् मध्यं दिनगतो नृप,
'विजया' नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः'' इति.

हेमाद्रिदिनकरोद्योतयोस्तु भविष्ये

''एकादशी यदा सा स्यात् श्रवणेन समन्विता,
विजया सा तिथि प्रोक्ता भक्तानां विजयप्रदा''

इति उपक्रम्य

''अथ काले बहुतिथे गते सा[3] गुर्विणी भवत्,
सुषुवे नवमे मासि पुत्रं सा वामनं हरिम्''

इत्यादि च उक्त्वा

''एतत् सर्वं समभवद् एकादश्यां युधिष्ठिर,
तेनेष्टा देवदेवस्य सर्वथा विजयातिथिः''

इति उपसंहाराद् एकादश्याम् अङ्गीकृतम्. एवं कल्पभेदेन तिथिद्वयेऽपि मध्याह्नएव वामनाविर्भावः, **''अह्नो मध्ये वामनो रामरामौ''** इति पुराणसमुच्चयात्. एवं च श्रीभागवते श्रवणद्वादशीशब्देन श्रवणलाभेऽपि पुनः 'श्रोणा'पदोक्त्या श्रवणस्य आवश्यकता प्राप्यते. तिथी च उभे अपि अविरुद्धे.

''एकादशी द्वादशी च वैष्णव्यमपि तत्र चेत्,
तद्विष्णुशृङ्खलं नाम विष्णुसायुज्यकृद्भवेत्''

इति विष्णुधर्मोत्तरात्.

''द्वादशीं श्रवणर्क्षं चेत् स्पृशेत् एकादशीं यदि.
स एव वैष्णवो योगो विष्णुशृङ्खलसंज्ञकः.
तस्मिन् उपोष्य विधिवद् नरः प्रक्षीणकिल्बिषः.
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम्''

इति मात्स्याच्च. श्रवणस्य तिथिद्वयस्पर्शित्वेन शृङ्खलाघटकत्वे विष्णुशृङ्खलयोगः. स च पुण्यातिशयजनकः इति तादृशयोगसम्भवे तत्रैव उत्सवः कार्यः तदङ्गभूतं व्रतमपि तदैव.

यत्तु हेमाद्रौ **''द्वादशी श्रवणस्पृष्टा स्पृशेद् एकादशीं यदि''** इति श्रवणद्वादशी–स्पर्शमात्रेऽपि विष्णुशृङ्खलम् उक्तम्, तद्भ्रमसात्, स्पर्शस्य भावित्वेन तदानीं शृङ्खला–स्वरूपाभावात्. कल्याणरायैस्तु तदनूदितमिति न दोषः. वाक्यं तु द्वादशीश्रवणयोः एककालावच्छिन्नैकादशी–स्पर्शाभिप्रायम् इति दिक्.

यदा तु केवलायां शुद्धाधिकायां वा द्वादश्यामेव श्रवणयोगः तदा तु सर्क्षायां द्वादश्यामेव उत्सवः, श्रीभागवतवाक्यात्

''तिथिनक्षत्रयोर्योगो योगश्चैव नराधिप,
द्विकलो यदि लभ्येत स ज्ञेयो ह्याष्टयामिकः''

इति श्रवणद्वादशीप्रकरणीयभविष्योक्तेश्च. **''उदयव्यापिनी ग्राह्या श्रवणद्वादशीव्रते''** इति नारदीयस्य अयमेव विषयः. अत्र व्रतकरणेऽपि न पूर्वव्रतलोपः.

''एकादशीम् उपोष्यैव द्वादशीमप्युपोषयेत्,
न चात्र विधिलोपः स्याद् उभयोर्देवता हरिः''

इति भविष्योक्तेः. यदा च एकादश्यामेव श्रवणयोगो न द्वादश्यां न वा विष्णुशृङ्खलं तदा एकादश्यामेव उत्सवादिकम्. श्रीभागवतवाक्येन श्रोणावश्यकताप्राप्तेः भविष्येन आविर्भावप्राप्तेश्च.

''यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित्,
एकादशी तदोपोष्या पापघ्नी श्रवणान्विता,
उभयोर्देवता विष्णुः पुराणपुरुषोत्तमः,
विभेदोऽपि न कर्त्तव्यो विभेदात् पतते नरः''

इति नारदीयवाक्यात् व्रतेपि आनुगुण्याच्च. कल्याणरायाअपि एवम् आहुः. यदि च दशमीविद्धायामेव श्रवणयोगः तदा तु द्वादश्यामेव उत्सवादिकं, श्रीभागवते द्वादश्यामेव प्रादुर्भावोक्तेः.

''एकादश्यां[४] नरो भुक्त्वा द्वादश्यां समुपोषणात्,
व्रतद्वयकृतं पुण्यं सर्वं प्राप्नोत्यसंशयम्''

इति वाराहाद् व्रतद्वयफलाप्तेश्च, न[५] विद्धायाम्. विद्धादूषणबीजस्य सर्वत्र तौल्यात्[६].

यत्तु दिनकरोद्योतादौ

''दशम्यैकादशी यत्र सा नोपोष्या भवेत् तिथिः,

श्रवणेन तु संयुक्ता सा चेत् स्यात् सर्वकामदा''

इति वह्निपुराणाद् विद्धोपोष्या इति उक्तं तत् सकामपरं, 'सर्वकामदा' इति उक्तेः.

यदा तु प्रथमे अह्नि न विष्णुशृङ्खलं [पा.भे.१]द्वितीयदिने च द्वादश्याः मध्याह्नाव्याप्तिः, उभयत्र समविषमैकदेशव्याप्तिर्वा, तदापि पूर्वदिनमेव ग्राह्यम्. ''रुद्रेण द्वादशी'' इति युग्मवाक्यात्[७]. यदा तु दिनद्वयेऽपि न श्रवणयोगः तदाऽपि [पा.भे.२]द्वादश्यामेव उत्सवः. उपवासस्तु शक्तस्य उभयत्र, अशक्तस्य द्वादश्यामेव. यद्यपि

''द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि,

उपोष्यैकादशीं तत्र द्वादश्यां पूजयेत् हरिम्'' इति मात्स्ये.

''श्रवणेन सिते यत्र द्वादशी लभ्यते क्वचिद्,

उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद् हरिम्''

इति यमेन च पूजामात्रम् उक्तम्. तथाऽपि तत्र मासानुल्लेखात् तद् वामन-जयन्तीभिन्नद्वादशीपरम्. अतएव श्रीमदाचार्यचरणैः तत्वदीपे

''तथा वामनजयन्त्युत्सवकरणे एकादश्याम् उपोषणम् अकृत्वाऽपि द्वादश्याम् उपोषणं कार्यम्. किं बहुना उत्सवः प्रधानभूतः. भुक्त्वा च उत्सवो निषिद्धो, भगवदावेशाभावाद्''

इत्येव उक्तम्. तस्माद् एषएव व्रतनिश्चयः.

अत्र केचन एकादशीव्रतमात्रं कृत्वा द्वादश्याम् उत्सवोत्तरं पारणं कुर्वन्ति. तदाशयो नृसिंहजयन्तीनिर्णये विवेच्यः.

अथ पारणा विचार्यते. तत्र तावत् श्रवणद्वादशी-वामनजयन्त्योः अविरोधतः तन्त्रेण अनुष्ठानात् उभयोः पारणं यथासंभवम् उभयान्ते अन्यतरान्ते वा कार्यम्. तत्र अयंविषयविवेकः. यदा शुद्धन्यूनायां विद्धन्यूनायां वा द्वादश्यां श्रवणयोगो द्वितीयदिने च

---

१. 'द्वितीयदिने च न श्रवणं द्वादश्याश्च' इति ख पाठः.

२. ''द्वादश्या द्वितीयदिनएव मध्याह्नव्याप्तौ तस्यामेव उत्सवः'' इति ख पाठः.

स्वल्पं श्रवणं तदा त्रयोदश्यां पारणनिषेधस्य अभावेन

''एकादशी कलां प्राप्ता येन द्वादश्युपोषिता,
पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणम्''

इति विष्णुरहस्यात्.

''द्वादश्यैकादशी यत्र संगता त्रिदशाधिय,
ताम् उपोष्य ततः कुर्यात् त्रयोदश्यां तु पारणम्''

इति तत्त्वसागराच्च पुण्यातिशयजनकत्वेन च उभयान्ते पारणं कार्यम्. यदा च शुद्धाधिका विद्धाधिका वा द्वादशी श्रवणं च पूर्वदिने स्वल्पं सद् द्वितीयदिवसे वर्द्धते, तदा एकादशीव्रतमपि तन्त्रतः तत्रैव सिद्ध्यति.

''पूर्णा भवेत् यदा नन्दा[८] भद्रा चैव विवर्द्धते,
तदोपोष्या तु भद्रा स्यात् तिथिवृद्धिः प्रशस्यते''

इति गारुडात्.

''निष्कामस्तु गृही कुर्यात् उत्तरैकादशीं सदा,
प्रातर्भवतु वा मा वा द्वादशी च द्विजोत्तम''

इति स्कान्दाच्च. तादृशस्थले व्रतत्रयस्यापि पारणं श्रवणान्तनैरपेक्ष्येण स्वल्पद्वादश्यामेव कार्यम्.

''विशेषेण महीपाल श्रवणं वर्द्धते यदि,
तिथिक्षये न भोक्तव्यं द्वादशीं नैव लङ्घयेत्''

इति निर्णयामृते मार्कण्डेयोक्तेः. **क्षये** अन्ते इति अर्थः.

''एकादशीम् उपोष्यैव द्वादश्यां पारणं स्मृतम्,
त्रयोदश्यां न तत्कुर्याद् द्वादशद्वादशीक्षयाद्''

इति मात्स्यात् कौर्माच्च. यदि च तादृशस्थले श्रवणस्य मध्यभागः तथापि स उपेक्षणीयः[९], द्वादशीत्यागे द्वादशद्वादशीक्षयात्. मध्यभागमध्ये पारणे एकक्षयात्. 'आभाका' इत्यस्य समूलत्वेऽपि दोषस्य उभयत्र तौल्याद् इति. यदा तु शुद्धोनायां विद्धोनायां वा स्वल्पं श्रवणं द्वितीयदिने च भूयः तदा श्रवणमध्यभागः त्याज्यः.

''मैत्राद्यपादे[१०] स्वपितीह विष्णुः पौष्णान्त्यपादे[११] प्रतिबोधमेति,
श्रुतेश्च[१२] मध्ये परिवृत्तमेति सुप्तप्रबोधपरिवर्त्तनमेव वर्ज्यम्''

इति विष्णुधर्मवाक्यात्.

''आभाकासितपक्षस्य[१३] मैत्रश्रवणरेवती[१४],
सङ्गमे नैव भोक्तव्यं द्वादशद्वादशीर्हरेत्''

इति वाक्यं तु केचित् निर्मूलम् इति आहुः. यदि समूलं तदाऽपि पूर्वोक्त-विष्णुधर्मवाक्येन उपसंहारात् पूर्वोक्तैव व्यवस्था इति दिक्. इति भाद्रपदोत्सवः.

[कठिनांशटिप्पणी: १.श्रवणनक्षत्रस्थिते चन्द्रे श्रावणे इति यावत्. २.मध्याह्ने. ३.अदितिः. ४.अत्राशक्तो नरो ग्राह्यः. तेन अशक्तः फलादिकं भुक्त्वेत्यर्थः. शक्तस्य तूपवासद्वयस्यानुपदमेव वक्ष्यमाणत्वात्. ५.वर्धितपाठः. ६.विद्धादूषणबीजम्-पुण्यक्षयरूपम्. ७.''युग्माग्नियुगभूतानां षण्मुन्योर्वसुरन्ध्रयोः. रुद्रेण द्वादशीयुक्ता चतुर्दश्या च पूर्णिमा. प्रतिपद्यप्यमावास्या तिथ्योर्युग्ममहाफलम्''. इति युग्मवाक्यम्. ८.नंद=एकादशी, भद्रा=द्वादशी. ९.''श्रुतेश्च मध्ये परिवृत्तिमेति'', ''सुप्तप्रबोधपरिवर्तनमेव वर्ज्यम्'', इत्यनेन श्रवणमध्ये परिवर्त्तनेन तत्र च पारणानिषेधेपि स निषेध उपेक्षणीय इत्यर्थः.१०.मैत्रम्-अनुराधाम्. ११.पौष्णः-रेवती. १२.श्रुतिः-श्रवणम्. १३.'आभाके'त्यत्राषाढभाद्रपदकार्तिकाख्या मासा ग्राह्या, नामैकदेशे नामग्रहणात् सत्यादिवत्. १४.मैत्रः-अनुराधा.]

अथ आश्विनोत्सवाः

अथ आश्विने नवरात्रारम्भः.

औदयिक्यामेव प्रतिपद् इति ततएव पर्वंमन्तव्यम्. विशेषप्रयोजनाभावाच्च न विचार्यते.

विजयोत्सवः

अथ आश्विने शुद्धदशम्यां विजयोत्सवः. तन्निर्णयार्थं प्रतापमार्त्तण्ड-निर्णयामृत-भगवद्भास्कर-दिनकरोद्योत-हेमाद्रि-निर्णयसिन्धु-प्रभृतिस्थानि वचांसि पूर्वं सङ्गृह्यन्ते.

पुराणसमुच्चये

''दशम्यां च नरैः सम्यक् पूजनीयाऽपराजिता,
ऐशानीं दिशमाश्रित्य अपराहणे प्रयत्नतः,
या पूर्णा नवमीयुक्ता तस्यां पूज्याऽपराजिता,
क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः,
आश्विनस्य सिते पक्षे दशम्यां पूजयेत् नरः,
एकादश्यां न कुर्वीत पूजनं चापराजितम्'' इति.

श्रीवाशिष्ठगंगाधरशास्त्रिप्रणीतो विजयाविवेकः

अथ आश्विने शुक्ले दशम्यां विजयोत्सवे **''ऐशानीं दिशम्''** इति ऐशानीद्वारेण निर्गत्य इति अर्थः. **पूर्णा** इति दशमी, **श्रवणे च अपराजिता इति** विधेया इति शेषः. **समुल्लंघ्य** इति

ग्रन्थान्तरे

‘‘मूलेनागमनं देव्याः पूर्वाषाढासु पूजनम्,
उत्तरासु बलिं दद्यात् श्रवणे चापराजिता’’ इति.

स्कान्दे

‘‘दशमीं यः समुल्लङ्घ्य प्रस्थानं कुरुते नृपः,
तस्य संवत्सरं राज्ये न क्वापि विजयो भवेद्’’ इति.

भृगुरपि

‘‘आश्विनस्य सिते पक्षे दशम्यां सर्वराशिषु,
सायं काले शुभा यात्रा दिवा वा विजयक्षणे,
एकादशो मुहूर्त्तोऽपि विजयः परिकीर्त्तितः,
तस्मिन् सर्वैः विधातव्या यात्रा विजयकाङ्क्षिभिः’’ इति.

विश्वरूपः

‘‘आश्विनस्य सिते पक्षे सीमातिक्रमणोत्सवः,
विजयाय मुहूर्त्ताय कर्त्तव्यो विजयक्षणे,
नवम्या सहिता कार्या दशम्याश्वयुजे सिता,
एकादश्या युता जातु न कार्या जयकाङ्क्षिभिः’’ इति.

रत्नकोशे नारदः

‘‘ईषत्सन्ध्याम् अतिक्रान्तः किञ्चिद् उद्भिन्नतारकः,
स कालो विजयो ज्ञेयः सर्वकार्यार्थसिद्धिदः’’ इति.

नारदः

‘‘सूर्योदये यदा राजन् दृश्यते दशमी तिथिः,
आश्विने मासि शुक्ले तु विजयां तां विदुर्बुधाः,
ईषस्य दशमीं शुक्लां पूर्वविद्धां न कारयेत्,
श्रवणेनापि संयुक्तां राज्ञां पट्टाभिषेचने’’ इति.

धर्मविवृतौ

‘‘आश्विने दशमी शुक्ला श्रवणेन समन्विता,

एकादश्याम् इति शेषः. **सर्वराशिषु** इति चन्द्रादिविचारो नास्ति इति भावः. **विजयक्षण** इति विजयमुहूर्ते. **सूर्योदयः** इत्यादिवचनत्रयं पट्टाभिषेकपरम् इति अनुपदं स्पष्टीभविष्यतीति न पूर्ववचोविरोधः.

विजयादशमी प्रोक्ता सैव चात्यन्तदुर्लभा'' इति.

कश्यपः

''उदये दशमी किञ्चित् सम्पूर्णैकादशी यदि,
श्रवणर्क्षं यदा काले सा तिथिः विजयाऽभिधा.
श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः,
उल्लङ्घयेयुः सीमानं तद्दिनर्क्षे ततो नराः'' इति.

गोपथब्राह्मणे भविष्ये पुराणसमुच्चये च, वास्त्वादिपूजन-खंजनालोकनादि-रूपम् अनुष्ठेयान्तरमपि बहुवाक्यसमाजेन अपरार्कादौ उक्तम्. तत्र तिथिद्वैधे[1] पट्टाभिषेचने तु सर्वमते परैव. इतरेषु[2] तु श्रवणस्य कर्मकालव्याप्त्या केचन निर्णयम् आहुः. अपरे च तिथिस्पृक्श्रवणस्य कर्मकालव्याप्त्या. इतरे च दशम्याः[3] कर्मकाल-व्याप्त्या. श्रवणयोगाभावे तु सर्वेऽपि लल्लवाक्यम् उदाहृत्य[4] तिथिमेव प्रधानयन्ति. तत्कालं[5] बहवो अपराह्णमेव आहुः. अपरे च ईषत्संध्याम् अतिक्रान्तं प्रदोषम् आहुः. आद्यमपि एके त्रेधा[6] विभजन्ते. अन्ये तु पञ्चधा. विजयमुहूर्त्तमपि केचन एकादशम्

न च एवम् **''आश्विने दशमी शुक्ला''** इति सामान्यवचनं पट्टाभिषेकप्रकरणे किमर्थम् उक्तम् इति वाच्यम्. यदा पूर्वदिने सम्पूर्णा दशमी द्वितीयदिने च उदयकालएव तदा पूर्वदिनेपि काले श्रवणसत्वे सैव ग्राह्या, वेधाभावात् इति ध्वनयितुं यत् वक्ष्यन्ति.

पट्टाभिषेकः तावत् शुद्धाधिकायां प्रथमे अह्नि श्रवणसत्त्वे पूर्वैव. द्वितीये अह्निएव श्रवणसत्त्वे तु द्वितीयैव, अतिदुर्लभयोगलाभाद् इति. ननु एवमपि यात्रिकं 'श्रवणर्क्षेतु' इति किम् उक्तम्? सत्यम्, उदये इति वचसो यात्रापरत्वम् आशङ्कियात्रायादशम्यामेव विधानाद् इति वक्तुम्. 'श्रवणर्क्षेतु' इति पूर्वव्यवच्छेदेन सीमोल्लङ्घनादि-वचनात् पूर्ववाक्यं पट्टाभिषेकपरम्. हेमाद्रौ तु तद्वाक्यं व्रतप्रकरणे पठितम् इति तन्मते व्रतपरमेव तत्. समयमयूखेपि, उदय इति वाक्यं दक्षोक्त्या लिखितं तारकोदयपरं च इति तद्ग्रन्थविदुषां स्पष्टम्. अतएव[1] अत्र पूर्णायां सीमोल्लङ्घनं प्रतिपदम् उक्तम्. नतु पूर्ववाक्ये[2] किञ्चित्[3] **इतरेषु तु** इति[4] सीमोल्लंघनादिषु. 'श्रवणस्य' इति दशमीयुक्तस्य इति अर्थः. धर्मप्रवृत्तिवाक्ये **'समन्विते'**तिपदेन तात्कालिक-दशमीश्रवण-समन्वितस्य विवक्षितत्वात्. तथैव सम्यक्त्वाद्, नतु उदये किञ्चिद् दशमीसत्वे विजयमुहूर्ते श्रवणमात्रम् अत्र अभिप्रेतं, तिथिस्पृक्श्रवणस्य इति अपरमताद् अविशेषापत्तेः. तत्र कर्मकाले तिथेः सम्बन्धाभावात्. स्पर्शस्य किञ्चित् सम्बन्धे रूढेः. न च पूर्वमते श्रवणं कर्मकालिकम् परमते तु उदयकाले कर्मकाले च इति विशेषः. तथा सति पूर्वमते श्रवणकाले दशम्यभावेन दशमीश्रवणयोगाभावेन अत्यन्तदुर्लभयोगायोगेन प्रशस्ततरत्त्वानुपपादनाद् इति अन्यत्र विस्तृतम्. **इतरे च** इति. उभयदिने

आद्रियन्ते, इतरे तु पञ्चदशम्, अपरे च प्रदोषम् इति.

तत्र किम् आदरणीयम्? तत्तदाद्यमेव इति वदामः. कुतः? नक्षत्रप्राबल्याद् वचनस्वारस्याद् व्यवस्थितिसामञ्जस्यात् सकलानुष्ठेयकरणसौकर्याच्च इति. तथा हि.

''यत् पुण्यं नक्षत्रं तत् बट्कुर्वीत उपव्युषम्. यदा वै सूर्य उदेति, अथ नक्षत्रं नैति. यावति तत्र सूर्यो गच्छेत्. यत्र जघन्यं पश्येत्. तावति कुर्वीत यत्कारी स्यात्. पुण्याहएव कुरुते. एवं ह वै यज्ञेषु च शतद्युम्नं च मात्स्यो निरवसाययांचकार''

इति श्रुतिः हि पुण्याहे कर्मकरणं विदधाना नक्षत्रस्वल्पतायां कथं महत्कर्मकरणं

श्रवणसत्त्वे इति शेषः. अतएव उत्तरमताद् अविशेषः. **अभावे तु** इति. पूर्वव्यवच्छेदिना तुना पूर्वोक्तमतत्रयेपि श्रवणयोगः प्रत्याय्यते.

तत्तदाद्यम् इत्यादि अयम् अर्थः. श्रवणयुक्ते उक्तमतत्रये वक्ष्यमाणं नक्षत्रप्राबल्यं, श्रवणरहिततिथिप्रधानपक्षे तु पट्टाभिषेकीयवाक्यत्रयात् पूर्वोदाहृत-यावद्वचनस्वारस्यं, किञ्च केवलदशम्यां श्रवणसत्त्वे पट्टाभिषेकः नवमीविद्धदशम्यां केवलदशम्यां वा यात्रा इति व्यवस्था सम्भवति. अपराह्णमते तु सकलानुष्ठेय-करणसौकर्यम्. त्रेधा विभागपक्षे च एतत् सम्भवति एकादशमुहूर्त्तपक्षे च.

ननु एवं तिथिप्रधानपक्षे बहुसौष्ठवे श्रवणयुक्तदशम्यादरः किम् इति चेद्, धर्मप्रवृत्तिवाक्ये विधेयानुल्लेखात् अतिदुर्लभयोगोक्तेश्च इति आशयेन. नक्षत्रप्राबल्यं व्युत्पादयन्ति **तथा हि** इति. तद्बट् **कुर्वीत इति** तद् नक्षत्र बट् प्रत्यक्षं 'बट्' इति अव्ययं त्वशे हिंसार्थात् क्विपि अपिशब्दशक्तिवैचित्यात् प्रत्यक्षार्थत्वम्. प्रत्यक्षकरणोपायम् आह **उपव्युषम्** इति गतम्. किञ्च, 'उषः कालोऽष्टपञ्चाशत्' इति वेधविचारे लिखितवाक्याद् उषसि इति व्युषम् इति विभक्त्यर्थे अव्ययीभावः. अव्ययानां भमात्रे टिलोपः. **व्युष्ठं समीपम् उपव्युषं** पारिभाषिकसूर्योदयकाले इति अर्थः. अथवा उषेति रात्रौ अव्ययं, विगतरात्रिसमीपकाले इति अर्थः. तदानीं सूर्यतेजसा नक्षत्रतेजो अनभिभवात्. तदाह **यदा** इति पारिभाषिकसूर्योदयकाले इति अर्थः. **न एति** इति, सूर्यतेजसाऽभिभवं न एति इति अर्थः. **यावती**ति काले. **तत्र** इति नक्षत्रे. यत्र नक्षत्रे जघन्यं स्वतेजसा अभिभूतं गर्हितं रूपं पश्येत् दर्शयेत् इति अर्थः. **यत्कारी** इति पुण्याहे कर्मकारी इति अर्थः. **पुण्याहे** इति नक्षत्रयुक्ताहे इति अर्थः. **निरवसायां चकार** इति, अवसायस्यैव निश्चयार्थत्वेपि निरोद्योतकत्वाद् न दोषः. द्वौ ब्राह्मणौ इत्यादौ द्योतकवाचकसमुच्चयस्य दृष्टत्वाद् इति एके. निष्ठ्यायाम् इति निसोगते इति त्यप्रत्ययः. यथा वर्णाश्रमेभ्यो निर्गतो वर्णः चाण्डालादिर्निष्ठ्यः तथा कार्यान्तरेभ्यो व्यावर्त्तिता तारापि निष्ठ्योच्यते.

संभविष्यति इति जानाना च ''तद्बट् कुर्वीतोपव्युषम्'' इत्यनेन पुण्यनक्षत्रस्य प्रत्यक्षीकरणं सोपायं विधत्ते. एवं ह वा इत्यनेन निदर्शनं शिष्टाचारं च प्रदर्शयति. यदि नक्षत्रस्य फलोपधायकत्वरूपं प्राबल्यं न अभिप्रेयात् किमिति एवं विदध्यादिति[९] नक्षत्रम् इतरापेक्षया प्रबलमेव. न च इदं नक्षत्रेष्टिविषयकम् इति वाच्यम् **''यां कामयेत दुहितरं प्रिया स्यात् इति तां निष्टथायां दद्यात्''** इत्यादिभिः स्वात्यभिजित्-रेवतीषु कन्यादान-जयोद्यम-पशुकार्यकरणानाम् अग्रे विधानदर्शनस्य असंगतत्वापत्तेः. **''यत् किञ्च अर्वाचीनं सोमाद्''** इत्यनेन अन्येषामपि कर्मणां रेवत्यां विधानाच्च इति. पुण्यत्वं च अत्र तत्तत्कार्योपयोगित्वेन विहितत्वमेव, न तु देवनक्षत्रत्वम्. अभिजिद्-रेवत्योर्यमनक्षत्रत्वेन अग्रे व्यवस्थापनात्. ननु एवं सति पुराणसमुच्चय-स्कान्दादिवचसां का गतिः ? इति चेत्, तत्तिथियुक्ते अह्नि नक्षत्रयोगाभावो यस्मिन् वर्षे तद्विषयकत्वमेव. [१०]अतएव कश्यपेन तद्दिनर्क्षे इति उक्तम्. न च अत्र उत्तरपदलोपी समासो अस्तु. तथा सति न केवलम् ऋक्षस्यैव प्राधान्यम् अत्र आयाति इति वाच्यं, तादृक्समासेऽपि तिथेः सहभावप्रतीत्या तत्प्राधान्यस्य दुर्घटत्वाद् इति. तत्कालश्च विजयमुहूर्त्तद्वयघटितः त्रेधा विभक्तो अपराह्णएव उचितो राज्ञाम्. तदैव गोपथब्राह्मणोदित-यावत्कर्मकरणसौकर्यसम्भवात्. अन्येषां तु प्रदोषः पञ्चदशो विजयमुहूर्त्तश्च. भृगुवाक्ये एकादशस्य मुहूर्त्तस्य स्फुटं गौणतरत्वसूचनात्.

एवं सति इदम् अत्र सम्पद्यते. पट्टाभिषेकः तावत् शुद्धाधिकायां प्रथमे अह्नि श्रवणे प्रथम दिनएव. द्वितीये अह्न्येव श्रवणयोगे द्वितीयदिनएव. अतिदुर्लभ-

---

तद् आहुः **स्वाती**त्यादि.

नक्षत्रप्राधान्ये व्यवस्थापिते वचनेषु सर्वेषु तददर्शनिन एतद् न युक्तम् इति आशयेन शङ्कन्ते **ननु** इति. ननु अस्य ग्रन्थस्य उदयकालिकदशम्युपरित-नैकादशी-श्रवणयोगो विषयः, ग्रन्थे कण्ठरवेण तथानभिधानेन तथा शङ्काया अप्रतीतेः. अतएव अग्रे **''अतएव कश्यपेन''** इत्यनेन तद्वचनं स्मारितम्. तस्य प्रकृतत्वे तु अतएव कश्यपेन इत्यस्य वैय्यर्थ्यं क्रियमाणा अग्रिमव्यवस्थायाम् एतदर्थस्य सर्वथानुल्लेखात् का गतिः इति तत्र नक्षत्रयोगः कुतो न उक्त इति आक्षेपः. तत् तिथि इति दशमीयुक्ते दिने इति अर्थः. दशमीयोगश्च अत्र सर्वत्र कर्मकालएव नतु औदयिकः. **''कर्मणो यस्य यः कालः तत्कालव्यापिनी तिथिः''** इति वाक्यात् पूर्वविद्धाप्रशंसनाच्च **दुर्घटत्वाद्** इति. कर्मकालैकदेशे किञ्चिद् दशमीसत्वे श्रवणयोगे सैव न तु यद्दिने दशमीव्याप्तिः कर्मकाले अधिका सैव इति भावः. धर्मप्रवृत्तिविवृतातिदुर्लभयोगलाभात् पूर्वविद्धाप्राशस्त्यस्य अग्रे कण्ठरवेण अभिधानाच्च. अतः

योगविशेषलाभात्. तदभावेऽपि[११] तु पूर्वदिने एव. एकादश्यतिरिक्तवृद्धौ उत्तरस्यानिषेधाद् विद्धाधिकायामपि द्वितीयैव विद्धानिषेधात्. विद्धाक्षये तु न भवत्येव, प्रतिप्रसवाभावात्. अपराजितापूजनसीमोल्लङ्घनादि तु पूर्वेद्युरेव श्रवणस्य कर्मकालव्याप्तौ पूर्वयुतायाम्. परदिनएव तथात्वे परस्याम्. दिनद्वये समविषमैकदेशव्याप्तौ पूर्वत्रैव, पूर्वविद्धाप्राशस्त्यात्. यत्तु निषेधशास्त्रम्, तद् अपराजितापूजनविषयं राजविषयं च, नतु अन्यविषयम्. तेन भगवति यवनवदलार्पणम् उक्तविधायामेव कार्यम् इति न कोऽपि शङ्कावकाशः.

कालमेव विचारयन्ति तत्कालश्च इति. **तदभावेपि** इति शुद्धाधिकायाम् इति भावः. **निषेधाद्** इति **''षष्टिदण्डात्मिकायास्तु तिथेर्निष्क्रमणं परे''** इति नारदवाक्यात्. **विद्धानिषेधाद्** इति **''पूर्वविद्धां न कारयेद्''** इति **''राज्ञां पट्टाभिषेचने''** इति नारदवाक्यात्. **न भवत्येव** इति. ये तु पट्टाभिषेकवद् इतरदपि निर्णिनीषन्ति तेषामपि अयं दोषः. यद् उत्सवलोपप्रसङ्गः इति. **अपराजित...** इत्यादि पूर्वयुतायाम् इत्यन्तम् एकवाक्यम्. **पूर्वयुतायाम्** इति नवमीयुतायां दशम्याम् इति अर्थः. **तथात्व**[१] इति, दशम्यां श्रवणस्य कर्मकालव्याप्तौ. **दिनद्वय** इति दशम्याम् इति अनुषज्यते. **व्याप्तौ** इति. **श्रवस्य** इति वर्तते. **निषेध** इति पूर्वोक्तनारदवाक्यम्. **अपराजित** इति[२]. ननु एवम् अनुपदोक्तिविरोधः पुराणसमुच्चयविरोधश्च इति अरुचेः आहुः. **राज** इति. वस्तुतस्तु अपूजनम् इति छेदः. ''पूर्वविद्धां न कारयेद्'' इति निषेधशास्त्रं न अपराजितापूजननिषेधकं किन्तु पट्टाभिषेकपरं वाक्यशेषाद् इति भावः. **उक्तविधायाम्** इति पूर्वविद्धायाम् इति अर्थः. नतु उदयकालिकदशमी अपराह्णकालिकश्रवणं च कुत्रचिद् उक्तम्.

यद्यपि व्यवस्थायाः **पूर्वम् उच्येत** तथापि बहुव्यवधानात् न परामृश्येत्. यदि पूर्वविद्धाप्राशस्त्याद् इति अनन्तरम् उच्येत भवेत् परामर्शार्हः. उत्सवकीर्त्तनेष्वपि राघवस्य यात्रादिकमेव वर्ण्यते, तेन पट्टाभिषेकदिनकृत्यं यात्रादिभिन्नदिनकृत्यत्वं च अस्य, निर्भयरामभट्टैरपि उत्सवप्रतानव्यवस्थाम् अनूद्य यदा सूर्योदये स्वल्पादशमी अपराह्णे च एकादश्यां श्रवणं तदापि तत्रैव उत्सवः इति परमतम् उपन्यस्तम्. तस्य उत्सवप्रतानाभिमतत्वे तु ततः प्रागेव इति उत्सवप्रताने निर्णीतम् इति न लिखेत्. तदग्रे विजयदशम्यां श्रवणप्राधान्यं प्रताने उक्तम् इति उक्त्वा केचित् शिष्टा एतन्निर्णयानुसारेण न व्यवहरन्ति, किन्तु ''उदये दशमी किञ्चित्'' इति पट्टाभिषेकपरत्वम् इत्यादि नारदवाक्यैकवाक्यत्वाद् अपूर्ववाक्यकल्पने गौरवात्. अथवा दिनद्वये तारकोदयकालालाभे इदं वचः कृतार्थम् इति उक्तम्. तत्र केचित् शिष्टा इत्यनेन स्वे एव अभिमताः. उत्तरत्र स्वयमेव तन्मतस्य द्विधा समर्थनाद् उत्सवप्रतानाननुसरणे शिष्टत्वभङ्गाच्च. दिनद्वये तारकोदयकालालाभे इदं वचनम् इति समयमयूखे विदुषां दृश्यते. 'उदय'पदं तारकोदयः इति च. न च सूर्योदयः इति वाक्यैकवाक्यत्वाद् 'उदय'पदं सूर्योदयपरमेव. किञ्च दिनद्वये तारकोदयकालालाभे इदं वचनम् इत्यपि उक्तम् ''उदये दशमी किञ्चिद्'' इति वचनाद् इति वाच्यं, सूर्योदयः इत्यनेनैकवाक्यत्वे तद्वद् अस्य

[कठिनांशटिप्पणी: १.नवमीविद्धा. शुद्धा च दशमी. २.'तु'नात्र तिथिद्वैध इति सप्तम्यन्तं पदमनुवर्तते, स्वारस्यात्. ३.श्रवणस्पृशः. अग्रे तदभावकथनात्. ४.''तिथिः शरीरं तिथिरेव कारणं तिथिः प्रमाणं तिथिरेव साधनमि''ति. ५.कर्मकालम्. ६.दिवसस्य त्रेधा विभागपक्षमाश्रित्येत्यर्थः. ७.तत् नक्षत्रम्. बट् प्रत्यक्षार्थे अव्ययम्. प्रत्यक्षं कुर्वीतेत्यर्थः. प्रत्यक्षकरणोपायमाह उपव्युषमिति. 'उषःकालोष्टपञ्चाशदि'ति वाक्यात्. उषसीति व्युषमिति विभक्त्यर्थेऽव्ययीभावः. व्युषं समीपं उपव्युषम्-पारिभाषिकसूर्योदयकाल इत्यर्थः. तदानीं सूर्यतेजसा नक्षत्रतेजसोनभिभवात्. तदाह उदेति, पारिभाषिकसूर्योदयकालः. नैतीति सूर्यतेजसाऽभिभवं नैति इत्यर्थः. यावतीति काले. तत्रेति नक्षत्रे. यत्र नक्षत्रे जघन्यं स्वतेजसाऽभिभवरूपं गर्हितं पश्येद् दर्शयेदिति (यत्कारीति. पुण्याहकारी नक्षत्रयुक्ताहे.) ८.निरवसाययाञ्चकार=अत्र मुहूर्ते श्रैष्ठ्यं प्रापयामास. ९.बट्कुर्वीत. १०.नक्षत्रस्य प्राबल्यादेव. ११.तदभावेपि तु पूर्वदिने एव एकादश्यतिरिक्तवृद्धौ उत्तरस्यानिषेधात्. विद्धाधिकायामपि द्वितीयैव. विद्धानिषेधात्. विद्धाक्षये तु न भवत्येव. प्रतिप्रसवाभावात्.(११''तु द्वितीयदिनएव. वृद्धौतु उत्तरस्याएव औचित्यात्. विद्धाधिकायामपि'' इति ख-ग पाठः)]

पट्टाभिषेकपरत्वस्यैव युक्तत्वात्.

किञ्च 'किञ्चित्'पदं न द्वित्रनाडिपरं किन्तु एकादशमुहूर्त्तपरं पूर्वदिने एकादश-मुहूर्तपरम्, पूर्वदिने एकादशमुहूर्त्तान्तं नवमीसत्त्वस्य मयूखे उक्तेः. परदिने अपराह्णन्तं सायं पर्यन्तं वा दशमीसम्भवात्. हेमाद्रौ व्रतखण्डे 'उदय' इति वाक्यसत्वाद् एकादशीव्रतपरं वा.

''दशम्येकादशी यत्र सा नोपोष्या भवेत् तिथिः,
श्रवणेन तु संयुक्ता सा तिथिः सर्वकामदा'' इति,
''पुनर्वसौ जयानाम-श्रवणे विजयामता''

इत्यादि कृत्यरत्नावल्यादौ उक्तेः, अथवा तारकोदये दशमी किञ्चित् तत्रैव काले श्रवणं विवक्षितम्.

श्रीद्वारकेशकृपया गंगाधर उदारधीः।।
प्रताने वैजये मुक्तामालाजालमलंवयत्।।१।।

(१.भिन्नोक्तित्वादेव. २.उदये दशमीति कश्यपवाक्ये. ३.यात्रा वाऽभिषेको वा. ४.तिथिर्द्वेध इति तुशब्दस्वारस्यात्. ५.कर्मकालव्याप्तिमत्तिथिस्पृगृक्षे सत्वे इत्यर्थः. ६.वाक्यानां राजापराजितापूजनविषयत्वेनान्यविषयत्वेन चेत्यर्थः.)

।। इति श्रीवासिष्ठगंगाधरशास्त्रिप्रणीतो विजयाविवेकः समाप्तिम् अफाणीत् ।।

आश्विनशुक्लपौर्णमास्यां रासोत्सवः.

स च राकायामेव कार्यो न तु अनुमत्याम्. अखण्डमण्डलस्य इन्दोः तदैव दर्शनाद्, युग्मवाक्याच्च इति दिक्. इति आश्विनोत्सवाः.

अथ कार्तिकोत्सवाः

तत्र हेमाद्रि–निर्णयामृत–निर्णयसिन्धु–निर्णयदीप–समयालोक–दिनकरोद्योत–भगवद्भास्करस्थ–दीपोत्सवसम्बन्धि–वाक्यसङ्ग्रहः. तथा हि, ज्योतिर्निबन्धे नारदः

''आश्विने कृष्णपक्षे तु द्वादश्यादिषु पञ्चसु,
तिथिषूक्तः पूर्वरात्रे नृणां नीराजनाविधिः''.

धनत्रयोदशीकर्तव्यम्.

स्कान्दे

''कार्तिकस्यासिते पक्षे त्रयोदश्यां निशामुखे,
यमदीपं बहिर्दद्यात् अपमृत्युः विनश्यति''

नरकचतुर्दशीकर्तव्यम्.

श्रीकृष्णावतारावसरे 'नरक'नामासुरः सञ्जातः तस्मै श्रीकृष्णेन वरो दत्तः तेन कार्तिककृष्णचतुर्दश्यां नरकचतुर्दश्यां मलस्नानं निरयप्राप्त्यभावाय प्रयत्नेन कर्तव्यम्. तथा च उक्तं पद्मपुराणोत्तरखण्डे श्रीकृष्णचरित्रे शिवेन उमां प्रति

''अन्यलोकहितार्थाय वृणेऽहं वरमुत्तमम्,
मृतेऽहनि तु मे कृष्ण ईश भूतमहेश्वर,
ये नरास्तु मलस्नानं कुर्वन्ति मधुसूदन,
न तेषां निरयप्राप्तिः भवत्वेव यदूत्तम,
एवम् अस्तु इति गोविन्दो ददौ तस्मै वरं प्रभुः'' इति.

भविष्योत्तरे, ब्राह्मे च

''कार्तिके कृष्णपक्षे तु चतुर्दश्याम् इनोदये,
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः''

''तिलतैलेन कर्त्तव्यं स्नानम्'' इत्यपि क्वचित् पाठः. अत्र इनोदये, दिनोदये,

इवोदये, विधूदये इति पाठचतुष्टयं पुस्तक–पुराणभेदेन दृश्यते. तत्रैव,

‘‘तैले लक्ष्मीर्जले गङ्गा दीपावल्याश्चतुर्दशीम्,

प्रातः स्नानं तु यः कुर्यात् यमलोकं न पश्यति’’

अत्र ‘प्राप्येति शेषः’ इति निर्णयसिन्धुः. सप्तम्यर्थे द्वितीया इति दिनकरोद्योतः.

कश्यपसंहितायाम्

‘‘इन्दुक्षयेऽपि सङ्क्रान्तौ रवौ पाते दिनक्षये,

अत्राभ्यङ्गो न दोषाय प्रातः पापापनुत्तये’’.

स्मृत्यन्तरे

‘‘भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः,

तन्निषिद्धं दशम्यादौ नित्यनैमित्तिके न तु’’.

भविष्योत्तरे

‘‘पूर्वविद्धचतुर्दश्याम् आश्विनस्य सितेतरे,

पक्षे प्रत्यूषसमये स्नानं कुर्यात् प्रयत्नतः,

ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः’’.

ज्योतिर्निबन्धे भविष्योत्तरे

‘‘अपामार्गं भ्रामयित्वा के कुर्यात् यमतर्पणम्,

नरकाय प्रदातव्यो दीपः संपूज्य देवताः’’.

कश्चित्तु, गार्ग्यवचस्त्वेन इदम् उदाजह्रे. दिवोदासीये च भविष्ये

‘‘अरुणोदयतोऽन्यत्र रिक्तायां स्नाति यो नरः,

तस्याब्दिकभवो धर्मो नश्यत्येव न संशयः’’

सर्वज्ञनारायणः

‘‘तथा कृष्णचतुर्दश्याम् आश्विनेऽर्कोदयात् पुरा,

यामिन्याः पश्चिमे यामे तैलाभ्यङ्गो विशिष्यते’’.

यत्तु

‘‘त्रयोदशी यदा प्रातः क्षयं याति चतुर्दशी,

रात्रिशेषे त्वमावास्या तदाऽभ्यङ्गे त्रयोदशी’’

इति वचनम्. तद् निर्मूलम् इति निर्णयसिन्धुः, प्रामाणिकम् इति भगवद्भास्करः.

क्वचिच्च

''स्निग्धस्नानं न कर्त्तव्यं द्वितीयायां सदैव हि,
दशम्यां च त्रयोदश्यां वर्जयित्वा तथाऽऽश्विनम्''

लैङ्गे

''माषपत्रस्य शाकेन भुक्त्वा तत्र दिने नरः,
प्रेताख्यायां चतुर्दश्यां सर्वपापैः प्रमुच्यते''.

क्वचित्तु पाद्मे इति उक्त्वा

''ततः प्रदोषसमये दीपान् दद्यात् मनोरमान्''

इत्यादिवचोनिचयेन दीपदानम् आहुः, नक्तं च आहुः.

अथ अमावास्याकर्तव्यनिर्णयः.

कालादर्शे

''प्रत्यूष आश्वयुग्दर्शे कृताभ्यङ्गादिमङ्गलः,
भक्त्या प्रपूजयेद् लक्ष्मीम् अलक्ष्मीविनिवृत्तये''.

भविष्योत्तरादित्यपुराणयोः अभ्यङ्गम् अभिधाय

''एवं प्रभातसमये अमायां च नराधिप,
स्नात्वा देवान् पितृन् भक्त्या संपूज्याथ प्रणम्य च,
कृत्वा तु पार्वणश्राद्धं दधिक्षीरघृतादिभिः,
दिवा तत्र न भोक्तव्यम् ऋते बालातुराज्जनात्,
प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम्,
दीपवृक्षाश्च दातव्याः शक्त्या देवगृहेषु च,
चतुष्पथे श्मशाने च नदीपर्वतवेश्मसु,
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च,
वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः,
दीपमालापरिक्षिप्ते प्रदेशे तदनन्तरम्,
ब्राह्मणान् भोजयित्वाऽऽदौ संभोज्य च बुभुक्षितान्,
अलंकृतेन भोक्तव्यं नववस्त्रोपशोभिना''.

स्कान्देऽपि

''ततः प्रदोषसमये दीपान् दद्यात् मनोरमान्,
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च,
प्राकारोद्यानवापीषु प्रतोलीनिष्कुटेषु च,
मन्दुरासु च सर्वासु हस्तिशालासु चैव हि''.

(स्कान्दे पुरुषोत्तममाहात्म्ये तु उत्थापनमहोत्सवप्रसङ्गे ''पूजयित्वा जगन्नाथं कौमुद्याख्ये महोत्सवे, अक्षक्रीडादिभिः पुष्पवस्त्रमाल्यानुलेपनैः'' इत्यपि अनूदितम्)

भविष्योत्तरे

''कार्तिके कृष्णपक्षस्य पञ्चदश्यां निशामुखे,
यथेष्टचेष्टं दैत्यानां राज्यं तेषां महीतले'' इति उपक्रम्य
''ततोऽपराह्णसमये घोषयेन्नगरे नृप,
अद्य राज्यं बलेर्लोको यथेष्टं चेष्टतामिति,
लोकश्चापि पुरे हृद्ये सुधाधवलिताजिरे,
गीतवादित्रसंघुष्टे प्रज्वालितसुदीपके,
अन्योन्यप्रीतिसंहृष्टदत्ततालानके जने,
ताम्बूलहृष्टवदने कुङ्कुमक्षोदचर्चिते,
दुकूलपट्टवसने नेपथ्यस्वर्णभूषणे,
मित्रस्वजनसम्बन्धिस्वगोत्रज्ञातिपूजिते''

'व्रजेद्' इति शेषः.

''ततोऽर्द्धरात्रसमये स्वयं राजा व्रजेत् पुरम्,
अवलोकयितुं रम्यं पद्मामेव शनैः शनैः,
महता तूर्यघोषेण ज्वलद्भिः हस्तदीपकैः,
हर्म्यशोभासुखं यायात् कृतकैरश्वकैः नरैः,
बलिराज्यप्रमोदं च दृष्ट्वा स्वगृहमाव्रजेत्,
एवं गते निशिथे तु जने निद्रार्धलोचने,
तावन्नगरनारीभिः शूर्पडिण्डिमवादनैः,
निष्काश्यते प्रहृष्टाभिः अलक्ष्मीः स्वगृहाङ्गणात्''.

श्राद्धदीपदानादौ प्रमाणम्.

ज्योतिर्निबन्धे भविष्योत्तरे

''अमायाम् आश्विने मासि पितृकर्म विधाय च,
दीपदानं ततः कुर्यात् प्रदोषे च तथोल्मुकम्''

अन्यच्च

''अपराह्णे प्रकर्त्तव्यं श्राद्धं पितृपरायणैः,
प्रदोषसमये राजन् कर्त्तव्या दीपमालिका''

क्वचित्तु आदित्यपुराणे

‘‘अमायां चैव देवास्तु कार्तिके मासि केशवात्,
अभयं प्राप्य सुप्तास्तु सुखं क्षीरोदसानुषु,
लक्ष्मीर्दैत्यभयात् मुक्ता सुखं सुप्ताऽम्बुजोदरे,
अतोर्थं विधिवत्कार्या तुष्ट्यै तु सुखसुप्तिका,
अर्धरात्रे भ्रमत्येव लक्ष्मीराश्रयितुं गृहान्,
अतः स्वलङ्कृता लिप्ता दीपैर्जाग्रज्जनोत्सवाः,
सुधाधवलिताः कार्या पुष्पमालोपशोभिताः’’

अत्र ‘‘गृहाः कार्याः’’ इति शेषः.

द्यूते प्रमाणम्.

अन्यच्च

‘‘नारिकेलोदकं पीत्वा अक्षक्रीडां समाचरेत्,
निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी,
तस्मै वित्तं प्रयच्छामि अक्षक्रीडां करोति यः’’

क्वचिच्च *कुबेरपूजानिशीथे लक्ष्मीपूजाऽपि उच्यते.

(*‘‘स्त्रीसेवा जागरं रात्रौ पूजनं परिदेवनम्, पिण्डदाने कृते सर्वम् आश्विनान्ते न दुष्यति’’ इत्यपि उच्यते तथा.)(पूर्वकोष्ठकान्तर्गतः पाठः ‘ग’ पुस्तकेऽपि अस्ति).

प्रतिपत्कर्तव्यनिर्णयः.

प्रतिपदि च ज्योतिर्निबन्धे

‘‘नन्दायाम् उदये अभ्यङ्गं कृत्वा नीराजनं ततः,
सुवेशः सत्कथागीतैः दानैश्च दिवसं नयेत्’’

वशिष्ठः

‘‘वत्सरादौ वसन्तादौ बलिराज्ये तथैव च,
तैलाभ्यङ्गम् अकुर्वाणो नरकं प्रतिपद्यते’’

ब्राह्मे

‘‘कार्तिके शुक्लपक्षे तु विधानद्वितयं भवेत्,
नारीनीराजनं प्रातः सायं मङ्गलमालिका’’

स्कान्दे

‘‘प्रातर्गोवर्द्धनः पूज्यो द्यूतं चापि समाचरेत्,
भूषणीयास्तथा गावः पूज्यास्त्वावाहदोहनाः’’

आदित्यपुराणे

‘‘शङ्करस्तु पुरा द्यूतं ससर्ज्ज सुमनोहरम्,
कार्तिके शुक्लपक्षे तु प्रथमेऽहनि सत्यवत्,
जितश्च शङ्करस्तत्र जयं लेभे च पार्वती,
अतोऽर्थ शङ्करो दुःखी उमा नित्यं सुखोचिता,
तस्माद् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः,
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरं जयः,
पराजयो विवृद्धश्च लाभनाशकरो भवेत्,
श्रोतव्यं गीतवाद्यादि स्वनुलिप्तैः स्वलङ्कृतैः,
विशेषवच्च भोक्तव्यं प्रशस्तैः बान्धवैः सह,
तस्यां निशायां कर्त्तव्यं शय्यास्थानं सुशोभनम्,
गन्धैः पुष्पैः तथा वस्त्रैः दिव्यरत्नैः अलङ्कृतम्,
दीपमालापरिक्षिप्तं तथा धूपेन धूपितम्,
दयिताभिश्च सहितैः नेया सा च भवेत् निशा,
नवैर्वस्त्रैश्च संपूज्या द्विजसम्बन्धिबान्धवाः’’

दुःखी वस्त्रादिहीनः.

भविष्योत्तरे

‘‘ततः प्रबुद्धे सकले जने प्राप्तमहोत्सवे,
द्विजाभिवादनपरे सुखरात्र्यादिवादिनि,
प्रभातसमये राज्ञा तोषणीयाः ततो जनाः,
सुवासिनीभ्यो देयानि वस्त्राण्याभरणानि च,
सद्भावेनैव सन्तोष्या दानेन च तथा द्विजाः,
इतरे चान्नपानेन सन्मानेन च पण्डिताः,
वस्त्रैः ताम्बूलदानैश्च पुष्पकर्पूरकुङ्कमैः,
तथा सम्पूजयेत् मानैरन्तःपुरविलासिनीः,
पदातिजनसङ्घातान् ग्रैवेयैः कटकैः शुभैः,
स्वनामाङ्कैः स्वयं राजा तोषयेत् स्वजनान् पृथक्,
वृषभान् महिषांश्चैव युध्यमानान् परैः सह,
गजान् अश्वांश्च योधांश्च पदातीन् समलङ्कृतान्,
मञ्चारूढः स्वयं पश्येत् नटनर्त्तकचारणान्,

क्रुद्धापयेत् त्रासयेच्च गोमहिष्यादिकं ततः,
एतद्गोक्रीडनं कार्य प्रातर्नन्दादिने नरैः,
ततोऽपराह्णसमये पूर्वस्यां दिशि भारत,
मार्गपालीं प्रबध्नीयात् तुङ्गे स्तम्भेऽथ पादपे,
कुशकाशमयैः दिव्यां लम्बकैः बहुभिः नृप,
दर्शयित्वा गजान् अश्वान् मार्गपाल्यास्तले नयेत्,
नीराजनं च तत्रैव कार्यं राष्ट्रजयप्रदम्,
मार्गपालीतलेनेत्थं यान्ति गावो वृषा गजाः,
राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः,
मार्गपालीं समुल्लङ्घ्य नीरुजः स्युः सुखान्विताः,
कृत्वैतत् सर्वमेवाहन् रात्रौ दैत्यपतेर्बलेः,
पूजां कृत्वा नृपः साक्षात् भूमौ मण्डलके कृते''

अहन् अहनीति अर्थः.

अथ बलिपूजाविधिः.

''बलिमालिख्य दैत्येन्द्रं वर्णकैः पञ्चरङ्गकैः,
सर्वाभरणसंपूर्णं विंध्यावल्या सहासितम्,
द्विभुजं दैत्यराजानं कारयित्वा नृपः स्वयम्,
गृहस्य मध्ये शालायां विशालायां ततोऽर्चयेत्,
लोकश्चापि गृहस्यान्तः शय्यायां शुक्लतन्दुलैः,
संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत्''

पञ्चरङ्गकृतां मूर्त्तिं राजा पूजयेत्, लोकस्तु शुक्लतन्दुलकृताम् इति अर्थः.

''बलिम् उद्दिश्य दीयन्ते दानानि कुरुनन्दन,
यानि तान्यक्षयाण्याहुः मयैतत् सम्प्रदर्शितम्,
यदस्यां दीयते दानं स्वल्पं वा यदि वा बहु,
तदक्षयं भवेत् सर्वं विष्णोः प्रीतिकरं परम्,
कौ मुत्प्रीतिः बलेः यस्मात् दीयतेऽस्यां युधिष्ठिर,
अतोऽर्थे पार्थिवैः पार्थ तेनैषा कौमुदी स्मृता,
यो यादृशेन भावेन तिष्ठत्यस्यां युधिष्ठिर,
हर्षदैन्यादिरूपेण तस्य वर्षं प्रयाति हि,

तस्मात् प्रहृष्टैः तुष्टैश्च कर्त्तव्या कौमुदी नरैः,
दीपोत्सवे जनितसर्वजनप्रमोदे
कुर्वन्ति ये सुमतयो बलिराजपूजाम्,
दानोपभोगसुखऋद्धिशताकुलानां
राजन् प्रयाति सकलं प्रमुदैव वर्षम्''.

रज्ज्वाकर्षणम्.

आदित्यपुराणे

''कुशकाशमयीं कुर्यात् वृष्टिकां सुदृढां नवाम्,
ताम् एकतो राजपुत्रा हीनवर्णाः तथाऽन्यतः,
गृहीत्वा कर्षयेयुः तां यथासारं मुहुर्मुहुः,
जयेऽत्र हीनजातीनां जयो राज्ञस्तु वत्सरम्,
जयचिह्नम् इदं राजा विदधीत प्रयत्नतः''

समसङ्ख्याकाः समबलाश्च कर्षयेयुः इति अर्थः.

अथ दिनद्वयमधिकृत्य कृत्यम्.

ज्योतिषे

''तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः,
उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम्''

दिवोदासीये ब्राह्मे

''अमावास्याचतुर्दश्योः प्रदोषे दीपदानतः,
यममार्गान्धकारेभ्यो मुच्यते कार्तिके नरः''

अथ दिनत्रयम् अधिकृत्य,

पृथ्वीचन्द्रोदये ब्राह्मे

''इषे भूते च दर्शे च कार्तिके प्रथमे दिने,
यदा स्वाती तदाऽभ्यङ्गस्नानं कुर्यात् दिनोदये,
ऊर्जशुक्लद्वितीयान्ततिथिषु स्वातियुक्प्रगे,
मानवो मङ्गलस्नायी नैव लक्ष्म्या वियुज्यते,
दीपैः नीराजनात् अत्र सैषा दीपावली स्मृता''

ज्योतिर्निबन्धे नारदः

‘‘इषासितचतुर्द्दश्याम् इन्दुक्षयतिथावपि,
ऊर्जादौ स्वातिसंयुक्ते तदा दीपावली भवेत्,
कुर्यात् संलग्नमेतच्च दीपोत्सवदिनत्रयम्’’.

क्वचित्तु

‘‘संलग्नमेव कर्त्तव्यं दीपोत्सवदिनत्रयम्,
विभेदं कुरुते यस्तु नरके स निमज्जति’’

इति दोषोऽपि पठ्यते.

भविष्योत्तरे

‘‘पुरा वामनरूपेण प्रार्थयित्वा धराम् इमाम्,
ददौ अतिथिरिन्द्राय बलिं पातालवासिनम्,
कृत्वा दैत्यपतेः दत्वा अहोरात्रत्रयं बुधः’’.

अथ कालनिर्णये मध्याह्नकालिकशास्त्रम्.

ज्योतिर्निबन्धे

‘‘आश्विने मासि भूतादितिथयः कीर्तितास्त्रयः,
दीपदानादिकृत्येषु ग्राह्या मध्याह्नकालिकाः,
अर्द्धोदयात् सहस्रांशोः प्रातः स्यात् त्रिमुहूर्त्तकः,
सङ्गवः त्रिमुहूर्तः स्यात् मध्याह्नस्त्रिमुहूर्त्तकः,
शारदः त्रिमुहूर्त्तः स्यात् सायाह्नः त्रिमुहूर्त्तकः,
यदि स्युः सङ्गवाद् अर्वाग् एते च तिथयः त्रयः,
दीपदानादिकृत्येषु कर्त्तव्याः पूर्वसंयुताः,
अथ चेत् सङ्गवाद् ऊर्ध्वम् एते च तिथयः त्रयः,
भवन्ति वृद्धिगामित्वे कर्त्तव्याः परसंयुताः’’.

क्वचित्तु ‘‘अमायाम् आश्विने मासि’’ इति अभिधाय.

‘‘रिक्तायुक्ते यदा दर्शे श्राद्धकालो न लभ्यते,
तदा अपरे अह्नि कर्त्तव्यं श्राद्धं दीपोल्मुकं तथा,
श्राद्धकाले यदा दर्शो अपराह्णे प्रतिपत् यदि,
दीपदानादिकं कर्म तत्प्रदोषे न दुष्यति,

दर्शश्राद्धं विना यस्मिन् राष्ट्रे दीपोल्मुकं भवेत्,
तद्राष्ट्रं नाशम् आयाति परचक्राग्नितस्करैः''.

क्वचित्तु
''नैकः श्राद्धद्वयं कुर्याद् अनिमित्ते कदाचन,
निमित्ते सति कर्त्तव्यं विना वृद्धिमहालयम्''
इत्यपि मध्ये पठन्ति.

''पूर्वं नीराजनं कृत्वा दीपान् दत्वा तथैव च,
पश्चाद् यः: कुरुते श्राद्धं तत्सर्वम् आसुरं भवेत्''
इति उक्त्वा ततः ''आश्विने मासि दर्शादि'' इत्येवं सार्द्धपद्यचतुष्कं लिखन्ति.

क्वचित्तु
''सायाह्ने च चतुर्दश्याम् अमा यत्र प्रदृश्यते,
तत्र श्राद्धं तथा दीपं पितॄणाम् अक्षयं भवेत्,
आश्विनान्ते चतुर्दश्यां तुलासंस्थे दिवाकरे,
दिनान्ते दृश्यते चामा कलामात्राऽपि कर्हिचित्,
तदाऽपराह्णे श्राद्धं स्यात् सायं दीपोल्मुकादिकम्''.

अथ गोक्रीडनम्.

तत्र द्वितीयाविद्धानिषेधः.
''प्रातर्गोक्रीडनं कार्यं दर्शे नन्दायुते सदा.
क्रीडन्त्यमाप्रतिपदि गावश्चेत् लोकमातरः।।
अश्वव्याधिभयं नैव राज्ञः शस्त्रभयं न हि।।३।।
प्रतिपद्दर्शसंयोगे गावो यत्र प्रपूजिताः।।
तत्राऽऽयुः वर्द्धते नित्यं राज्यं पुत्रा धनं तथा।।४।।
कार्तिकस्याऽसिते पक्षे तुलाभानुः यदा भवेत्।।
यत्नेन वर्जयेत् भद्रां गवां क्रीडनकर्मणि।।५।।''
तत्रैव ब्रह्माण्डे
''नन्दा किञ्चित् युता यत्र दृश्यते च द्वितीयया,
बलेः दिनं न कर्त्तव्यं चन्द्रदर्शनसम्भवात्,

गवां क्रीडादिने नन्दा द्वितीयामिश्रिता यदा,
क्षतिरायुः प्रजाङ्गानां छत्रभङ्गो नराधिपे''

तत्र निर्णयभास्करे च ब्राह्मे

''आश्विने शुक्लपक्षे तु तुलाभानुः यदा भवेत्,
स्त्रियः क्रीडन्तु दर्शे तु गावो नन्दासु कार्तिके''

पाद्मे

''पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिः बलेः दिनम्''

तथा

''या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेत् नृप,
पूजनात् त्रीणि वर्द्धन्ते प्रजा गावो महीपतिः''

देवलः

''प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतम्,
परविद्धासु यः कुर्यात् पुत्रदारधनक्षयः''

पुराणसमुच्चये

''गवां क्रीडादिने यत्र रात्रौ दृश्यते चन्द्रमाः,
सोमो राजा पशून् हन्ति सुरभीपूजकांस्तथा''

तथा

''नन्दाया दर्शने रक्षा बलिदानं दशासु च,
भद्रायां गोकुलक्रीडा स देशो वै विनश्यति,
प्रतिपद्यग्निकरणं द्वितीयायां तु गोर्चनम्,
भूपच्छेदं करिष्येते वित्तनाशं कुलक्षयम्''.

अथ गोक्रीडायां अमाविद्धानिषेधः. ब्राह्मे,

''कातिर्के शुक्लपक्षे तु तुलाभानुः यदा भवेत्,
यत्नेन वर्जयेद् दर्शं गोक्रीडायां तु भूतले,
गावः संक्रीडमानास्तु नाशं यान्ति न संशयः,
आयुःक्षतिः प्रजानाशः छत्रभङ्गो नराधिपे,
प्रतिपत्सद्वितीया चेद् गवां चैव प्रपूजनम्,
आयुर्वृद्धिः प्रजावृद्धी राज्यवृद्धिस्तथा भवेत्,
अमावास्यायां(?) क्रीडन्ते गावो लोकस्य मातरः,
अश्वव्याधिः भवेत् तत्र राज्ञां शस्त्रभयं भवेत्''

शिवरहस्ये

‘‘प्रतिपद्दिवसे कुर्यात् पूजां गोवर्द्धनस्य तु,
पूर्वविद्धा न कर्तव्या या च दृश्या दिवोदया,
नन्दा यामे मोदमाना भद्रा नष्टा प्रजायते,
पूतं भवति तद्वर्षं राज्यदं सुखवर्द्धनम्’’.

त्रियामिकसार्धत्रियामिकशास्त्रम्.

स्कान्दसमुच्चये

‘‘त्रियामिकादर्शतिथिः भवेत् चेत् सार्द्धत्रियामा प्रतिपद्विवृद्धौ,
दीपोत्सवे ते मुनिभिः प्रदिष्टे इतोऽन्यथा पूर्वयुते विधेये,
वर्द्धमानतिथौ नन्दा यदा सार्द्धत्रियामिका,
द्वितीया वृद्धिगामित्वात् उत्तरा तत्र चोच्यते’’.

ब्राह्मे विधानद्वितयम् अभिधाय

‘‘अथ चेत् प्रतिपत्स्वल्पा नारीनीराजनं भवेत्,
द्वितीयायां तदा कुर्यात् सायं मङ्गलमालिकाम्’’

भविष्यपुराणे

‘‘लभ्येत यदि वा प्रातः प्रतिपद् घटिकाद्वयम्,
तस्यां नीराजनं कार्यं सायं मङ्गलमालिका’’.

देवीपुराणे

‘‘प्रातर्वा यदि लभ्येत प्रतिपद्घटिका शुभा,
द्वितीयायां तदा कुर्यात् सायं मङ्गलमालिकाम्,
आश्विनान्ते यदा दर्शे नारीनीराजनं भवेत्,
नारीणां तत्र वैधव्यं देशे दुर्भिक्षमेव च,
कार्तिके शुक्लपक्षादौ अमावास्याघटीद्वयम्,
देशभङ्गभयान्नैव कुर्यात् मङ्गलमालिकाम्’’

इति. ईदृशानि वचांसि निर्णयामृत-प्रपातमार्तण्ड-विश्वप्रकाश-चन्द्रप्रकाशादिषु अन्यान्यपि सन्ति.

अथ तिथिकृत्यसंग्रहः.

एवम् एतेषु वचनेषु चतुर्दश्याम् उदये नित्यं काम्यं च अभ्यङ्गस्नानं, ततो यमतर्पणं, शैवद्विजभोजनं, माषपत्रशाकभोजनं च यथावसरं नक्तं च. प्रदोषे च

दीपदानोल्मुके. पूर्वरात्रे च नीराजनम्[१]. दर्शे च प्रत्यूषे मङ्गलस्नानं प्रातश्च देवादिपूजा–प्रणामादयः ततो अपराह्णे पार्वणश्राद्धं प्रदोषे च नीराजन–लक्ष्मीपूजन–दीपदानानि.

एषां पौर्वापर्यं च. पितृदीपदानम् उल्मुकं च. रात्रौ च जागराद्यनेकोत्सव–गीतवाद्यादिश्रवण–स्त्रीसेवनादि–यथेष्टचेष्टाः. निशीथे च लक्ष्मीभ्रमणं लक्ष्मीपूजा कुबेरपूजा च. अपररात्रे च अलक्ष्मीनिस्सारणं[२], प्रतिपदि च उदये अभ्यङ्ग–नीराजने, पूर्वाह्णे गोवर्द्धनपूजा–द्यूत–गोपूजन–जनतोषण–गोक्रीडन–वृषगजादियोधन–नारीनीराजनानि. अपराह्णे मार्गपालीसमुल्लङ्घन–नीराजने. सायं मङ्गलमालिका रज्वाकर्षणं च अनियतकालम्. किञ्चित् प्रक्रम्य तदनन्तरं च रात्रौ बलिपूजा शय्यास्थानमण्डन–स्त्रीसाहित्यादयो विधीयन्ते. भूतादित्रयस्य बलिराज्यसम्बन्धित्वं च उच्यते. संलग्नकर्त्तव्यताकत्वं च विधीयते. इति तिथिकृत्यसंग्रहः.

मतान्तराणि.

मतान्तराणि. तन्निर्णये तु केचन श्राद्ध–दीपदानयोः [३]पूर्वापरभाव–वैपरीत्यज–दोषबोधकशास्त्रकांदिशीकाः तयोः अङ्गाङ्गिभावम् अङ्गीकृत्य[४] तिथिद्वैधे पूर्वापर–भावनिर्वाहाय दिनान्ते दर्शे चतुर्दश्यां श्राद्धविधिम् अवतारयन्तः तत्फलस्तावकं शास्त्रं[३] प्रतिपद्युल्मुकनिषेधशास्त्रं[५] च दर्शयन्तो वक्ष्यमाणं प्रमाणयन्ति.

अन्ये च तद्दोषभीताः[६] पूर्वोक्तम् अप्रमाणीकृत्य[७] वैपरीत्यम् अङ्गीकुर्वन्तः तिथिद्वैधे पूर्वापरभावनिर्वाहाय *भूतादित्रयस्य (वक्ष्यमाणप्रकारकत्वम् अङ्गीकृत्य) तदर्थं मध्याह्नकालिकतावाक्यं[८] सङ्गवादर्वाङ्निवृत्यूर्ध्वगमनयोः पूर्वपरयुतात्ववाक्यद्वयं च अवतार्य[९] दर्शस्य श्राद्धकालव्याप्तौ प्रतिपदि दीपदानादिशास्त्रं प्रतिपद्युल्मुक–प्रतिप्रसवशास्त्रं च दर्शयन्ति.

कठिनांशटिप्पणी:१.एतदन्तेन चतुदर्शीदिनकृत्यं दर्शितम्. २.एतदन्तेन दर्शकृत्यमुक्तम्. ३.कांदिशीको भयद्रुत इत्यमरः. बोधकशास्त्रम्–''दर्शश्राद्धं विने'तिवाक्यम्. ''दर्शश्राद्धं विना यस्मिन् राष्ट्रे दीपोल्मुकं भवेत्. तद्राष्ट्रं नाशमायाति परचक्राग्नितस्करैः''. ४.'सायाह्ने च चतुर्दश्याम्' इत्यादिवाक्यत्रयम्. ५.'प्रतिपद्यग्निकरणं' इतिवाक्यम्. ६.वक्ष्यमाणदोषभीताः. ७.प्रकारान्तरेण निर्णयदर्शनात्. इति यावद्. ८.'आश्विने मासि भूतादि' इतिवाक्यसार्धचतुष्कम् ज्योतिर्निबन्धनीयम्. ९.'रिक्तायुक्ते यदा' इति.
*'भूतादित्रयस्य मध्याह्नकालिकत्वादिकम् अङ्गीकृत्य तदर्थं' इति ख पाठः.

केचन च मध्याह्नकालिकादिशास्त्रगतदीपदानादिपदम् अतद्गुणसंविज्ञान–बहुव्रीहिणा समस्य (प्रथमदिनएव प्रदोषव्यापित्वे[1]) तत् पूर्वकर्मविषयत्वं शास्त्रस्य आहुः. (युक्तं[2] तु पञ्चमीतत्पुरुषेण तदर्थं समस्तव्यमिति.)

अथ बहवस्तु तत्तच्छास्त्रं निर्मूलम् इति उक्त्वा श्राद्धोल्मुकादि–वैपरीत्य–दोषोपेक्षका उभयविधाङ्गाङ्गिभावनिरादराः तत्रापि केचिद् वैपरीत्यदूषक–तन्निर्वाहक-शास्त्रम् अलिखन्तः प्रतिपद्युल्मुकनिषेधशास्त्रं च विषयविशेषे सावकाशयन्तः केचन च अलिखन्तः पूर्णतिथावेव तत्पूर्वापर्यम् आद्रियन्ते न इतरत्र. प्रतिपदि च बलिपूजायां पूर्वविद्धात्वं नारीनीराजन–मङ्गलमालिक्योश्च परात्वं गोक्रीडने तु चन्द्रदर्शनपरविद्धात्वयोः तिथिक्षयसाम्याभ्यां च पूर्वयुतात्वम् अन्यथा परयुतात्वं बहवः आहुः.

केचन च आश्विनकृष्णकार्तिकशुक्लयोः तुलासंक्रमेण पूर्वपरयुतात्वं गोक्रीडायाम् आहुः. संलग्नताशास्त्रस्य च मलमासनिवृत्यर्थकत्वं केचन आहुः. अपरे च दीपदानमात्रविषयत्वम् इति.

[कठिनांशटिप्पणीः १.प्रथमदिने एव प्रदोषव्यापित्वे. २.मध्याह्नकालिकादिशास्त्रस्य.]

सिद्धान्ते श्राद्धदीपदानादौ क्रमव्यवस्था.

तत्र किं किम् आदरणीयम्? दोषाद्यजनकं सद् यद् व्यवस्थितिसमञ्जसं वचन–स्वरसाप्तं वा तत् आदर्त्तव्यम् उच्यते. तथा हि, श्राद्धदीपादिपूर्वापरभाव–विघटनजदोष–भीततया यदि तयोः अङ्गाङ्गिभावः आद्रियते तदा दीपदानाङ्गभूतपार्वणश्राद्धं दार्शिकातिरिक्तम् अङ्गीकार्यम्. ‘‘कृत्वा तु पार्वणश्राद्धं दधिक्षीरघृतादिभिः’’ इति वाक्ये द्रव्यान्तरपरिसङ्ख्यानात्[1] ‘आदि’शब्देन द्रव्यान्तरग्रहणेऽपि अनुक्तस्य गौणत्वात्. ‘पार्वण’शब्दश्च त्र्युद्देश्यकश्राद्धपरः.

‘‘एकम् उद्दिश्य तु यच्छ्राद्धम् एकोदिष्टं विदुर्बुधाः,
त्रीन् उद्दिश्य तु यच्छ्राद्धं पार्वणं तत् प्रचक्षते’’

इति भगवद्भास्करे वचनात्. ‘‘**चत्वारः पार्वणाः कार्याः**’’ इत्यादिषु तथा दर्शनाच्च. युक्तं च एतत्. अन्यथा दार्शिकश्राद्धम् इत्येव ब्रूयात्. तथा च पूर्वत्र सायं कलामात्रदर्शसत्वे द्वितीयदिने च प्रदोषे तदसत्वे पूर्वत्र दीपोत्सवकर्म. तत्पूर्वदिने तत्र भूतासत्वे तु तद्दीपदानमपि प्रासङ्गिकं[2] तान्त्रिकं वा स्वकालएव दर्शे. दार्शिकश्राद्धं तु द्वितीयदिने स्वकालएव. एवं सति ‘‘सायाह्ने च चतुर्दश्याम्’’ इति वाक्याच्च च यस्य

प्रथमदिनमात्रप्रदोषव्यापि-दर्शविषयत्वं ''**कार्त्तिककृष्णे तुलासङ्क्रमे**'' ''**रिक्तायुक्ते**'' इत्यादिवाक्यद्वयस्य च कार्त्तिकशुक्ले तुलासङ्क्रमे प्रथमदिनएव प्रदोषव्यापिदर्श(योग)[पा.भे.१] विषयत्वम्. ''**दर्शश्राद्धं विना**'' इति ''**पूर्वं नीराजनम्**'' इति च वाक्यद्वयस्य प्रदोषद्वयव्यापि-दर्शविषयत्वम् उचितम्, मध्याह्नकालिक-वाक्यस्वारस्यात्. तेन ''**सायाह्ने च चतुर्दश्याम्**'' इति उक्ते काले दीपदानेऽपि न दोषसञ्चारः. उल्मुकनिषेधस्य द्वितीयदिनएव प्रदोषैकदेशव्यापि-प्रतिपद्यवकाश-लाभाच्च. तेन 'रिक्तायुक्ते' इत्याद्युक्ते द्वितीयपक्षेऽपि न दोषसञ्चारः.

कश्चित्तु, ''**प्रतिपद्यग्निकरणम्**'' इति निषेधशास्त्रेण रिक्तायुक्तेति विधिशास्त्रसमूलताम् अनुमिनोति स्म. तद् असाम्प्रतम्, उक्तव्यवस्थाया बहुवादि-संमतत्वाद्, विहितप्रतिषिद्धत्वे विकल्पप्रसङ्गाच्च, निषेधस्य विध्यनुमापन-व्यग्रतया निषेध्याभावे सति वाक्यार्थभङ्गप्रसङ्गाच्च.

वस्तुतस्तु पार्वणदीपदानयोः पृथक् कर्मत्वमेव साधीयः. सौर्यार्यमण-प्राजापत्यादिवत् भिन्नप्रयोगविधिपरिगृहीतत्वात्. पूर्वोक्तव्यवस्थया अङ्गाङ्गिभावम् अन्तरेणाऽपि शास्त्रमात्रसंगतेः नित्यस्य नैमित्तिकाङ्गतानौचित्यात् कल्पनालाघवाद् बहुवादिसंमतत्वाच्च इति. श्राद्धदीपदानक्रमश्च पूर्णतिथावेव प्राप्तो अनूद्यते इत्येव मन्तव्यम् इति दिक्.

कश्चित्तु ''न हि अत्र क्रमानुवादः. तथात्वे वचनवैयर्थ्यापातात्''. एवं सति भिन्नप्रयोगविधिपरिगृहीतत्वेऽपि ''**दर्शपूर्णमासाभ्याम् इष्ट्वा सोमेन यजेत**'' इत्यादिवत् श्राद्धानन्तर्यस्य दीपदानाङ्गत्वे तु न किञ्चित् बाधकम्. न च कर्मकालशास्त्रं बाधकम् इति वाच्यम्, 'अमावास्या'शब्दस्य सन्धिवाचित्वेन सन्धिदिने प्रदोषे दीपदानेऽपि तदविरोधात्. अङ्गीकृतं च सन्धिदिनस्य पूर्णस्यापि अमावास्यात्वं नारायणवृत्तिकारैः ''**अमावास्यायाम् अपराह्णे**'' इत्यत्र. ''**चन्द्रक्षयाविशेषेण साऽपि दर्शात्मिका स्मृता**'' इति देवलवचनाच्च. त्रियामिकास्थले मदनरत्नादिभिः प्रतिपदि दीपदानाङ्गीकराच्च इति दिक् इति आह.

स तु आग्रहवादएव इति जानीमः, सर्वनिबन्धवैसंमत्यात्. नारायणवृत्तिकारोक्तेः पिण्डपितृयज्ञविषयत्वात्. ''**अमावास्यायाम् अपराह्णे पिण्डपितृयज्ञेन चरन्ति**'' इति

व्याख्येयवाक्ये तथा दर्शनात्. देवलस्मृतेः पक्षश्राद्धम् आभ्याधीतत्वेन तद्विषयत्वात्. ''**अहः षोडशकं यत्तु शुक्लप्रतिपदा सह**'' इति तत्पूर्वार्द्धे दर्शनाच्च. 'त्रियामिका' इति वाक्यं तु स्वविषयएव नियामकं न अन्यत्र. अन्यथा अतिप्रसङ्गापत्तेः दुर्वारत्वात् इति. किं च एवम् उल्मुकनिषेधवैयर्थ्यापत्तिः. तथा हि पूर्णतिथौ विषयाभावाद् अन्यदा च श्राद्धोत्तरत्वेन तत्प्राप्त्या अनवसरपराहतेः. तच्छास्त्रप्रामाण्यावश्यकत्वे[३] तु तादृशविषये[४] दीपोल्मुकादिलोपएव [पा.भे.२]इति. न च क्रमबोधक-वाक्यवैयर्थ्यापत्तिः, ''एवं[५] प्रभात-समये'' इत्यादौ यथा नित्यस्नानानुवादेन अभ्यङ्गक्रमयोः देवपूजानुवादेन भक्तिक्रमयोश्च उत्सवाङ्गत्वेन यथा विधानं तथा नित्यश्राद्धम् अनूद्य तत्तद्द्रव्यविशिष्ट-सदैवत्वादेः विधानम् इति अङ्गीकारे[६] उपपत्तेः. पूर्णतिथौ दार्शिकेनैव प्रसङ्गसिद्धेश्च. न च तदकर्त्तुः अनधिकारापत्तिः इति[७] वाच्यं, तत्कर्त्तारं[८] प्रत्येव तादृशाधिकारसंचारात्. अन्यथा गुर्विणीपतिजीवत्पितृकादेरपि अनधिकारापत्तेः. न च इष्टापत्तिः, प्रसिद्धिविरोधात् इति दिक्.

[कठिनांशटिप्पणी: १.परिसंख्यानम्-गणना. २.''आश्विने मासि भूतादितिथयः कीर्तितास्त्रयः. दीपदानादिकृत्येषु ग्राह्या मध्याह्नकालिका'' इति ज्योतिर्निबन्धवाक्यस्वारस्यात्. सायंकाल एव दर्शे तदानीं मध्याह्नकालिक-वाक्यस्वारस्यात् एकदेशभूतसत्वाच्चेत्यर्थः. ३.प्रतिपदि-उल्मुकशास्त्रनिषेधशास्त्रम्. ४.यत्र श्राद्धाकालिकदर्शोत्तरं प्रतिपत्तत्रेत्यर्थः. ५.''एवं प्रभातसमये अमायां च नराधिप. स्नात्वा देवान् पितॄन् भक्त्या सम्पूज्याथ प्रणम्य च. कृत्वा तु पार्वणश्राद्धं दधिक्षीरघृतादिभिः''. ६.विश्वेदेवसाहित्यादेः. ७.श्राद्धाकर्तुररग्निमकर्मणि दीपदानेऽनाधिकारापत्तिः. ८.श्राद्धकर्तारं श्राद्धाधिकारिणमिति यावत्.]

पाठभेदाः १.'दर्शत्याग' इति ख पाठः. २''इति च न'' इति ख-ग पाठः.

सार्धत्रियाम-पूर्वविद्धा-परविद्धासमन्वयः.

एवं च उक्तप्रथमकल्पोक्तगौरवमपि निरस्तं बोध्यम्[१]. (दीपदानाङ्गभूत-पार्वणश्राद्धं दार्शिकातिरिक्तम् अङ्गीकार्यम् इति प्रथमपक्षोक्तगौरवम्.) वस्तुतस्तु क्रमानुवादएव शास्त्रकारानुशयगोचरः इति ज्ञायते. अन्यथा (हृदयस्य अग्रे अवद्यति-अथ जिह्वाया-अथ वक्षस इति वत्) विदध्यादेव नानुवदेत् इति अत्यलं प्रसक्तानुप्रसक्त्या. तथैव गोक्रीडायां (यदा तिथिवृद्धौ सत्यामपि सार्द्धत्रियामत्वं न भवति तदा) तु '**त्रियामिका**' इति वाक्ये ''**इतो अन्यथा पूर्वयुते विधेये**'' इति कथनाद् ''**गवां क्रीडादिने यत्र**'' इति ''**परविद्धासु यः कुर्याद्**'' इति वाक्याभ्यां च तिथिवृद्धौ सार्द्धत्रियामात्वाभावेन चन्द्रदर्शनसम्भावनया परवेधानुकल्पसम्भवेन च पूर्वयुता. न च वृध्दौ पूर्वस्याः सामान्यतो निषेधाद् न एवम् इति वाच्यं, मासातिदेशेन तस्य त्रिस्पृक्तिथिविषयत्वावगमात्.

एकादशीविषयत्वाद् वा, अस्य प्रातिस्विकत्वाच्च. तिथिसाम्यह्रासयोः सार्द्धत्रिया-तमत्वेऽपि वृद्ध्यभावेन पूर्वयुता. उभयसत्वे चन्द्रदर्शनेन [पा.भे.१]पूर्वयुता. (तस्य विशेषवाक्यत्वात्). परं ''**कार्तिके शुक्लपक्षे**'' इति वाक्यात् कार्तिकशुक्ले तुलासंक्रमे दर्शगतपूर्वाह्णकालमात्रातिक्रमः[२] कार्यः तस्य विशेषवाक्यत्वात्. एवं सति यावन्तः पूर्वविद्धाविधयः उत्तरविद्धानिषेधाश्च ते सर्वे ईदृशविषय[३] एव उपसंहृता बोध्याः. न च निषेधानाम् उपसंहारो[४] नास्ति इति वाच्यं, वृन्ताक-श्वेतवृन्ताक-निषेधादौ माधवादिभिः तस्य अङ्गीकाराद् इति. उभयसत्त्वे[५] चन्द्रादर्शने तु परयुतैव प्रतिपद् ग्राह्या इति निष्कर्षः. अत्र बलिपूजापूर्वभावित्वं यद्यपि गोक्रीडायाः न सिद्ध्यति तथाऽपि कालबाधापेक्षया कदाचित् कर्मबाधापेक्षया च क्रममात्रबाधएव साधुः इति न कोऽपि दोषः. उत्तरविद्धाविधीनां पूर्वविद्धानिषेधानाम् अत्र उपसंहाराच्च इति[६]. न च सार्द्धत्रियामत्वम् अविवक्षितम् इति[७] वाच्यं, प्रमाणाभावात्. न च चन्द्रदर्शनपरवेधदोषदर्शकशास्त्रमेव तत्र प्रमाणम् इति वाच्यं, अप्रयोजकत्वाद्, विनिगमनाविरहात्. अन्यथा वृद्धेरपि अविवक्षितत्वापातात्. न च इष्टापत्तिः, वाक्यवैयर्थ्यापातात्. किन्तु पूर्वतिथेः त्रियामात्वमेव अविवक्षितम्. अतएव 'वर्द्धमानतिथौ' इति वाक्ये तस्य अनुपादानं युज्यते. बलिपूजायां तु पूर्वविद्धैव, ''पूर्वविद्धैव कर्तव्या'' इत्यादिवाक्यात्. ''तिस्रो ह्येताः पराः प्रोक्ता'' इति अत्र 'पर'शब्दे उत्कृष्टवाचकत्वस्य शक्यवचनत्वाच्च. दिनकरोद्द्योते वाक्यस्य कृष्णप्रतिपद्विषयत्व-स्थापनाच्च. नारीनीराजन-मङ्गलमालिकयोस्तु बहुवादिसंमतम् उचिततरम्. व्याख्यानक्लेशस्तु न प्रामाणिकजनगोचरः.

[कठिनांशटिप्पणी: १.नेदं प्रतानकारवाक्यम्. २.पूर्वदिवसे सायं कलामात्रदर्शसत्वे, द्वितीयदिने च प्रदोषेतरसत्त्वे पूर्वत्र दीपोत्सवकर्मेति सैद्धान्तिकनिर्णयेन प्राप्तो यो दर्शविशेषः पूर्वदिनात्मकः कालस्तत्रातिक्रमः, अयं च निर्णयः 'रिक्तायुक्त' इत्यादिना दर्शितः. ३.यत्र तिथिवृद्धौ सत्यामपि त्रियात्मत्वं न भवति प्रतिपदस्तादशविषयः. ४.'कृत्वैतत् सर्वमेवाह' इत्यादिपूर्वोक्तवाक्येषु बलिपूजाया अन्ते उक्तेरिति. ५.त्रियामात्वसार्धत्रियामत्वयोस्तु. ६.वृद्धौ सत्यां यत्र त्रियामा भवति प्रतिपत्तत्र. ७.उत्तरतिथेः.]पाठभेदाः १.''पूर्वयुता. वृद्धौ परानिषेधस्य दत्तोत्तरत्वात्. परं कार्तिके'' इति ख-ग पाठः

पूर्वाह्णापराह्णाभ्यां दिनत्रयकृत्यकालव्यवस्था.

(ज्योतिर्विदाभरणेऽपि एवमेव सिद्ध्यति. तत्र हि

''इषान्तदर्शो रजनीमुखाधिको दीपोत्सवोऽसौ गदितो बुधैरिह।
श्राद्धं विधाय द्युदलक्षणत्रये सायं सदैवोल्मुकमादृतं ततः।।१।।

रिक्तानिशीथे किल विष्णुमायाम् अभ्यर्च्य दीपोत्सवमप्यमायाम्।
कृत्वा बलेश्च प्रतिपद्युतस्य पूजा तु गोक्रीडनमृद्धये स्यात्।।२।।
अमा यदा भूतदिनेऽपराह्णे प्रदृश्यते तद्दिवसेऽक्षयं स्यात्।
श्राद्धं पितृणां तदनूल्मुकाख्यं तमीमुखे लोकनृपार्थकारि।।३।।
प्रातश्च संगवश्चैव मध्याह्नः शारदस्तथा।
सायाह्नमर्द्धोदयतः पंचशो द्युमिते क्रमात्।।४।।
पंचधा भागकालोऽसौ त्रिधा पूर्वाह्णिकं ततः।
मध्याह्नमपराह्णं तु द्वेधा पूर्वापराह्णिके।।५।।
दिनावसाने क्षणमप्यमा चेत् श्राद्धं विधायोल्मुकमत्र कुर्यात्।
क्षयेऽथ वृद्धौ प्रतिपद्युपेते दर्शे ततोऽग्रे बलिपूजनं स्यात्।।६।।
श्राद्धे कृते शारदगामिदर्शे नन्दोल्मुकं दूषणकृन्न राज्ये।
तदा निशीथे सुरशक्तिपूजाऽदर्शेऽपि लोकेश्वरसौख्यदा स्यात्।।७।।
सूर्यास्तकालोल्मुकमङ्गिकर्म स्यादङ्गकर्माण्यपराणि चात्र।
दर्शोदरः पञ्चदिनात्मकोऽसौ दीपोत्सवस्तद्व्यवहारसिद्धः।।८।।

इत्यादिश्लोकद्वयेन पूर्णतिथौ क्रमप्राप्तानि श्राद्धोल्मुक-लक्ष्मीपूजन-दीपोत्सवरूपाणि अमाकृत्यानि, बलिब्रह्मपूजा-गोक्रीडनानि प्रतिपत्कृत्यानि उक्त्वा, ततः 'अमा यदा' इति पद्येन भूतदिने अपराह्णम् आरभ्य प्रवृत्तायाम् अमायां श्राद्धोल्मुकादिपौर्वापर्यं स्वरसप्राप्तम् उत्तमम् इति उक्त्वा 'प्रातश्च' इत्यादिश्लोकद्वयेन दिवसस्य पञ्चधा त्रेधा द्वेधा विभागं प्रासङ्गिकं दिनान्तस्य अपराह्णत्वाय बोधयित्वा "**दिनावसाने क्षणमप्यमा चेत् श्राद्धं विधायोल्मुकमत्र कुर्यात्, क्षये**" इत्यनेन पैतृके सूर्यास्तव्यापितिथिसाकल्यशास्त्रस्य तदनुसारिणः "**आश्विनान्ते चतुर्दश्याम्**" इत्यादिशास्त्रस्य च अनुग्रहात् चतुर्दश्यां श्राद्धं विधाय तदुत्तरम् उल्मुककरणं "**इतोऽन्यथा पूर्वयुते विधेये**" इति शास्त्रानुसारेण उक्त्वा, तत्रापि अमाया अभावे "**अथ प्रवृद्धौ प्रतिपद्युपेते दर्शे**" इत्यादिना "**त्रियामिका दर्शतिथिः**" इति शास्त्रानुसारेण श्राद्धोत्तरं प्रतिपद्युल्मुकं न दुष्टम् इति बोधयित्वा, लक्ष्मीपूजामपि आदर्शे सौख्यदाम् उक्त्वा, "**सूर्यास्तकालोल्मुकमङ्गिकर्म स्यादङ्गकर्माण्यपराणि चात्र**" इत्यनेन उल्मुकानुरोधेन श्राद्धादीनां पैतृकाणां गौणकालेऽपि करणं न अनुचितम् इति बोधयित्वा अत्र "**दर्शोदरः पंचदिनात्मकोऽसौ दीपोत्सवस्तद्व्यवहारसिद्ध**" इत्यनेन दीपोत्सवस्य व्यवहारसिद्धत्वेन दर्शोदरस्य पञ्चदिनात्मकत्वं पञ्चात्मकदर्शोदरव्यवहारसिद्धत्वं वा दीपोत्सवस्य इति उक्तम्. एवं च उभयथापि पौर्वरात्रिकनीराजनस्य वा अमास्थदीपदानस्य वा दीपोत्सवत्वं सिद्ध्यति. तत्र नीराजनस्य द्वादश्यादौ दैनंदिनत्वात् न श्राद्धोत्तरत्वापेक्षां,

नापि दीपदानस्य, लक्ष्मीजागरणोत्सवरूपत्वेन तत्प्रीत्याद्यर्थत्वात्. अत एव अत्र सन्दर्भे श्राद्धोत्तरत्वम् उल्मुकमात्रस्यैव उक्तं न इतरस्य. **'दर्शश्राद्धं विना'** इति वाक्ये 'दीप'पदं तु उल्मुकसाहचर्यात् पितृदीपपरम्. ''**पूर्वं नीराजनं कृत्वा**'' इति वाक्यं तु दिनद्वयप्रदोष–व्याप्यमायां प्रथमायाः त्याज्यत्वाय इति पूर्वोक्तम् अविरुद्धम् इति दिक्.)

अथ इदं विचार्यते. संलग्नताशास्त्रं मलमास–दीपोत्सव–निवर्त्तनविषयकं[१] दीपदानमात्रविषयकं वा. 'दीपदान'शब्दोऽपि किं नीराजनपरो दीपदानपरो वा. नीराजनमपि पौर्वरात्रिकम् औदयिकं वा इति. तत्र न तावत् आद्यः. ''**मलेऽनन्यगतिं कुर्यात् नित्यां नैमित्तिकीं क्रियाम्**'' इति वाक्ये (गत्यन्तराभावएव नैमित्तिककरणविधानेन इह च) गत्यन्तरसत्त्वेन मले तत्प्राप्त्यसम्भवात्. 'इषासित' इति प्राथमिकवाक्ये 'ऊर्जा'दिपदसमभिव्याहारादेव आश्विनसंसर्प्प एतस्य निवृत्त्या संलग्नतावाक्य–वैयर्थ्यापत्तेश्च. कार्तिकसंसर्प्पत्वे[२] तन्निवारणे विश्लेषस्यैव आपाताच्च. वस्तुतस्तु[३] सांप्रतं कार्तिकादित्रयसंसर्प्पस्यैव असम्भवाद् न किञ्चिद् एतत्. तदंहस्पतौ[४] च तार्त्तीयीकदिनालाभेन असम्भवाच्च. यदि च स्वातियोगेन दीपावलीत्वम् अङ्गीकृत्य तत्र संलग्नता नियम्यत इति विभाव्यते. तदाऽपि सूर्यभोग्यस्वातिग्रहणे तु मलासम्भवएव. अन्यदाऽपि त्रिस्पृङ्नक्षत्रविषयत्वे[५] च प्रायिकत्वापत्त्या कादाचित्कत्वमेव स्याद् रोहिण्यष्टमीजयन्तीवत्. प्रसिद्धिविरोधश्च अन्धपरंपरा च स्यात्. तस्य त्रिस्पृक्त्वाभावे तु सिद्धान्तकुक्षिगतत्वमेव. द्वितीयेऽपि न आद्यः, द्वादश्यादिपञ्चकसंलग्नतापातात्. 'तत्समानत्वादितरेषु तथात्वम्' इति न्यायात्. न च इष्टापत्तिः. तथा वाक्यान् अभिव्यक्तेः. बहुवाद्यसम्मतत्वाच्च. न इतरः, चतुर्दश्यां प्रातर्नीराजनप्रापकवचनाभावात्.

''स्वातिस्थिते रवाविन्दुः यदि स्वातिगतो भवेत्,
पञ्चत्वगुदकस्नायी कृताऽभ्यङ्गविधिर्नरः,
नीराजितो महालक्ष्मीम् अर्चयन् श्रियम् अश्नुते''

इति पुष्करपुराणोक्तकालस्य च प्रायिकत्वात्. न च तद्विषयत्वमेव अस्तु. 'त्रियामिका' इति वाक्ये द्वयोरेव दीपोत्सवत्वम् उक्तम् इति इष्टापत्तेः इति वाच्यम्, 'उत्सव'पदासङ्गतिप्रसङ्गात्. न हि 'उत्सव'पदेन नीराजनमात्रम् उच्यते अपितु उत्सवरूपाणि सर्वाण्येव कर्माणि इति. किञ्च, ''**दीपैः नीराजनाद् अत्र सैषा दीपावली स्मृता**'' इति ब्राह्मात्, ''**तदा दीपावली भवेत्**'' इति अत्र नीराजनपरिसंख्यानेन स्वातियोगाभावे तत्करणाभावेन पूर्वोक्तदूषणापत्तेः. न अन्त्यः, प्रतिपदि तत्प्रापक–वचनाभावात्. 'संलग्नमेव' इति 'त्रियामिका' इति शास्त्रयोस्तु संलग्नकर्त्तव्यताकत्व–

पूर्वयोगपरयोगव्यवस्थापकत्वयोरेव विषयत्वेन भानाच्च. किंच, यदा त्रयोदशीप्रदोषे चतुर्दशी, तत्प्रदोषे च दर्शः, स च द्वितीये अह्नि दण्डमात्रः तादृग्विषये व्यभिचारापत्तेश्च, 'दण्डैकरजनी' इति वाक्यात् श्राद्धोत्तरत्वोक्तेश्च परेद्युरेव तत्करणात्. दार्शिकदीपावृत्तिस्तु न उचितैव, प्रसिद्धिविरोधात् उक्तहेतुभ्यां च.

कस्तर्हि विषयः इति चेद्, वदामः. भविष्योत्तरे,

''पुरा वामनरूपेण प्रार्थयित्वा धरामिमाम्,
ददावतिथिरिन्द्राय बलिं पातालवासिनम्,
कृत्वा दैत्यपतेः दत्वा अहोरात्रत्रयं बुधः''

इति वाक्यदर्शनात् तदेकमूलकल्पनया तत्तिथित्रयं प्रक्रम्य पठितानि 'उत्सव'पदोक्तेः उत्सवरूपाणि कर्माणि विषयः इति. उचितमपि एतत्. परस्परविरुद्धानाम् एकत्र विधानदर्शनाद् विरुद्धयोः देवासुरयोः अत्र ऐक्यश्रवणाद् उत्साहाच्च उत्सवरूपत्वस्य स्फुटत्वात्. विवरवासिनः पुना राज्यप्राप्तेरपि. अतएव ''**अद्य राज्यं बलेः लोको यथेष्टं चेष्टताम्**'' इत्यादिवाक्योक्त-राजप्रयुक्त-बलिराज्यघोषलोककर्तृक-यथेष्टचेष्टादिरपि संगच्छते.

[कठिनांशटिप्पणी: १.मलमासे दीपोत्सवनिवर्तनविषयकमित्यर्थः. २.आधिक्यम्. ३.एतस्य निवृत्या संलग्नतावाक्य-वैयर्थ्यापत्तेश्च. कार्तिकसंसर्पित्वेन. ४.अंहस्पतौ-क्षये. ५.नक्षत्रक्षये.]

त्रियामत्वशास्त्रस्य रहस्यार्थः

अत्र इदं बोध्यम्. ''**सैषा दीपावली स्मृता**'' इति ब्राह्मे एकवचनात् प्रसिद्धेश्च अमायाएव दीपोत्सवत्वाद् ''**दीपोत्सवदिनत्रयम्**'' इति अत्र 'दिनत्रय'शब्देन तत्पौरस्त्यपाश्चात्ययोः तस्य च कृत्यं लक्ष्यते इति मन्तव्यम्. तिथ्यहोरात्रोक्तौ तु तयोः अनुक्तसिद्धत्वाद् वचनवैयर्थ्यापत्तिः दुर्दुर्वारैव स्यात्. एतेन ''**दीपोत्सवे ते मुनिभिः प्रदिष्टे**'' इत्यत्रापि 'दीपोत्सव'शब्दः सप्तम्यन्तो बोध्यः. तथा च दीपोत्सवे विवृद्धौ सत्यां ते त्रियामासार्द्धत्रियामे अमाप्रतिपत्तिथी प्रदिष्टे. कर्मनिमित्तकालतया ग्राह्यत्वेनोक्ते, इतो अन्यथा तिथिवृद्धावपि त्रियात्मत्वसार्द्धत्रियामत्वयोः अभावे, तिथिसाम्यह्रासयोश्च त्रियामत्वसार्द्धत्रियामादित्वे सति पूर्वयुते भूतयुता अमाऽमायुता प्रतिपद् इत्येवं विधेये कर्मकालत्वेन ग्राह्ये इति अर्थो निष्प्रत्यूहः स्फुटति.

एवं सति अत्र इयं व्यवस्था. यदा तिथिवृद्धौ सार्द्धत्रियात्मत्वाभावे पूर्वयुता

प्रतिपत् तदा गोपूजाक्रीडयोः दर्शस्य प्रशस्तत्वात् भौतिकदार्शिकदीपदानयोः बलिपूजायाः तदङ्गानां च स्वस्वकालएव यथाक्रमम् अनुष्ठानम्. अभ्यङ्गे तिथेः तात्कालिकत्वस्य विशेषवाक्यगोचरत्वेन व्युत्क्रमो दिनत्रयबहिर्भावश्च न दुष्टः, नारीनीराजनादिवत्. परं दार्शिकश्राद्धं कदाचिद् द्वितीये अह्नि दिनद्वये वा दर्शश्राद्धं तदुपपादितं पूर्वम्. वृद्धौ पूर्वानिषेधस्तइ[१] दत्तोत्तरो[२] विशेषवाक्यबाध्यश्च[३]. परं तु कार्तिकशुक्लपक्षे तुलासंक्रमे गोक्रीडायाः कालो दर्शपूर्वाह्णो बोध्यः[४]. गवां कर्णजागरणं च न कार्यम्. गोपूजनं तु न निषिद्धम् इति भवत्येव. तथैव गोवर्द्धनपूजान्नकूटादिकमपि. दर्शस्य तत्कालत्वेन वक्ष्यमाणत्वात्. प्रतिपदि गोवर्द्धनपूजावाक्यस्य केवलपूजापरत्वात्. अन्नकूटस्य अद्रिगोद्विजमखत्वेन तदु(?)द्देश्यकतया गोपूजासाहचर्यलाभाच्च. पूर्णतिथौ प्रतिपदादारस्तु ''**कृत्वैतत् सर्वमेवाहन्**'' इति वाक्यान्तरे बलिपूजापूर्वभावानुरोधात्. दीपोत्सवोत्तरमेव शिष्टाचाराच्च इति दिक्.

यदा च तिथिसाम्ये सार्द्धत्रियामत्वे पूर्वयुता, तदापि सर्वं पूर्ववदेव. यदा च तिथिह्रासे सार्द्धत्रियामत्वे पूर्वयुता, तदाऽपि भूतदर्शयोः प्रदोषद्वयाव्यापित्वं चेद् गौणकालव्याप्तिमादाय[५] कर्म विधेयम् इति सर्वं पूर्ववदेव. यदा तु भूतस्य प्रदोषद्वय-व्यापित्वोत्तरं दर्शाद् ह्रासः तदापि दर्शस्य गौणप्रदोषे सत्वात् पूर्ववदेव कामरात्रौ भूतदीपदानम्, भूते प्रातरभ्यङ्गो रात्रौ च दार्शिकं दीपदानं, दर्शदिने अन्नकूटादि रात्रौ बलिपूजादि. यदा च दर्शस्य प्रदोषद्वयव्यापित्वोत्तरं प्रतिपदो ह्रासः तदापि द्वितीयदिने दर्शस्य दण्डमात्रत्वाऽभावे पूर्ववदेव. द्वितीयदिने दण्डमात्रत्वे तु ''**दण्डैकरजनीयोगे दर्शः स्यात्तु परेऽहनि, तदा विहाय पूर्वेद्युः परेऽह्नि सुखरात्रिका**'' इति तिथितत्त्वे ज्योतिर्वचनात् परयुता कार्या. अन्यथा एतद्बाधापत्तेः. 'इतोन्यथा' इत्यस्य पूर्वोक्तविषयेषु सावकाशत्वाच्च.

[कठिनांशटिप्पणी: १.त्याज्यास्तिथिस्त....पूर्वावृद्धौ ग्राह्या तथोत्तरेति. २.'अकर्म्मण्यं तिथिमलमि'त्यनेन. ३.'इतोन्यथेति' वाक्यम्. ४.''कार्तिके शुक्लपक्षे तु तुलाभानुर्यदा भवेत्. यत्नेन वर्जयेद् दर्शं गोक्रीडायां तु भूतले'' इत्यनेन काल एव बाध्यः, प्रदोषे कर्णजागरञ्च न कार्यम्. तस्य क्रीडाप्रयोजकत्वात्. ५.स्वकालादुत्तरकालो गौणः सर्वस्य कर्मणः.]

बलिपूजायां चन्द्रदर्शनदोषः

न च बलिपूजायां दोषसञ्चारः,

''नन्दा किञ्चिद्युता यत्र दृश्यते च द्वितीयया,
बलेर्दिनं न कर्तव्यं चन्द्रदर्शनसम्भवात्''

इति वाक्ये चन्द्रदर्शनस्यैव दोषप्रयोजकत्वोक्तेः. एवं सति मध्याह्नकालिक-शास्त्रम् आदाय भूतदीपदानं भूतप्रदोषे अमायां भवति इति विशेषः. शेषं यथा स्थानम् इति ज्ञेयम्.

अन्नकूटे चन्द्रदर्शनदोषो नास्ति.

यदा च एतादृशे विषये चन्द्रदर्शनसम्भावना कार्तिककृष्णे तुलाभानुः वा तदा तु पूर्वेद्युरेव सुखरात्रौ बलिपूजाऽपि गोक्रीडाऽपि रात्रौ प्रतिपदि. तथा च गवां कर्णजागरणमात्रं कार्यं न अन्यद् इति फलति. अन्नकूटगोपूजागोवर्द्धनपूजादिकं तु द्वितीयएव दिने प्रतिपत्पूर्वाह्णे. श्रीमद्भागवते

''वयं गोवृत्तयोऽनिशम्''
''तस्मात् सम्पूजयेत् कर्म''
''तस्माद् गवां ब्राह्मणानाम् अद्रेश्च आरभ्यतां मखः,
अयं गोब्राह्मणाद्रीणां मह्यं च दयितो मख''

इत्यादिभगवद्वाक्येषु गवादीनां प्राधान्यप्रतीतेः बलिपूजाङ्गत्वभ्रमभङ्गात्[१]. यदा च ''वर्द्धमानतिथौ'' इति वाक्योक्तो यथाश्रुतः कालः तदापि अनुपदोक्तएव प्रकारः इति सर्वम् अनवद्यम्.

ननु अन्नकूटोत्सवः कुत्र उक्तः? इति चेत्, पाद्मोत्तरखण्डे इति जानीहि. तथाहि

''ततो बलिगृहद्वारि स्थाप्यो गोमयमूर्तिमान्,
पुनः श्रीबालगोपालः तथा गोवर्द्धनो महान्,
बलिराजद्वारपालो भवान् अद्य भव प्रभो,
निजवाक्पालनार्थं त्वं सगोवर्द्धनगोपते,
इति संस्थाप्य गोपालं गोवर्द्धनसमन्वितम्,
प्रतिष्ठापूर्वकं धीमान् भक्त्या संपूजयेत् मुने,
गोपालमूर्त्ते विश्वेश शक्रोत्सवविभेदक,
गोवर्द्धनकृतच्छत्र पूजां मे गृह्ण गोपते,
गोवर्द्धनधराधार गोकुलत्राणकारक,
विष्णुबाहुकृतच्छाय गवां कोटिप्रदो भव,
इति सम्पूज्य विधिना भक्ष्यभोज्यैः शुभावहैः,

ज्ञातीन् बन्धून् जनान् सर्वान् क्रमशो भोजयेत् ततः,
भक्ष्यं चात्महितं भोज्यं तथान्तःपुरचारिभिः,
वस्त्रैः ताम्बूलदानैश्च पुष्पचन्दनकुङ्कुमैः,
एलालवङ्गकर्पूरकस्तूरीभिश्चतान्[२] यजेत्,
कृत्वैतत् सर्वमेवं हि पुनः कुर्यात् महोत्सवम्,
अन्नकूटम् इति ख्यातं विष्णोः भक्त्या सुशोभनम्''

इति. वाराहपुराणे मथुरामाहात्म्ये च अन्नकूटो निरुक्तः.

''अन्नकूटस्य सांनिध्ये तीर्थं कृष्णविनिर्मितम्,
तत्र कृष्णेन पूजार्थम् इन्द्रस्य विहतो मखः,
महानिन्द्रस्य चोत्थानं भक्ष्यभोज्यसमन्वितम्,
कृत्वा तुष्टिकरं साक्षाद् इन्द्रेण सह संकथाः,
इन्द्रस्य वर्षतोऽत्यन्तं गवां पीडाकरं जलम्,
तासां रक्षार्थं संस्तभ्य धृतो गिरिवरस्तदा,
सोऽन्नकूट इति ख्यातः सर्वतः शक्रपूजितः''

इति.

अत्र अन्नकूटोत्सवाङ्गत्वेन क्रियमाणोऽपि गोवर्द्धनोत्सवो व्रतदिनकरे (बलीवर्दकथायां) मासान्तरेऽपि उक्तः.

''गोवर्द्धने च नन्देन कृतोऽयं सुमहोत्सवः,
दर्शे च श्रावणे मासि गोपैः सुबहुली[पा.भे.१] कृतः''

इति उक्त्वा

''इन्द्रो महेन्द्रो विमृधो दर्शेष्टौ श्रुतिचोदितः,
कथं शक्रो वेदितव्यः श्रुतौ गुणविभागतः,
तस्माद् अत्र विधातव्यो गोवर्द्धनमहोत्सवः''

इति श्रीनन्दं प्रति भगवद्वाक्यात् सोपि दर्शेष्टिकालएव कार्यः इति ज्ञायते. तत्रापि श्रीभागवते ''**अपर्त्तावुल्बणं वर्षम्**'' इति कथनात् शरद्गम्यते. हरिवंशे शरदः कण्ठतः उक्तेश्च. शिष्टाचाराच्च इदानीं शरदेव मुख्येति गम्यते. तत्र च भगवदीयैः भगवदुक्तत्वेनैव क्रियते नतु बलिपूजाङ्गत्वेन इति तां विनाऽपि तत्करणम् उचिततरम्.

किञ्च, दर्शदिने असौकर्ये द्वादश्यन्तमपि तत्करणं शिष्टानाम् उचितमेव. इन्द्रयागसम्भारोपयोगायैव दर्शग्रहणात्. अन्यदा तेषां वैरस्य सम्भवात्. अतएव तिथौ

आग्रहाभावात् प्रतिपदपि उक्ता. तस्मात् सर्वम् अनवद्यम् इति दिक्.

इति श्रीमद्वल्लभनन्दनचरणरजोनुरागपूरितहृदय–
पुरुषोत्तमकृतो दीपोत्सवनिर्णयः सम्पूर्णः.

[कठिनांशटिप्पणी: १.बलिपूजान्नकूटोत्सवश्च पृथग्विधी स्तः. २.तामिति गोमयमूर्तिम् इत्यर्थः. (सर्वपुस्तकेषु वर्त्तते अत्र 'तान्' पाठः.]

पाठभेदः १.''...कृतः'' इत्यादिना पृथगपि उक्तः. तेन कालान्तरेऽपि गोवर्धनपूजनं साम्प्रदायिकानां युक्तम् इति सर्वम् अनवद्यम् इति दिक्'' इति ख–ग पाठः.

अथ कार्तिकशुद्धद्वितीया भ्रातृद्वितीया.

सा च उत्सवे भोजनकालव्यापिनी ग्राह्या. यद्यपि भोजनस्य यमप्रीत्यर्थत्वात् यमस्य च पितृत्वेन अपराह्णे एव पूज्यत्वात् तद्व्यापिनी तिथिः ग्रहीतुम् उचिता, सर्ववादिसम्मता च. तथापि ''**देवत्वं च पितृत्वं च यमस्यास्ति द्विरूपता**'' इति वाक्येन देवत्वस्यापि सत्त्वेन केवलपितृत्वाभावाद् ''**आवर्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः**'' इति द्वेधाविभक्तापराह्णस्य भोजनकालेऽपि सम्भवात् तम् आदायैव ग्राह्या. यमपूजाया अकरणाद् वा तथा अस्तु. इति यमद्वितीयानिर्णयः.

अथ कार्तिकशुक्लाष्टमी गोपाष्टमी.

तथा उक्तं व्रतदिनकरे पाद्मे,

''शुक्लाष्टमी कार्तिके तु स्मृता गोपाष्टमी बुधैः,
तद्दिने वासुदेवोऽभूत् गोपः पूर्वं तु वत्सपः,
तत्र पूजां गवां कुर्यात् गोग्रासं गोप्रदक्षिणाम्,
गवानुगमनं कार्यं सर्वकामार्थसिद्धये''

इति. अत्र उदयव्याप्त्या निर्णयः. विद्धाक्षये तु अगत्या विद्धैव कार्या इति. इति गोपाष्टमीनिर्णयः.

अथ कार्तिकशुक्लैकादशी प्रबोधोत्सवः.

अथ उत्थापनविधिः. तदुक्तं हेमाद्रौ ब्राह्मे

''एकादश्यां तु शुक्लायां कार्तिके मासि केशवम्,
प्रसुप्तं बोधयेद् रात्रौ श्रद्धाभक्तिसमन्वितः,
नृत्यैः गीतैः तथा वाद्यैः ऋग्यजुःसाममङ्गलैः,

वीणापटहशब्दैश्च पुराणपठनेन च''

इत्यादिना. तत्रैव भविष्योत्तरेऽपि

''कार्तिके शुक्लपक्षे तु एकादश्यां पृथासुत,
मन्त्रेणानेन राजेन्द्र देवम् उत्थापयेत् द्विजः,
ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्य–सोमादिभिर्वन्दितवन्दनीय,
बुध्यस्व देवेश जगन्निवास मन्त्रप्रभावेण सुखेन देव,
इयं च द्वादशी देवप्रबोधार्थं विनिर्मिता,
त्वयैव सर्वलोकानां हितार्थं शेषशायिना,
त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेद् इदम्,
उत्थिते चेष्टते सर्वम् उत्तिष्ठोत्तिष्ठ माधव''

इत्यादिना च. अन्यच्च तत्र भविष्योत्तरे

''आभाकासितपक्षेषु मैत्रश्रवणरेवती,
आदिमध्यावसानेषु प्रस्वापावर्त्तनोत्सवाः,
निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम्,
अन्यत्र पादयोगे तु द्वादश्यामेव कारयेत्''

इत्यादि. स्कान्दे चातुर्मास्यव्रतकल्पे तु विशेषः उक्तः,

''जागरं च प्रबोधिन्यां कुर्यात् वै नियतेन्द्रियः,
गुरोर्गोमिथुनं दत्वा द्वादश्यां भोजयेद् द्विजान्,
आसायाह्नं पुराणाद्यैरहः संक्षपयेद् बुधः,
अस्तङ्गते दिनकरे पुनः स्नायाद् यथाविधि,
वृन्दावने ततः कुर्यात् मण्डपं चतुरस्रकम्,
पुष्पमाल्यैः फलैर्दिव्यैः नारिकेलादिभिः शुभैः,
पुंगीफलैरिक्षुदण्डै रम्भास्तभ्भैश्च शोभितम्,
तत्र देवं प्रतिष्ठाप्य सुघोषैर्मन्त्रपूर्वकम्''

''**इदं विष्णुः**'' इति मन्त्रेण वाराहोक्तमन्त्रैश्च उत्थापयेद् इति शेषः. स्कान्दे पुरुषोत्तममाहात्म्ये तु पञ्चामृतस्नापनम् उत्थापनोत्तरम् उक्तम्. ''**सुगन्धतैलेनाभ्यंज्य स्नापयेत् पुरुषोत्तमम्, पञ्चामृतैः नारिकेलरसैः फलरसैः तथा**'' इति. एवं च अत्र द्विविधैः वाक्यैः तिथिद्वयं रात्रिर्दिनं सन्ध्या च यथायथं काल इति बहूनां मतम्.

मम तु 'द्वादशी'शब्द एकादशीपरः इत्येवं प्रतिभाति. भविष्योत्तरे, ''**एकादश्यां मन्त्रेणानेन**'' इति उपक्रम्य ''**इयं च द्वादशी देवप्रबोधार्थं विनिर्मिता**'' इति मन्त्रोक्तेः.

‘द्वादशी’पदस्य एकादशीवाचकत्वं पवित्रोत्सवनिरूपणे स्फुटीकार्यम्. मन्त्राणां वाराहीयत्वे द्वादशीम् उपक्रम्य पाठे तु तिथिद्वयमपि प्रबोधकालो अस्तु न कापि क्षतिः. एवं च उत्थापनस्य दिवा रात्रौ च विधानाद् उभयमपि प्रबोधकालः.

तेन अयं विशेषः. एकादश्याम् उत्थापने विद्धा त्याज्यैव, आसुरीत्वाद् युग्मवाक्यानुरोधाच्च. भद्रापि त्याज्यैव, कालान्तरस्यापि लाभात्. द्वादश्याम् उत्थापने च ऋक्षपादयोगौ न अत्यन्तावश्यकौ, ‘‘**द्वादश्यां संधिसमये नक्षत्राणाम् असम्भभवे, आभाकासितपक्षेषु शयनावर्त्तनादिकम्**’’ इति वाराहात्.

अथ अत्र प्रसङ्गात् वेधो विचार्यते. स च (हरिवल्लभसुधोदयादौ) स्थूलतया चतुर्विधो विष्णुधर्मोत्तरे निरूपितः

‘‘**पञ्चचत्वारिंशता स्पर्शः सङ्गः पञ्चाशता मतः,**
पञ्चपञ्चाशकः शल्यो वेधः षट्पञ्चाशकः स्मृतः,
स्पर्शे तु घटिकाः पञ्च पञ्चसङ्गे तथैव च,
शल्ये पञ्च तथा वेधे पूर्णवेधश्चतुर्विधः,
स्पर्शादिचतुरो वेधान् वर्जयेत् वैष्णवो नरः’’

इति. व्यवस्थापितश्च तत्रैव. ‘‘**स्पर्शादिचतुरो वेधाः सुप्रसिद्धाः कृते युगे, सङ्गादयस्तु त्रेतायां शल्याद्यौ द्वापरे कलौ**’’ इति. (अस्मिन् वाक्ये ‘शल्याद्यौ’ इति अत्र वेधस्य आद्यत्वाभावाद् द्वन्द्वेनार्थासिद्धेः द्विवचनेन तद्गुणसंविज्ञानबहुव्रीह्यवगमाद् उभयोः युगद्वये प्राप्तेः साम्प्रदायिकैः सशल्यैकादशी त्यज्यते. अतद्गुणसंविज्ञानपक्षे तु) तेन इदानीं वेधएव वैष्णवैः त्याज्यः. तत्प्रकारश्च श्रीमदाचार्यचरणैः निबन्धे निरूपितः.

‘‘**एकादशीव्रतं च षट्पञ्चाशद्वेधरहितं कर्त्तव्यम्. पूर्वम् अन्यथाकरणेऽपि भगवन्मार्गप्रवेशानन्तरं पञ्चपञ्चाशद्घटिका दशमीचेत् तदैकादशी त्याज्या**’’

इति. अत्र इदं हृदयम्. ‘‘**नाडिकाः षट् च पञ्चाशत् प्रातस्त्वेकोऽधिकोऽरुणः, उषः कालोऽष्टपञ्चाशत् शेषः सूर्योदयः स्मृतः**’’ इति वाक्ये एकोनषष्टिघटिकोत्तरमपि पारिभाषिकः सूर्योदयो भवतीति तम् आदाय ‘‘**उदयात् प्राक् चतस्रस्तु नाडिका अरुणोदयः**’’ इति उक्ते पारिभाषिके अरुणोदये गृहीते पञ्चपञ्चाशद्घटिकाऽपि दशमी (पाक्षिकं) अरुणोदयवेधं विधत्ते इति सोऽपि दोषः परिहरणीयः इति. (यत्तु ‘‘उषः कालोऽष्टपञ्चाशत्’’ इति अष्टपञ्चाशत्तमायाः घटिकायाः उषःकालत्वविधानात्

तच्छेषद्विघटिकस्य सूर्योदयत्वं शङ्कितं, तदबोधात्. 'अष्टपञ्चाशद्' इति अत्र पूरणप्रत्ययाभावेन तस्य अर्थस्य अनुपस्थितेः. अतः षट्पञ्चाशच्च नाडिका यदा व्यतियन्ति ततः प्रातरित्येव अर्थः साधीयान्. एवम् अग्रेऽपि. उचितं च एतत्. षट्पञ्चाशदुत्तरं शिष्टनाडीनां चतुःसङ्ख्याकत्वात् प्रातरादिनाम्नां तथात्वाच्च.) न च इदम् अप्रयोजकम्. प्रत्यक्षारुणोदयस्य सार्द्धद्विघटिकावशेषे त्रिघटिकावशेषे वा उपलम्भात् चतुरवशेषे यो अरुणोदयः सः पारिभाषिकएव इति तत्र तादृशस्यैव औचित्यात्. मुख्येनैव सर्वत्र निर्वाहे परिभाषावैयर्थ्यापत्तेः इति.

(पारिभाषिकसूर्योदयः) यत्तु यामयामार्द्धादिगणनायाः सर्वत्र प्रत्यक्षसूर्योदयम् आरभ्यैव दृष्टत्वाद् ''**निशि प्रान्ते तु यामार्द्धे देववादित्रवादने, सारस्वतानध्ययने अरुणोदय उच्यते**'' इति हेमाद्रिधृतस्मृतौ पारिभाषिक-सूर्योदयावधिक-यामार्धप्रतीत्यभावाच्च पारिभाषिकसूर्योदयावधिकारुणोदयग्रहणम् अयुक्तम्, इति उक्तम्. तद् न, नियमाभावात्. ''**सूर्यग्रहे तु नाश्नीयात् पूर्वयामचतुष्टयम्**'' इत्यादौ व्यभिचारात्. अतो यत्किञ्चित् अवध्यपेक्षत्वेन उक्तस्मृतावपि तत्प्रतीतेः अनिवार्यत्वाद् न दोषः.

न च ''चतस्रो घटिकाः प्रातररुणोदयनिश्चयः'' इति ब्रह्मवैवर्तीये ''नाडिकाः षट् च पञ्चाशत्प्रातः'' इति वाक्योक्त-प्रातरात्मक-घटिकाचतुष्टयस्य अरुणोदयत्व-कथनात् पारिभाषिकसूर्योदयावधिकारुणोदयग्रहणे मूलद्वयकल्पनागौरवापत्तिः. सा च सम्भवति एकमूलत्वे अन्याय्या. अतएव चतुर्दण्डमुहूर्त्तद्वयादिवाक्येषु यामार्द्धोप-लक्षकत्वमेव तद्भिया निबन्धकृद्भिः अङ्गीकृतम् इति न पूर्वोक्तं साधीयः इति वाच्यम्.

''**नाडिकाः षट् च**'' इति वाक्ये एव ''**एको अधिको अरुण**'' इति अग्रे दर्शनात् त्रिघटिकाविशेषेऽपि अरुणोदयप्राप्तेः एकमूलत्वस्य कथमपि असम्भवात्. सिद्धे चतुर्दण्डादिपदानाम् उपलक्षकत्वे यामार्द्धपदस्य विवक्षितार्थत्वसिद्धिः तत्सिद्धौ च तदेकमूलकल्पनया चतुर्दण्डादिवाक्यानां तात्पर्यानुपपत्तौ चतुर्दण्डादिपदानाम् उपलक्षकत्वसिद्धिः इति चक्रकापत्तेश्च. अतः प्रामाणिकत्वेन मूलद्वयकल्पनागौरवस्य अदुष्टत्वात्, ''**स्पर्शे तु घटिकाः पञ्च**'' इत्यादीनाम् अरुणोदयवेधनिन्दामात्र-प्रतिपादनपरत्वकथनमपि अनालम्बनमेव.

यत्तु माधवाचार्यैः

''**अर्द्धरात्रेऽपि केषाञ्चिद् दशम्या वेध इष्यते,**

अरुणोदयवेलायां नावकाशो विचारणे,
कपालवेध इत्याहुः आचार्या ये हरिप्रियाः,
न तन्मम मतं यस्मात् त्रियामारात्रिरिष्यते''

इत्यादेः कैमुतिकन्यायेन अरुणोदयवेधनिन्दार्थत्वम् उक्तम्. तद्रीत्यापि विचारे अरुणोदयवेधस्य सर्वथा त्याज्यत्वमेव आयाति इति तद्वेलानिर्णयस्य आवश्यकत्वात् सूक्ष्मेक्षकाणाम् अस्मदुपदर्शितसरणिः आदरणीयैव. उक्तशौनकवाक्ये रात्रेः त्रियामात्वस्य हेतूकरणेन तस्य च रात्रिपूर्वोत्तरार्द्धयामयोः सन्ध्यायां निवेशेन सिद्ध्या सूक्ष्मेक्षिका-वश्यकत्वस्य सूचितत्वात्. न च अनेन वाक्येन हरिप्रियाचार्याणां स्थूलदर्शित्वं शङ्क्यं, उत्तरायणस्य देवार्द्धरात्रत्वेन तत्र सूर्यसंक्रमे दैवादिशुभकार्यस्य दर्शनात् सूर्यस्य उदयकरकपाले प्राप्तौ उदयोद्योगात् तस्य विद्धत्वे दैत्यबलसम्भवेन सूक्ष्मेक्षिकया तैः तत्यागस्य आदरणात्. साम्प्रतं तु युगस्य आसुरत्वेन विष्णुधर्मोत्तरे कलौ वेधस्यैव त्याज्यत्वबोधनात् शौनकेनापि इदानीं तमेव आदाय तथाबोधनात् उभयत्रापि अदोषात्.

यत्तु. ''**अर्द्धरात्रे तु**'' इति वाक्यस्य

''**दशम्याः सङ्गदोषेण अर्द्धरात्रात्परेण तु,**
वर्जयेत् चतुरो यामान् संकल्पार्चनयोस्तदा,
विद्धोपवासेऽनश्नंस्तु दिनं त्यक्त्वा समाहितः,
रात्रौ संपूजयेद्विष्णुं संकल्पं च तदाऽऽचरेत्''

इति नारदीयवाक्यात् पूर्वचतुर्यामे व्रतसंकल्पपूजावर्जनार्थत्वम् उक्तम्. तदपि न रोचिष्णु, उक्तवाक्ये सङ्गदोषपदात्, सङ्गदोषस्य च पञ्चाशता भवनात् अर्द्धरात्रात् परेण इत्यनेन तस्य अत्र विवरणाच्च. ''**प्रारम्भोवरणं यज्ञे संकल्पो व्रतसत्रयोः**'' इति वाक्यदर्शनात् संकल्पाकरणे तदानीं व्रतानारंभाद् यथेष्टचेष्टाप्रसक्तेश्च इति.

यत्तु पारिभाषिकसूर्योदयग्रहणे निशाप्रान्तयामार्द्धस्य तदानीं समाप्तौ तस्य कालस्य कुत्रापि अनिवेशः इति उक्तम्. तदपि न, प्रदोषस्य रजनीमुखत्ववत् प्रत्यूषस्य अहर्मुखत्वेन तत्र सुखेन अन्तर्भावात्. त्रियामा रात्रिः इति पक्षे प्रान्तार्द्धयामस्येव अस्यापि प्रत्यक्षरात्रावपि निवेशस्य शक्यवचनत्वाच्च. किञ्च प्रत्यक्षसूर्योदयग्रहणेऽपि मदनरत्न

''**आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता,**
एकादशी तु सम्पूर्णा विद्धाऽन्या परिकीर्तिता''

इति मुहूर्त्तद्वयस्य अरुणोदयत्वसूचनात्. ''**लघूनि वै समान्माता दश पञ्च च नाडिकाः, ते द्वे मुहूर्त्त**'' इति तृतीयस्कन्धे नाडिकाद्वयस्य मुहूर्त्तत्वकथनात् चतुर्द्दण्डा-

त्मकएव अरुणोदयो युक्तो न तु यामार्द्धरूपः, तस्य अनियतत्वेन सर्वदा मुहूर्त्तद्वयवाक्य-विरुद्धत्वात्. यामार्द्धवाक्यस्य तदुक्त-कर्माङ्गभूतारुणोदयमात्र-प्रतिपादनेनापि सावकाशत्वात् चतुर्दण्डादिवाक्यस्य एकादशीप्रकरणस्थत्वाच्च तदादरस्यैव औचित्यात्. पञ्चदशैव दिनादिमुहूर्ता इति पक्षेपि अरुणोदयावधावेव विवादो नतु माने. अवधिस्तु वाक्यप्राप्तत्वाद् न प्रतिक्षेपार्हः इति अतोऽपि न दोषः.

किञ्च, ''**अरुणोदयवेलायां दर्शागन्धो भवेत् यदि**'' इत्यादौ 'वेला'पदाद् वेलायाश्च ततः पूर्वकारएव व्यवहारदर्शनात् गन्धस्य च सन्निधौ व्यवहारदर्शनात् प्रत्यक्षसूर्योदयम् आदायापि चतुर्द्दण्डाद्यन्यतमारुणोदयग्रहणे अरुणोदयवेलादशमी-गन्धसम्बन्धेनापि घटिकामात्रं त्याज्यमेव इत्यपि ज्ञेयम्. तस्माद् अस्मदुक्तएव पक्षो न अन्यः इति निश्चयः.

एवं च विष्णुधर्मोत्तरीयवाक्यमपि ''**शल्ये पञ्च तथा वेधे**'' इति वेधेऽपि पञ्चघटिका अतिदिशत् 'षट्पञ्चाशता वेधः' इति च वदद् वेधस्य द्वैविध्यं व्यनक्ति इति बोध्यम्. तेन यथाधिकारं यथाशिष्टाचारं च व्यवस्थितिः भवति.

किञ्च, ''**कामविध्वंसिनी शल्या विद्धा मोक्षविघातिनी**'' इति विष्णुधर्मवाक्यादपि पाक्षिकविद्धात्यागः उचितएव इति निगूढाशयः. किञ्च एवं ''**विष्णुधर्मेषु सर्वेषु ग्राह्या आर्योद्भवा तिथिः**'' इत्यपि संगृहीतं भवति. ''**विवादेषु च सर्वेषु द्वादश्यां समुपोषणम्**'' ''**सन्दिग्धैकादशी यत्र द्वादश्यां समुपोषणम्**'' इत्यादीनामपि संग्रहो भवति इति ज्ञेयम्. विंशतिदोषशोधनमपि युगान्तरीयत्वेनैव फलति इति न अत्र विशेषतो निरूप्यते.

अन्ये एकादशीवेधाः.

कदाचित्तु वेधाभावेपि एकादशीत्यागः तथासति यदा उपवासः तदैव उत्थापनं कार्यम्, द्वादश्यामपि विधानात्. त्यागनिमित्तानि तु प्रोक्तानि. तथा हि. तत्र एकादश्याधिक्ये नारदः

''सम्पूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी,
द्वादश्यां लङ्घनं कार्यं त्रयोदश्यां तु पारणम्''

इति. मार्कण्डेयेऽपि

''सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा,
पूर्वाम् उपवसेत् कामी निष्कामस्तूत्तरां वसेत्''

इति. द्वादश्याधिक्ये तु गारुडे

''पूर्णा भवेत् यदा नन्दा भद्रा चैव विवर्द्धते,
तदोपोष्या तु भद्रा स्यात् तिथिवृद्धिः प्रशस्यते''

इति. स्कान्देपि

''एकादशी भवेत् पूर्णा परतो द्वादशी यदा,
तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्''

इति. उभयाधिक्ये तु भृगुः आह

''सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा,
तत्रोपोष्या द्वितीया तु परतो द्वादशी यदि'' इति.

(किञ्च एताएव उन्मीलिनीत्यादिसञ्ज्ञाः प्राप्नुवन्तीति प्रसङ्गात् ता अपि विचार्यन्ते[१]. यतः पातिव्रत्यव्रतानां विष्णुपञ्चकव्रतम् आवश्यकम्. तदुक्तं पाद्मोत्तरखण्डे द्वारकामाहात्म्यसमाप्तौ

''गोविन्दं परमानन्दं माधवं मधुसूदनम्,
त्यक्त्वा नैव विजानाति पातिव्रत्यव्रतः स च,
कृष्णजन्माष्टमी रामनवम्येकादशीव्रतम्,
वामनद्वादशी तद्वत् नृहरेस्तु चतुर्दशी,
विष्णुपञ्चकम् इत्येवं व्रतं सर्वाघनाशनम्,
नित्यं नैमित्तिकं काम्यं विष्णुपञ्चकमेव हि,
न त्याज्यं सर्वथा प्राज्ञैः अनित्यं सर्वथा वपुः''

इति पातिव्रत्यव्रतम् उपक्रम्य सावधारणं तदत्यागकथनात्. यद्यपि अत्र **''नित्यं नैमितिकं काम्यम्''** इति विष्णुपञ्चकविशेषणत्वेन प्रतीयते तथापि त्रिविधैकादशी-व्रतकथासमाप्तौ

''नित्यं नैमित्तिकं काम्यं त्रिविधैकादशीव्रतम्,
नित्यं प्रावाहिकं पुण्यं नैमित्यम् अभयाव्रतम्,
काम्यम् अष्टदिनं प्रोक्तं जलादि कथितं हि मे''

इति उपसंहारवाक्याद् एकादशीविशेषणमेव ज्ञेयम्. तत्र अरुणोदये दशमीवेधरहितं 'प्रावाहिक'पदेन उच्यते इति पूर्वग्रन्थाद् अवगम्यते. तत्र एकादशीव्रते अरुणोदयवेधं दुष्टत्वेन उक्त्वा

‘‘शुक्रेण मोहिताः सर्वे दैत्यानां विजयाय च,
अतो विद्धं प्रकुर्वन्ति वासरं विष्णुदैवतम्,
यमविद्धं व्रतं त्याज्यं सर्वथा मोक्षकाङ्क्षिभिः’’

इति कथनात्. तच्च उपवासव्रतम् एकदिनसाध्यमेव. अभयैकादशीव्रतं तु दिनत्रयसाध्यम्. क्वचित्तु ‘उभये’ति पाठः. तच्च पूजाप्रधानकं, दशम्यादिदिनत्रयनियमान् उक्त्वा मार्गशीर्षशुक्लैकादशीम् आरभ्य यावद्वर्षं तत्पूजाविधानं च उक्त्वा **‘‘एवम् एकादशीपूजाव्रतं कुर्वन्ति ये नराः, चतुर्वर्गफलं तेषां प्रददाति हरिः स्वयम्’’** इति उपसंहारात्. उपवासस्तु नित्यो अनुक्तसिद्धोऽपि एतदङ्गत्वेन अनुक्तत्वाद् अङ्गतां न तेन रूपेण प्राप्नोति. अष्टवासरव्रतं तु उपवासपूजाप्रधानकम्. उभयोः तत्र विधानदर्शनात्. तत्स्वरूपं तु तत्रैव उक्तम्.

[कठिनांशटिप्पणी: १.इत आरभ्य ‘अथ प्रकृतमेवानुसरामः’ इत्यन्तो ग्रन्थो रचयितृचरणैर्वर्धितः.]

एकादशीनामभेदाः.

‘‘अथाष्टवासरं वक्ष्ये व्रतं पापप्रणाशनम्,
जया च विजया चैव जयन्ती पापनाशिनी,
उन्मीलनी व्यञ्जुलिनी त्रिस्पृशा पक्षवर्द्धिनी,
पुनर्वसौ ‘जया’ नाम श्रवणे ‘विजया’ मता,
‘जयन्ती’ रोहिणीयुक्ता पुष्ये ‘पापप्रणाशिनी’,
सम्पूर्णैकादशी भूत्वा द्वितीयेऽहनि वर्द्धते,
‘उन्मीलिनी’ समाख्याता पापपङ्कौघनाशिनी,
द्वादश्याम् उपवासश्च द्वादश्यां चैव पारणम्,
‘व्यञ्जुली’ नाम सा प्रोक्ता हत्यायुतविनाशिनी,
आदावेकादशी स्वल्पा ततोपि द्वादशी भवेत्,
त्रयोदशी दिनान्ते च ‘त्रिस्पृशा’ सा हरेः प्रिया,
पूर्णमासी यदा शुक्ले वर्द्धते प्रतिपद्दिने,
कृष्णपक्षे तथा दर्शः कलया वर्द्धते यदि,
‘पक्षवर्द्धिनी’ सा प्रोक्ता सर्वाशुभहरा स्मृता’’ इति.

तत्र जया-जयन्ती-पापनाशिनीषु अविद्धात्वमात्रम् अपेक्षितं, तत्कथासु विद्धात्यागमात्रस्यैव दर्शनात्. विजयायान्तु

‘‘शुक्ले वाऽसितपक्षे वा यदा श्रवणयोगिनी,

विजयैकादशी नाम सर्वाशुभनिवारिणी,
शुद्धाम् एकादशीं त्यक्त्वा श्रवणैकादशीव्रतम्,
कार्यं व्रतोत्तमं धीमन् मासे यत्र भवेद् इदम्''

इति विशेषवाक्याद् अविद्धायाअपि त्यागः. यद्यपि एवं तथापि नित्यव्रतकर्तॄणां प्रथमायां श्रवणयोगेपि द्वितीयैव आवश्यकी, ''निष्कामस्तूत्तरां वसेत्'' इति पूर्वोक्त-मार्कण्डेयवाक्यात्. एवमेव उन्मीलिन्यामपि पञ्चपञ्चाशद्वेधिनां तु निष्कामत्व-विद्धात्वाभ्यां पूर्वात्यागः इति विशेषः.

व्यञ्जुल्यास्तु काम्यत्वात् पूर्वोक्तगारुड-स्कान्दयोः अशक्तपरत्वेनापि व्यवस्थापितुं शक्यत्वात् च अविद्धात्यागो यद्यपि न आयाति, तथापि पाद्मोत्तरखण्डे एकादशीद्वादश्योः माहात्म्ये विधाने च पार्वत्या पृष्टे ''**शृणु देवि प्रवक्ष्यामि**'' इत्यादिभिः ''**एकादश्यां न भुञ्जीत**'' इत्यन्तैः एकादशीव्रतनित्यत्वं प्रतिपाद्य ततः तद्विधानकथनप्रस्तावे

''**तस्माद् एकादशीं शुद्धाम् उपवासं समाचरेत्,**
दशमीमिश्रितां तां तु प्रयत्नेन विवर्जयेत्,
अरुणोदयवेलायां दशमीमिश्रिता भवेत्,
तां त्यक्त्वा द्वादशीं शुद्धाम् उपोषेद् अविचारयन्''

इति विद्धात्याग-शुद्धोपवासौ विधाय अग्रे

''**कलायाम् अनुसम्प्राप्ते सूर्यस्योदयनं प्रति,**
त्रयोदश्यां तया देवि द्वादशी परिविद्यते,
तथापि द्वादशीं शुद्धाम् उपवासो विधीयते,
अरुणोदयवेलायां कृत्यं सर्वं समाचरेत्,
कलायामपि द्वादश्यां पारणं तत्र चोदितम्,
शुद्धाम् एकादशीं वापि त्यजेत् तत्र न संशयः,
कलाप्येकादशी यत्र द्वादशीम् उदिते रवौ,
सर्वाम् एकादशीं त्यक्त्वा तत्रैवोपवसेद् द्विजः,
एवं विधिं विनिश्चित्य समुपोष्यं हरेर्दिनम्''

इति शिवेन 'कलायाम्' इत्यादिभिः 'न संशयः' इत्यन्तैः द्वादश्याधिक्ये 'कलाप्येकादशी' इत्यनेन एकादश्याधिक्ये च द्वादश्यात्मकस्यैव व्रतकालस्वरूपस्य एकादशीत्यागकथनपूर्वकं निर्णीतत्वात् उन्मीलिन्यामिव व्यञ्जुल्यामपि कालत्वाभावादेव त्यागः. न च श्रीमदाचार्यचरणोक्तिविरोधः. तस्याः पञ्चपञ्चाशद्विद्धात्यागमात्रपरत्वात्.

प्रतिज्ञावाक्यस्य प्रसिद्धारुणोदयवेधरहितधर्मसंग्राहकत्वेनैव सार्थक्याच्च. एवं च ''**अविद्धापि च विद्धास्यात् परतो द्वादशी यदि**'' इति हेमाद्रिस्थपाद्मस्यापि संग्रहः.

त्रिस्पृशा तु पूर्वोक्तरूपैव कार्या. न च ''**विद्धाप्यविद्धा विज्ञेया परतो द्वादशी न चेद्**'' इति पूर्वार्द्धात् त्रिस्पृशायां विद्धाग्रहणं शंक्यम्. पाद्मे जाह्नव्या

''**दशम्येकादशी भद्रा दिनैकस्मिन् यदा भवेत्,**
त्रिस्पृशा सा भवेद् देव न वेद्मि वद मे प्रभो''

इति पृष्टे

''**आसुरी त्रिस्पृशा देवि या त्वया परिकीर्तिता,**
वर्जनीया प्रयत्नेन वृषहीनो यथा पतिः''

इति प्राचीमाधवेन तस्या आसुरीत्वकथनात्. विद्धाग्रहणस्य माधवेन स्मार्त्तपरताङ्गीकाराच्च. हेमाद्रिणाऽपि

''**एकादशी द्वादशी च रात्रिशेषे त्रयोदशी,**
त्रिभिः मिश्रा तिथिः प्रोक्ता सर्वपापहरा शुभा,
तदोपवासः कर्त्तव्यो विष्णुसायुज्यम् आप्नुयात्,
उपवासः कृतः तत्र मोक्षमेव प्रयच्छति''

इति वाक्ये पापक्षयार्थि–मोक्षार्थि–विष्णुभक्तानां तस्याएव ग्राह्यत्व–व्यवस्थापनात्. ''**एकादशी द्वादशी च रात्रिशेषे त्रयोदशी, उपवासं न कुर्वीत पुत्रपौत्र–समन्वितः**'' इति वाक्यस्य पापक्षयार्थ्यादि–व्यतिरिक्त–गृहस्थपरत्व–व्यवस्थापनेन पूर्वोक्तवाक्य–पूर्वार्द्धस्यापि तत्परत्वावसायात् च इति दिक्.

पक्षवर्द्धिन्यास्तु स्वरूपं पूर्वं सामान्यत उक्तमपि कथोपसंहारे

''**अमा वा यदि वा पूर्णमासी पूर्णा भवेद् यदा,**
भूत्वा तु षष्टिघटिका वर्द्धते प्रतिपद्दिने,
प्रतिपदं समारभ्य यावद् भवति द्वादशी,
तावद् वृद्धिं समायाति सा भवेत् पक्षवर्द्धिनी''

इति विशेष्योक्तम्. तेन न पूर्वपक्षान्त्यवृद्धिमात्रेण सा इति फलति. हरिवल्लभसुधोदये तु

''**पौर्णमासी यदा शुक्ले कृष्णे दर्शश्च वर्द्धते,**
भूत्वा तु षष्टिघटिका दृश्यते प्रतिपद्दिने,
षडहं शोधयेत् प्राज्ञः समुपोष्य हरेर्दिनम्,

कुलकोटिं समुद्धृत्य नरकाद् व्रजते दिवि,
पर्वाच्युतनगद्वृद्धावीशदुर्गान्तकक्षये,
सम्पूर्णैकादशीं त्यक्त्वा द्वादशीं समुपोषयेद्''

इति पाद्मवचनम् एतद्व्रतकथायाम् उक्तम्. तत्र पर्व प्रसिद्धमेव. अच्युतो द्वादशी, जगद् एकादशी, विश्वेदेवदेवताकत्वात्. ईशदुर्गान्तकाः अष्टमीनवमीदशम्यः. पाद्मोत्तरखण्डे भगवदर्जुनसंवादे तु भगवता स्वरूपान्तराण्यपि उक्तानि

''पुरा चैवावसाने च तिथिनां समता भवेत्,
चतस्रस्तिथयो वृद्धाः प्रत्येकं दशमीमुखाः,
घटिकार्द्धं तु दशमी हरेः स्यात् सार्द्धनाडिका,
सार्द्धत्रयं भवेत् चान्या कामस्तदधिका भवेत्,
एवं वृद्धिसमायुक्ता प्रोच्यते पक्षवर्द्धिनी।।१।।
प्राक् समा दशमी यावत् शेषा वृद्धिसमागताः,
परिवृद्धा हि यास्तासां सा ग्राह्या पक्षवर्द्धिनी।।२।।
यस्मिन् पक्षे हि तिथयो वृद्धिं यातास्तु षोडश,
तासां षोडशमी ग्राह्या सर्वसिद्धिप्रदायिनी।।३।।
चन्द्रवृद्धौ तु यो वृद्धः पक्षः पापप्रणाशनः,
तस्मिन् वृद्धिम् उपेता या सा प्रोक्ता पक्षवर्द्धिनी।।४।।

इति.

एवं षोढा भवति.

१. अमा वा पूर्णिमा वा वृद्धा प्रतिपदं स्पृशति ततो द्वादश्यन्तं वृद्धौ प्रथमा.
२. अमा पूर्णिमा वा वृद्धा प्रतिपदं स्पृशति ततो अष्टम्यादित्रयक्षये एकादशीद्वादश्योः वृद्धिः तदा द्वितीया.
३. प्रतिपदम् आरभ्य नवम्यन्ताः समाः दशम्या अर्द्धघटिवृद्धिः एकादश्याः सार्द्धघटिका, द्वादश्याः सार्धत्रिघटिका, त्रयोदश्याः तदधिका तदा तृतीया.
४. प्रतिपदम् आरभ्य दशम्यन्ताः समाः एकादशीम् आरभ्य वृद्धाः तदा तुरीया.
५. प्रतिपदम् आरभ्य षोडशानां वृद्धौ या दशमी वेधरहिता सा पञ्चमी.
६. द्वितीयाम् आरभ्य वृद्धे पक्षे या वर्द्धते सा षष्ठी.

एते च पक्षा अस्मिन् कल्पे न सम्भवन्ति इति ज्योतिर्विद आहुः, तत्र एषा उपपत्तिः. सूर्याचन्द्रमसोः द्वादशद्वादशांशान्तरेण तिथिः एकैकोत्पद्यते. तयोः

स्पष्टगत्यन्तरस्य अमान्तात् अमान्तात्मकचान्द्रे भगणैकभोगसत्वात्. तिथेः वृद्धिह्रासौ तु पुष्पवतोः गत्यन्तरभेदेन. तथा हि. एकस्मिन् सावने यदा द्वादशांशकलाप्रमाणं खाश्विशैलात्मकं ७२० गत्यन्तरं तदा तिथिसाम्यम्. यदा खाश्विशैलकलातो अन्तरं न्यूनम्, तदा न साम्यम्. सावनैककालेन चान्द्रैकत्त्वे उत्पन्नत्वाभावात्. किन्तु. किञ्चिदधिक-सावनघटीयुक्त-सावनैकदिनेन तद्भोगः. एवं तिथिवृद्धिः.

यदा तु खाश्विशैलकलातो अन्तरम् अधिकं तदा तिथिह्रास इति बोध्यम्. अत्र अनुपाताः. यदि एतावतीभिः गत्यन्तरकलाभिः सावनाः षष्टिघट्यः तदा खाश्विशैलकलाभिः का इति. यथा सूर्यगतिः ५९, ८ चन्द्रगतिः ७९०, ३५ एतयो गत्यन्तरम् ७३१, २७ अनयोः एतावत्यां सावनैकदिनैकदिने गत्यां चान्द्रदिनम् एकं काश्चिद् घट्यश्च जाताः. गत्यन्तरविकलाभाजकः षष्टिघटिकाया द्वादशांश-विकलागुणकः न्यासो यथा ४३८८७ प्रमाणम्. ६० फलम्. ४३२०० इच्छागुणितफलप्रमाणेन भक्तं लब्धम् इच्छायाः फलम्. एवं प्रत्यहं गत्योः विसदृशत्वेन गत्यन्तरस्य विसदृशत्वाद् न साम्यम्. गतिफलं तु उच्चतुल्ये ग्रहे परमम्. तत्र अपचीयमानम् ऋणात्मकं प्रथमपदे. उपचीयमानं धनात्मकं च द्वितीयपदे. तृतीयपदे तु अपचीयमानं धनात्मकम्. चतुर्थपदे तु उपचीयमानम् ऋणात्मकम्. एवं कर्कादिकेन्द्रे धनं मृगादिकेन्द्रऋणम् इति सिद्धम्. स्फुटम् इदं मध्यकक्षायां प्रतिमण्डलतो रेखान्तरं न्यूनम् अधिकं च भंग्यां दृश्यते. एवं चन्द्रस्य इदं सर्वमपि मासमध्ये सम्भवति. एवं मासे-मासे तिथेः वृद्धित्वं पुनः ह्रासत्वं च सम्भवति. एवं प्रायो दशैकादशदिनपर्यन्तं तिथेः वृद्धित्वं प्राप्य किञ्चिद्घटिकामात्रेण दिनद्वयं साम्यं भूत्वा ह्रासप्राप्तिः. ह्रासताऽपि प्रायः पञ्चदशदिनपर्यन्तम्. पुनः तथैव साम्यं भूत्वा वृद्धिः. यद्यपि अत्र सूर्यमन्दोच्चस्य कालान्तरे भेदो भविष्यति तथापि सूर्यस्य गतिस्वल्पत्वेन न किञ्चिद् बाधकम्. सर्वम् इदं स्फुटतरं सिद्धान्तज्ञज्योतिर्विदाम्. एवं कदाचिदपि नवदशतिथीनां साम्यं तिथिचतुष्टयस्यैव वृद्धिः, पुनः पक्षावसाने साम्यम्. तथा च. षोडशतिथीनां वृद्धिः इत्यादिकं न उत्पद्यते. पुराणप्रोक्तत्वात् कल्पान्तरे तु अस्तु. अस्मिन् कल्पे तु न. अलं भूयसा इति.

मतान्तराणि.

स्मृतिकौस्तुभ-कालतत्वविवेककारादयस्तु ब्रह्मवैवर्तवचनानि उपन्यस्य तत्र द्वादशीम् उपक्रम्य जयादिभेदानां कथनात् द्वादशीविशेषत्वम् एतासाम् इच्छन्ति. नृसिंह-परिचर्याकारस्तु द्वादशीव्रतत्वम् अङ्गीकुर्वन्

''न करिष्यन्ति ये लोके द्वादश्योऽष्टौ ममाज्ञया,

तेषां यमपुरे वासो यावदाभूतसम्प्लवम्''

इति हिरण्याक्षवधाय प्रार्थितस्य भगवतो मार्कण्डेयं प्रति उक्तेन अष्टमहा-द्वादशीसाधारणेन पाद्मवाक्येन नित्यत्वमपि इच्छति.

वयन्तु पूर्वोक्तपाद्मसन्दर्भे त्रिविधैकादशीविशिष्टविष्णुपञ्चकस्य सावधारणं सर्वथा अत्याज्यत्वकथनाद् अष्टवासरव्रतस्य काम्यत्वकथनाच्च जयादिषु उक्तस्य फलस्य कामनायां सत्यां पातिव्रत्यव्रतिना तादृशफलार्थम् अष्टवासरव्रतं त्यक्त्वा अन्यस्य करणे त्यागनिषेधोल्लङ्घनात् समुच्चयेन करणे अवधारणोल्लङ्घनाच्च प्रत्यवाय:. पातिव्रत्यव्रतभङ्गश्च भवति, न तु कामनाया अभावेऽपि त्यागः इति सिध्यति. अन्यथा काम्यतोक्तिवैयर्थ्यापत्ते:. तेन तादृक्कामनासत्त्वएव नित्यत्वं नतु प्रावाहिकव्रतवद् इति वदाम:.

किञ्च ज्ञानाज्ञानादिना पापसम्भवे विद्धैकादश्युपोषणादौ च प्रायश्चित्तम् आवश्यकम्. तत्र व्यञ्जुल्यां 'हत्यायुतविनाशिनी' इत्यादि कथनात् पञ्चसूनाऽपनोदक-वैश्वदेववदपि कर्त्तव्यता.

''हत्या नश्यति काश्यां तु गयायां पैतृकम् ऋणम्,

दशमीवेधजं पापं न काश्यां न गयापुरे,

दशमीवेधजं पापं व्यपोहयति व्यञ्जुली,

तत्र युक्तो महीपाल पुनर्न कुरुते यदि,

दशमीवेधजं विष्णोर्वासरं हरिवल्लभम्,

दिनं तदा व्युञ्जुली च पूर्वपापं व्यपोहति''

इत्यादिवाक्यैश्च तथा इति प्रासङ्गिकम् एतद् उक्तम्.

अथ प्रकृतमेव अनुसराम:.

प्रबोधिन्यां जागरणम् आवश्यकम्.

''प्रबोधिनीं नर: कृत्वा जागरेण समन्विताम्,

न मातुर्जठरे याति अपि पापान्वितो नर:''

इति हेमाद्रौ नारदीयात्. **''इदं च मलमासेपि कार्यम्''** इति उक्तं दिनकरोद्द्योते. मलमासो अत्रांहस्पतिरेव प्रायो ज्ञेय:. जागरणदिनस्थितं शृङ्गारादिकं द्वितीयदिवसे अवश्यं

स्थापनीयम्. तदुक्तं हरिवल्लभसुधोदये नृसिंहपरिचर्यायाम्

''श्रीविष्णोर्जागरे पूजां यो नरो द्वादशीदिने,
तामेवोत्तारयेत् तार्क्ष्य स याति नरकं ध्रुवम्,
एकादश्यां कृतां पूजां यो मूढः काममोहितः,
द्वादश्यां तु वृथा कुर्यात् स पापी नरकं व्रजेद्'' इति.

अथ पारणाविचारः.

हेमाद्रौ भविष्ये,

''आभाकासितपक्षस्य मैत्रश्रावणरेवती,
संगमे नैव भोक्तव्यं द्वादशद्वादशीर्हरेद्'' इति.

तत्रैव विष्णुधर्मे

''मैत्राद्यपादे स्वपितीह विष्णुः पौष्णान्त्यपादे प्रतिबोधमेति,
श्रुतेश्च मध्ये परिवृत्तिमेति सुप्तिप्रबोधपरिवर्त्तनमेव वर्ज्यम्'' इति.

एवं च भविष्यवाक्यस्य विष्णुधर्मवाक्येन उपसंहाराद् न सर्वनक्षत्रनिषेधः किन्तु तत्तदाद्यपादादिनिषेधः. 'मध्य'शब्दश्च द्वितीयतृतीयपादपरो मध्यमविंशतिदण्डपरो वा'' इति दिनकरोद्द्योतः. तत्रापि इदं ध्येयं, यदि विद्धाधिकाद्वादशी प्रथमं क्षीयते, ऋक्षान्त्यपादश्च अनुवर्त्तते, तदा द्वादशीयुतत्रयोदश्यां पारणनिषेधस्य जागरूकत्वाद् द्वादशीमध्ये अद्भिः पारणीयम्. **''आपो वा अशितम् अनशितं च''** इति श्रुतेः. यदापि युगपद् उभयोः क्षयः तदापि इयमेव व्यवस्था. त्रयोदश्यां पारणनिषेधश्च कौर्मे मात्स्ये च

''एकादशीम् उपोष्यैव द्वादश्यां पारणं स्मृतम्,
त्रयोदश्यां न तत्कुर्यात् द्वादशद्वादशीक्षयात्''

इति. त्रयोदश्याम् इति द्वादशीविद्धत्रयोदश्याम्. अन्यथा

''त्रयोदश्यां तु शुद्धायां पारणे पृथिवीफलम्,
शतयज्ञाधिकं वा यो नरः प्राप्नोत्यसंशयम्''

इति नारदीयस्य,

''एकादशी कलां प्राप्ता येन द्वादश्युपोषिता,
पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणम्''

इति विष्णुरहस्यस्य,

''द्वादश्यैकादशी यत्र तत्र सन्निहितो हरिः,
तत्र क्रतुशतं पुण्यं द्वादश्यां पारणे कृते,
एकादशीव्रते यत्र परतो द्वादशी मता,

तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणे,
दशम्यैकादशीमिश्रा नोपोष्या नरकप्रदा''

इति आग्नेयस्यापि विरोधापाताद् इति. इति कार्त्तिकोत्सवाः.

अथ मार्गशीर्षमासोत्सवाः.

प्रावरणोत्सवः

मार्गशीर्षे तु

''मार्गशीर्षे शुभे पक्षे षष्ठ्यां प्रावरणोत्सवम्,
कृत्वा दृष्ट्वा नरो भक्त्या वैष्णवं लोकमाप्नुयाद्''

इत्यादिना स्कान्दे प्रावरणोत्सवो विहितः. स च शीतबाहुल्याद् देशान्तरे प्रबोधिन्यामेव विधीयते इति न कोपि विचारः.

श्रीमत्प्रभूणाम् उत्सवः

पौषकृष्णनवम्यां श्रीमत्प्रभूणाम् उत्सवः. स च औदयिक्यामेव कार्यः. विद्धाक्षये तु विद्धायामेव. एतत्करणावश्यकत्वं तु श्रीमदाचार्योत्सवे विवेचनीयम्.

अथ माघोत्सवाः.

तत्र तावद् मकरसंक्रमे पर्वात्मकः उत्सवः कार्यः. तदुक्तं स्कान्दे पुरुषोत्तममाहात्म्ये

''मृगराशिं संक्रमति यदा भास्वान् द्विजोत्तमाः,
उत्तराशां जिगमिषुः तदा स्याद् उत्तरायणम्,
तस्य संक्रमणाद् ऊर्ध्वं यावत् स्याद् विंशतिः कलाः,
महापुण्यतमः कालः पितृदेवद्विजप्रियः,
तत्र स्नात्वा विधानेन तीर्थराजजले नरः,
नारायणं समभ्यर्च्य कल्पवृक्षं प्रणम्य च''

इत्याद्युक्त्वा **''दृष्ट्वोत्तरायणे देवं देहबन्धाद् विमुच्यते''** इति. अत्र च पुण्यकालएव पूजाकालः इति तेनैव निर्णयः. एतेनैव मेषसङ्क्रमोऽपि व्याख्यातो[1] ज्ञेयः[2].

(१.अत्रापि मेषसंक्रमणे यः पुण्यकालः स एव पूजाभोगसमर्पणकालः. स तु प्राक् पश्चाच्च दश-दश

नाड्य:. तदाह वशिष्ठ:. वर्तमाने तुलामेषे नाड्यस्तु उभयतो दशेति. तत्रापि या:-या: संनिहिता नाड्यस्तास्ता: पुण्यतमा मता इति संक्रमणसन्निहितास्तास्ता ग्राह्या इति निर्णय इति दिक्.
२.''वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश'', इति स कालो एव ग्राह्य:.)

वसन्तोत्सव:

माघशुक्लपञ्चम्यां वसन्तोत्सव:. तदुक्तं निर्णयामृते पुराणसमुच्चये,

''माघमासे नृपश्रेष्ठ शुक्लायां पञ्चमीतिथौ,
रति-कामौ तु संपूज्य कर्त्तव्य: सुमहोत्सव:,
दानानि च प्रदेयानि तेन तुष्यति माधव:''

इति. अत्र उत्सवादिना भगवत्तोषोक्तेः भगवदीयै: साक्षान्मन्मथमन्मथरूप: सलक्ष्मीको भगवानेव पूज्य:[१]. यद्यपि अत्र पूजोपकरणं न उक्तं, तथापि शिष्टा: दोलोत्सवस्थमेव गृह्णते, तच्च अग्रे विवेच्यम्. पूजाकालस्तु प्रातिस्विकवाक्ये अनुक्तत्वात् सामान्यवाक्योक्तएव. स च

''त्रेधा विभक्तदिवसे प्रात:काले सुरार्चनम्,
मध्याह्ने तीर्थकार्यं च सायं रक्षाकरी क्रिया''

इति दिनकरोद्योते हेमाद्रिस्थमहापञ्चरात्रोक्तेः मुहूर्त्तपञ्चकात्मक: पूर्वाह्णएव ग्राह्य:. नतु ''**पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथि:**'' इति बोधायनोक्तो मध्याह्न:. तत्र पूज्यानुल्लेखेन सन्दिग्धत्वाद्, अतिथ्यादिपूजादौ तस्य सावकाशत्वाच्च. तेन पूर्वोक्तपूर्वाह्णव्यापिनी तिथिः ग्राह्या. दिनद्वये तदेकदेशव्याप्तौ परैव. ''**देवकार्ये तिथिः ग्राह्या यस्याम् अभ्युदितो रवि:**'' इति, ''शुक्लपक्षे तिथिः ग्राह्या यस्याम् अभ्युदितो रवि:'' इति च वृद्धयाज्ञवल्क्य-मार्कण्डेययोः वचनात्. ''युग्माग्नियुगभूतानाम्'' इति निगमस्य युग्मवाक्यस्य

''प्रतिपत्पञ्चमी भूता सावित्रीवटपूर्णिमा,
नवमी दशमी चैव नोपोष्या परसंयुता''

इति ब्रह्मवैवर्तेन पूर्वसंयुतायाः उपवासविषयत्वावगमात्. यत्तु

''चतुर्थीसंयुता कार्या पञ्चमी परया न तु,
दैवे कर्मणि पित्ये च शुक्ले चैव तथा सिते''

इति वाक्यम् तदपि निर्णयसिन्धौ उपवासएव उपसंहृतम् इति पूर्वोक्तैव व्यवस्था. क्षये तु पूर्वैव, गत्यन्तराभावात्. पूर्णवृद्धौ तु पूर्वैव (''**यथा मलिम्लुच; पूर्वो दैवो मासः तथा उत्तर:. त्याज्या तिथिः तथा पूर्वा वृद्धौ ग्राह्या तथोत्तरा**'' इति वाक्यात्[२]).

''षष्टिदण्डात्मिकायास्तु तिथेर्निष्क्रमणं परे.

अकर्मण्यं तिथिमलं विद्यादेकादशीं विना''

इति ज्योतिर्निबन्धवाक्यात्. यदि च निर्णयसिन्धूक्तम् अनुपपन्नमिति 'कर्मणि' इति पदप्रयोगाद् भाति. तदा तु सुखेन पूर्वविद्धैव यथासम्भवं सदा [पा.भे.] कार्या.

इतः आरभ्य प्रत्यहं फाल्गुनोत्सवं कुर्वन्ति शिष्टाः.

वैधं तु

''फल्गूत्सवं[३] प्रकुर्वीत पञ्चाहानि त्यहानि वा,
फाल्गुन्याः पूर्वतो विप्राः''

इति स्कान्दे पुरुषोत्तममाहात्म्ये वचनात्. पञ्चाहं त्यहं वा बोध्यम्, तेन अशक्तौ तावत्तु कार्यमेव इति दिक्. इति माघोत्सवाः.

[(१.(दृष्टान्ते) वाराहे चातुर्मास्ये. ''तत्र कुर्वीत पञ्चम्यां नागानां पूजनं नरः. मत्पूजानन्तरं शेषं वासुकितक्षकादिकान्. पूजयेच्छर्कराक्षीरघृतपायससाधकैः. साक्षात् सङ्कर्षणात्माहं तत्पूजां स्वयमाददे'' इति तत्तत्पूजादिनेपि भगवत्पूजानन्तरं तत्पूजाबोधकन्यायाच्च.

२.असंगतं वाक्यमिदम्.

३.कार्तिकमाहात्म्ये अष्टाविंशे स्वसारूप्यादिकम् उक्त्वा उच्यते. ''तस्माद् देवि सदा कार्यं चातुर्मास्ये विशेषतः, इदं माहात्म्यमालोक्य यत्पूजां तनुयान्नरः'' इति पूजाविस्तारकथनात् तथा कुर्वन्तीत्यर्थः. अत एव ''यद् यद् इष्टतमं लोके'' इति भागवत इति. अयमेव न्यायः श्रावणमासे दोलोत्सवे ज्ञेयः.]

पा.भे. : ''सदा कार्या'' इत्यनन्तरम् ''अति वृद्धावपि पूर्ववद् इति'' इति ख-ग पुस्तके अधिकः उपलभ्यते.

अथ फाल्गुनोत्सवाः.

अथ फाल्गुनकृष्णसप्तम्यां श्रीमद्गोवर्द्धनोद्धरणागमनोत्सवः. स च भक्तिमार्गीयएव इति औदयिक्यामेव कार्यः, शिष्टाचारात्. क्षये तु तत्रैव, गत्यन्तर-विरहात्. वृद्धौ तु पूर्वैव, औचित्याद् इति.

अत्र फाल्गुनपूर्णिमायां पर्वात्मको होलिकोत्सवः.[१]

तत्र होलिकाप्रदीपनं भद्रां विहाय रात्रौ पूर्णमासीमध्ये कार्यम्

''तपस्ये पौर्णमास्यां तु रजन्यां होलिकोत्सवः''

इति भविष्यवाक्यात्.

''दिनार्द्धात् परतोऽपि स्यात् फाल्गुनीपूर्णिमा यदि,
रात्रौ भद्रावसाने तु होलिकां तत्र दीपयेत्''

इति भविष्योत्तराच्च.

''राकायाम् अद्वयात् ऊर्ध्वं चतुर्दश्यां यदा भवेत्,
होलां भद्रावसाने तु निशीथान्तेपि दीपयेत्''

इति पुराणसमुच्चयाच्च एतद्व्यतिरिक्तकाले होलादीपने दोषश्रवणाच्च.

तथा हि

''प्रतिपद्भूतभद्रासु याऽर्चिता होलिका दिवा,
संवत्सरं च तद्राष्ट्रं पुरं दहति सा द्रुतम्''

इति नारदवाक्यात्.

''भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा,
श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी'' इति.

''भद्रायां दीपिता होलि राष्ट्रभङ्गं करोति वै,
नगरस्य च नैवेष्टा तस्मात् तां परिवर्जयेत्''

इति पुराणसमुच्चयवाक्याच्च.

''नन्दायां नरकं घोरं भद्रायां देशनाशनम्,
दुर्भिक्षं च चतुर्दश्यां करोत्येव हुताशिनी''

इति ज्योतिर्निबन्धे विद्याविनोदाच्च.

''न कर्तव्यो दिवा विष्ट्यां रिक्तायां प्रतिपत्स्वपि''

इति भविष्याच्च.

''न दिवा पूजयेद् ढुण्ढां पूजिता दुःखदा भवेत्''

इति दिवोदासीयाच्च.

ननु नारदवाक्ये, **''प्रदोषव्यापिनी ग्राह्या पूर्णिमा फाल्गुनी सदा''** इति ग्रन्थान्तरे च. **''सायाह्ने होलिकां कुर्यात् पूर्वाह्णे क्रीडनं गवाम्''** इत्यादिवाक्येषु प्रदोषग्रहणात्.

''सार्द्धयामत्रयं वा स्याद् द्वितीयदिवसे यदा,
प्रतिपद्वर्द्धमाना तु तदा सा होलिका स्मृता''

इति भविष्यवचनादपि प्रदोषकालस्य अर्थादुपलब्धेश्च इति पूर्वेद्युः भद्रारहित–प्रदोषालाभे परेद्युः प्रदोषे कार्यम् इति चेद् न, एतद्वाक्यानां भिन्नविषयत्वात्. तथा हि,

नारदवाक्ये 'प्रदोषव्यापिनीम्' इति उक्त्या हि उदयव्यापिन्या अप्राशस्त्यम् उच्यते.

''श्रावणी दुर्गनवमी दूर्वा चैव हुताशिनी,
पूर्वविद्धैव कर्त्तव्या शिवरात्रिबलेर्दिनम्'' इत्यादेः.

''चतुर्दश्या च पूर्णिमा तिथ्योर्युग्मं महाफलम्,
एतद्व्यस्तं महादोषं हन्ति पुण्यं पुराकृतम्''

इति युग्मवाक्यस्य च अनङ्गीकारे महादोषश्रवणाच्च. सम्पूर्णरात्रौ भद्रारहित–पूर्णालाभे प्रदोषैकमुख्यकालज्ञापने एतद्वाक्यपर्यवसानाच्च. **''भद्रायां विहितं कार्यं होलिकायाः सपूजनम्''** इति. यच्च,

''मध्यरात्रम् अतिक्रम्य विष्टेः पुच्छं यदा भवेत्,
प्रदोषे ज्वालयेद् वह्निं सुखसौभाग्यदायकम्,
प्रदोषाद् मध्यरात्रान्तं होलिकापूजनं शुभम्''

इति च कैश्चिद् अलेखि, तद् अनाकरम् इति मयूखकारोक्तेश्च. कैश्चित् 'प्रदोष'शब्दस्य रजनीपरत्वेन व्याख्यातत्वाच्च. 'सार्द्धयाम' इति वाक्यस्य च अयं विषयः. तथा हि, फाल्गुनसितषष्ठ्यां प्रायो मीनार्के जाते समानत्वेन त्रिंशद्घटिकामित–दिवसे वर्तमाने चतुर्दश्या एकोनषष्टिघटिकात्मके सर्वभोगकाले. पूर्णायाः पञ्चपलोनषष्टिघटिकात्मके प्रतिपद एकषष्टिघटिकात्मके. सूर्योदयात् चतुर्दश्याः त्रिंशद्घटिकात्मके पूर्णायां च पञ्चपलोनत्रिंशद्घटिकात्मके भोग्यकाले हि इति. अन्यथा रात्रौ भद्रारहितपूर्णायाः लाभेऽपि तां विहाय वर्द्धमानप्रतिपदि होलादीपने **''वह्नौ वह्निं परित्यजेद्''** इति भविष्यद्वाक्यमपि विरुद्ध्येत. तु यदापूर्वदिने चतुर्दशी प्रदोषव्यापिनी परदिने च पूर्णिमा न्यूनवशात् प्रदोषात् प्रागेव समाप्यते, तदा पूर्वदिने सम्पूर्णरात्रौ भद्रासत्त्वाद् भद्रायां च होलिकानिषेधाद्, भद्रामुखं विहाय पूर्वदिनएव कार्यम्.

''प्रदोषव्यापिनी न स्याद् यदा पूर्वदिने तदा,
भद्रामुखं वर्जयित्वा होलिकायाः प्रदीपनम्''

इति नारदवचनात्.

''यामत्रयोर्ध्वयुक्ता चेत् प्रतिपत्तु भवेत् तिथिः,
भद्रामुखं परित्यज्य कार्या होला मनीषिभिः''

इति विद्याविनोदे अभिधानाच्च, भूतादिचतुष्टयव्यतिरिक्तकाले होलादीपनं कार्यम्. तदभावे तु प्रतिपद्वर्धगामिनी चेत् तदा अत्रैव. तदभावेऽपि भद्रामुखं विहाय रात्रावेव कार्यम् इति राद्धान्तः इति दिक्.

[कठिनांशटिप्पणी: १.असौ होलिकानिर्णयोऽधिगतेषु सर्वेषु पुस्तकेषु नास्ति. नाथद्वारीयमुद्रितपुस्तकम् अनुसृत्य मुद्रितो अत्र इति.]

अथ दोलोत्सवः.

फाल्गुनपौर्णमास्यां पूर्णिमासमीपे उत्तराफाल्गुन्यां वा दोलोत्सवः. तदुक्तं ब्रह्मपुराणे (ज्येष्ठीप्रशंसकाध्याये)

''नरो दोलायितं दृष्ट्वा गोविन्दं पुरुषोत्तमम्,
फाल्गुन्यां प्रयतो भूत्वा गोविन्दभुवनं व्रजेत्''

इति. स्कान्दे पुरुषोत्तममाहात्म्ये

''तपस्ये मासि राकायां यदोत्तराफाल्गुनी भवेत्,
तदा दोलोत्सवः कार्यः तच्च श्रीपुरुषोत्तमे''

इति. स्कान्दे पुरुषोत्तममाहात्म्ये.

''फाल्गुन्यां क्रीडनं कुर्याद् दोलायां मम भूमिप,
दोलायां येऽपि पश्यन्ति दक्षिणामुखपूजितम्,
ब्रह्महत्यादिभिः पापैः मुच्यन्ते नात्र संशयः''

इति. तथा तत्रैव अग्रे

''फाल्गुने मासि कुर्वीत दोलारोहणम् उत्तमम्,
यत्र क्रीडति गोविन्दो लोकानुग्रहणाय वै''

इति. अत्र अग्रे

''चतुर्दश्यां निशामुखे वह्न्युत्सवं प्रकुर्वीत''

इति उक्त्वा

''प्रातर्यामे चतुर्दश्यां गोविन्दप्रतिमां शुभाम्''

इत्यादिना प्रत्यर्चापूजनादिकं दोलासमीपनयनम्,

''फलपुष्पावनम्रैश्च शाखिभिः परिकल्पिते,
वृन्दावनान्तरे रम्ये मत्तभ्रमरचारिणि,
कोकिलारावमधुरे नानापक्षिगणाकुले,
नानोपशोभारचिते कालागुरुसुधूपिते''

इत्यादिना वृन्दावनकरणं, दोलायाञ्च भगवतः स्थापनम्. ततः,

''उपवेश्याथ गोविन्दं पूजयेद् उपचारकैः,
बल्लवीवृन्दमध्यस्थं कदम्बतरुमूलगम्,
हास्यलास्यविलासैश्च क्रीडमानं वनान्तरे,
गोपिकाभिश्च गोपालैः लीलां दोलितयानगम्,
चिन्तयित्वा जगन्नाथं विकिरेत् गन्धचूर्णकैः,
सकर्पूरैः पीतरक्त–शुक्लैः दिक्षु समन्ततः,

आन्दोलयेद् दोलिकायां सप्तवारान् शनैः–शनैः,
त्रिरेवं दोलयेत् देवं सर्वपापापनोदनम्,
भक्त्यानुग्राहकं पुंसां भुक्ति–मुक्त्येककारणम्,
लीलाविचेष्टितं यस्य प्रथमं सहजं तथा,
अहः सद्यः क्षयकरं मूलाविद्यानिवर्तकम्,
पश्यन् द्वितीयं हरति गोहत्याद्युपपातकम्,
क्षयन्त्यशेषपापानि तृतीये नात्रसंशयः''

इत्यादिना च प्रकारः फलं च उक्तम्. तेन अयमेव प्रकारः, कालश्च यामिन्याः पश्चिमयाम इति निश्चीयते. एवं सति पुराणभेदेन तिथिद्वयस्य उक्तत्वाद् 'राकायाम्' इति सामीप्यसप्तम्या च ''**फाल्गुने राकासमीपे यदा उत्तराफाल्गुनी तदा दोलोत्सवः कार्यः**'' इति वचनव्यक्तेश्च अपररात्रिव्यापिन्याम् उत्तराफाल्गुन्यां दोलोत्सवः कार्यः, नतु तिथौ आग्रहः कर्त्तव्यः. नक्षत्रप्राबल्यस्य विजयदशम्यां दर्शितत्वाद् इति. न च सामीप्यार्थे विनिगमनाविरहः[१]. फाल्गुन–चैत्रादिसञ्ज्ञानां तत्तन्नक्षत्रयुक्त–पौर्णमासीवत्ताप्रयुक्तत्वेऽपि तद्योगस्य अनियतत्वेन यदा तदभावः तदापि तन्मासव्यवहारो नक्षत्रस्य तिथिसामीप्यम् आदायैव क्रियते इति प्रकृते तद्ग्रहणे[२] दोषाभावात्. अतएव च 'मासादि'पदस्थसप्तमीषु न सो अर्थो गृह्यते इति न कोपि शङ्कालेशः इति दिक्.

[कठिनांशटिप्पणी: १.विनिगमनानियामकं तस्य विरहोऽभावः. २.सामीप्यग्रहणे.]

शिवरात्रिव्रतं वैष्णवानां कर्त्तव्यं न कर्त्तव्यं वा?

अथ अत्र प्रसङ्गाद् इदं विचार्यते. शिवरात्रिव्रतं वैष्णवानां कर्त्तव्यं न कर्त्तव्यं वा इति. तत्र तावत् माधवीये स्कान्दे

''परात्परतरं नास्ति शिवरात्रिः परात्परम्,
न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरम्,
जन्तुः जन्मसहस्रेषु भ्रमते नात्र संशयः''

इति अकरणे प्रत्यवायश्रुतेः.

''वर्षे–वर्षे महादेवि नरो नारी पतिव्रता,
शिवरात्रौ महादेवं नित्यं भक्त्या प्रपूजयेत्''

इति वीप्साश्रुतेः.

''अर्णवो यदि वा शुष्येत् क्षीयते हिमवानपि,

चलन्त्येते कदाचिद् वै निश्चलं हि शिवव्रतम्''

इति वचनाच्च सर्वेषां नित्यम् इति माधवनिर्णयसिन्धुप्रभृतयः.

दिनकरोद्द्योतस्तु

''वैष्णवो वाऽथ शैवो वा कुर्याद् एकादशीव्रतम्'',

''वैष्णवो वाऽथ शैवो वा सौरोप्येतत् समाचरेद्''

इति शिवधर्मोक्तसौरोक्तवचनवत् जन्माष्टमी–शिवरात्रि–विधायक–वाक्येषु विशेषवचनाभावाद् न सर्वेषां नित्यं, किन्तु केवलवैष्णवेभ्यो ये भिन्नाः तेषामेव नित्यम्, जन्माष्टमीव्रतं च शैवभिन्नानाम् इति आह.

नृसिंहपरिचर्यायां तु

''सौरो वा वैष्णवो वाऽन्यदेवतान्तरपूजकः,

न पूजाफलामाप्नोति शिवरात्रिबहिर्मुखः''

इति शिवद्वेषिवैष्णवस्य पदप्राप्तिनिषेधात्. तथा तादृशतत्पूजाया हरिणा अग्रहादिस्मरणाद् इति आदरेण शिष्टवैष्णवपरिग्रहाच्च सर्वैः अनुष्ठेयम् –इति आह.

माधवास्तु, शिवं जीवकोटौ गणयन्तीति व्रतं सुतरां न कुर्वन्ति, ये च कुर्वन्ति तेऽपि शिवान्तर्गतविष्णुं पूजयन्ति **''यास्त्वन्यदेवतिथयः तासु विष्णुं प्रपूजयेत्''** इति वराहोक्तेः इति च आहुः. तद् इदं सर्वम् असङ्गतम्. अहंकाराधिष्ठातुः जीवत्वेऽपि गुणावतारस्य ईश्वरकोटित्वात्. तथा हि, श्रीभागवते चतुर्थस्कन्धे

''शरणं तं प्रपद्ये अहं य एव जगदीश्वरः,

प्रजामात्मसमां मह्यं प्रयच्छत्विति चिन्तयन्''

इति मनसि अभिसन्धाय अत्रिणा प्रजार्थं तपःकरणे

''तप्यमानं त्रिभुवनं प्राणायामैधसाग्निना,

निर्गतेन मुनेः मूर्ध्नः समीक्ष्य प्रभवस्त्रयः,

अप्सरोमुनिगन्धर्व–विद्याधरमहोरगैः,

विगीयमानयशसः तदाश्रमपदं ययुः''

इत्यन्तेन.

''विश्वोद्भवस्थितिलयेषु विभज्यमानैः मायागुणैः अनुयुगं विगृहीतदेहाः,

ते ब्रह्मविष्णुगिरिशाः प्रणतोस्म्यहं वः तेभ्यः क एव भवतां म इहोपहूतः''

इति अत्रिस्तुत्यादिना च त्रयाणाम् ईश्वरत्वम् अवगम्यते. दशमस्कन्धेऽपि

‘‘**त्रिष्वधीशेषु**’’ इति उक्त्या च. द्वादशस्कन्धे, ‘‘**वरदेशा वयं त्रय:**’’ इति उक्त्या च. कूर्मपुराणे च ‘‘**लीलया परमेश्वरा:**’’ इति वचनाच्च. न च एवं सति अनेकेश्वरापत्तिः इति वाच्यम्, परात्परस्य कृष्णस्य भगवतः एकस्यैव ईश्वरेश्वरत्वात्. अतएव चतुर्थस्कन्धे दक्षाध्वरध्वंसोत्तरं ब्रह्मस्तुतौ

‘‘**जाने त्वामीशं विश्वस्य जगतो योनिबीजयो:,**
शक्ते: शिवस्य च परं यत्तद् ब्रह्म निरन्तरम्’’

इत्यादि पद्यद्वयेन शिवस्य परमशिवत्वम् उक्त्वा

‘‘**भवांस्तु पुंस: परमस्य मायया दुरन्तयाऽस्पृष्टमति: समस्तदृक्,**
तया हतात्मस्वनुकर्मचेत:स्वनुग्रहं कर्त्तुमिहार्हसि प्रभो’’

इति कथनात् परमशिवस्यापि परपुरुषानुगृहीतत्वमेव प्रतिपादितं, नतु परमपुरुषत्वम्. परमपुरुषस्य कृष्णत्वं ‘‘**कृषिर्भूवाचक:**’’ इत्यादिश्रुत्या ‘‘**त्वमेक आद्य: पुरुषो द्वितीयः तुर्य: स्वदृग्घेतुरहेतुरीश:**’’ इत्यादि श्रीभागवतवाक्यैः अवसेयम्. इदम् अत्र संक्षेपतो निरूपितम्. विशेषस्तु बालबोधटीकायां विवेच्य:, प्रहस्ते भिन्दिपाले विवेचितश्च. तस्माद् जीवत्वकथनम् अनुचितमेव. व्रतन्तु न कार्यमेव

‘‘**भवव्रतधरा ये च ये च तान् समनुव्रताः,**
पाषण्डिनस्ते भवन्तु सच्छास्त्रपरिपन्थिन:,
नष्टशौचा मूढधियो जटाभस्मास्थि धारिण:,
विशन्तु शिवदीक्षायां यत्र दैवं सुरासवम्,
ब्रह्म च ब्राह्मणांश्चैव यद्यूयं परिनिन्दथ,
सेतुं विधरणं पुंसाम् अतः पाषण्डमाश्रिता:,
एषएव हि लोकानां शिव: पन्था: सनातन:,
यं पूर्वे चानुसंतस्थुः यत्प्रमागं जनार्दन:,
तद्ब्रह्म परमं शुद्धं सतां वर्त्म सनातनम्,
विगर्ह्य यात पाषंड दैवं वो यत्र भूतराट्’’

इति श्रीभागवते चतुर्थस्कन्धे निन्दाश्रवणात्. न च व्रतविधायकवाक्यानाम् अनवकाशप्रसङ्ग:, तेषां शापपूर्वकालविषयत्वात्. अक्षतागोपश्वादिविधायकवाक्यवत्. न च ‘भवव्रत’शब्देन पाशुपतव्रतम् उच्यते इति वाच्यं, सङ्कोचे मानाभावात्. न च ‘सच्छास्त्रपरिपन्थिन:’ इति शप्तव्यविशेषणमेव मानम् इति वाच्यं, तस्य उत्तरावधिगमकत्वात्. अन्यथा, ‘‘**नष्टशौचा मूढधियो जटाभस्मास्थिधारिण:, विशन्तु शिवदीक्षायां यत्र दैवं सुरासवम्**’’ इत्यादि श्लोकत्रयोक्त-शापद्वयवैयर्थ्यापत्तिः. सच्छास्त्रपरिपन्थित्वेनैव सर्वसम्भवात्. अतः तस्य उत्तरावधिगमकत्वमेव. न च एवं

शिवद्वेषापत्तिः, अनुवादित्वात्. अतएव

‘‘**परात्परतरं यान्ति नारायणपरायणाः,**

न ते तत्र गमिष्यन्ति ये द्विषन्ति महेश्वरम्’’

इति वाक्योक्तदोषोपि न. अतो व्रताकरणं व्रतस्य निषिद्धत्वादेव नतु शिवद्वेषात्, जैनमन्दिरप्रवेशवत्. अन्यथा जिनस्यापि अवतारत्वेन तन्मन्दिरप्रवशेऽपि दोषानुत्पत्ति-प्रसङ्गः. तस्माद् भगवान् शिवो अवतारत्वाद् वैष्णवधर्मोपदेष्टृत्वाद् वेदरूपत्वात् सर्वविद्येश्वरत्वात् सर्वदेहीशानत्वाच्च नमस्यएव मान्यएव. व्रतन्तु निन्दितत्वादेव अकरणीयम् इति दिक्.

अथ प्रसङ्गाद् इदम् उच्यते.

उपरागे सम्भवति भोगसमर्पणादिकं कथं कार्यम् इति. तत्र, स्वमार्गे स्नेहस्य प्राधान्याद् यो बालेषु न्यायः सः आदर्त्तव्यः. तत्र ग्रहणे बालवृद्धातुराणां ग्रहयामात् पूर्वम् एको यामो निषिद्धः

‘‘**सायाह्ने ग्रहणं चेत् स्यात् अपराह्णे न भोजनम्,**

अपराह्णे न मध्याह्ने मध्याह्ने न तु सङ्गवे,

भुञ्जीत सङ्गवे चेत् स्यात् न पूर्वं भोजनक्रिया’’

इति मार्कण्डेयोक्तेः इति आहुः. तत् चिन्त्यम्, उक्तवाक्ये सायाह्नादिपदैः पञ्चधा विभक्तदिवसपञ्चमांशद्वये भोजननिषेधलाभेन ग्रहणसामान्ये उक्तरीत्या यामद्वयत्यागस्य व्याख्येयवाक्यविरुद्धत्वात्. किन्तु, सूर्यग्रहे पञ्चमांशद्वयं निषिद्धम् इति तावदेव त्याज्यम्. चन्द्रग्रहे तु विशेषवाक्यानुपलम्भात् न्यायसाम्यम् आदरणीयम्. यद्यपि रात्रेः पञ्चधा विभागो न प्रसिद्धः तथापि शास्त्रस्य शक्तविषयत्वाद् अर्थापत्या तदादरणम् उचितम्.

‘‘**ग्रहणं तु भवेद् इन्दोः प्रथमादधियामतः,**

भुञ्जीतावर्त्तनात् पूर्वं प्रथमे प्रथमादधः’’

इति वाक्ये ग्रहयामत्यागलाभात् रात्रेः यामोदिवसस्य एकः पञ्चमांशः इति वा. वस्तुतस्तु ‘‘**ग्रहणं तु भवेदिन्दोः**’’ इत्यस्य ‘‘**चन्द्रग्रहे तु यामांस्त्रीन्**’’ इत्यनेन शक्तविषय उपसंहारे कृते ‘‘**बालवृद्धातुरैः विना**’’ इति या तदनुज्ञा सा ग्रहणयामातिरिक्तं कालं बालादिषु अनिषिद्धं बोधयिष्यतीति ग्रहयामएव बालदिभिः न भोक्तव्यम् इति युक्तम् इति एवं पृथङ्निर्णयः उचितः. तेन सूर्यग्रहे दिवसपञ्चमांशद्वयात् प्राक्, चन्द्रग्रहे तु प्रथमयामे चन्द्रग्रहे सूर्यास्तात् पूर्वं भगवते घृतपक्वान्नादिकं समर्पणीयम्. द्वितीयादियामे तु

सूर्यास्तोत्तरमपि अदोषः. तथापि शयनावसरसङ्कोचात् दिवसएव कृत्वा शयनारार्तिकं विधेयम् इति दिक्.

अथ कथम् उत्सवः कार्यः इति शङ्का अवशिष्यते.

तत्र उत्तरम्

''आरनालं पयस्तक्रं दधिस्नेहाज्यपाचितम्,
मणिकथोदकं चैव न दुष्येत् राहुसूतके,
वारितक्रारनालादि तिलदर्भैः न दुष्यति''

इत्यादि वाक्यैः तथाकृतौ सामग्र्यदोषे सर्वदैव कार्यः इति. इयान् परं विशेषः. यदा चन्द्रस्य ग्रस्तास्तः तदैव चेत् तदा मुक्तिम् अवधार्य स्नात्वा शुद्धीभूय स्वल्पशृङ्गारादि कृत्वा शीघ्रतया गौणकाले कार्यः. नच अत्र मानाभावः.

''ग्रस्ते चास्तङ्गते त्विन्दौ ज्ञात्वा मुक्त्यवधारणम्,
स्नानहोमादिकं कार्यं भुञ्जीतेन्दूदये पुनः''

इति निर्णयसिन्धु-दिनकरोद्द्योत-भगवद्भास्कर-लिखितोशनोवाक्ये 'आदि'पदेन तस्यापि सङ्ग्राह्यत्वात्. ग्रहणमध्येऽपि सुरार्च्चनस्य विहितत्वाच्च इति अनेनैव न्यायेन दीपोत्सवेऽपि कार्यम्. भगवतो नैवेद्यसामग्री च स्नेहपक्वातिरिक्ता शृता तदहोरात्रे न कार्या, शृतान्नस्य ग्रहणान्तरितस्य वाक्यान्तरे त्यागस्य उक्तत्वात्. शेषं यथास्थितम् इति. चन्द्रग्रस्ताते मुक्तिम् अवधार्य शुद्ध्यनन्तरं पाकोपि कार्यएव, भगवदर्थत्वात्, स्वार्थन्तु न कार्यएव. कृष्णलेष्ववघातस्येव भोजनसम्बद्धस्य पाकस्य द्वारलोपाद् लोपस्य न्याय्यत्वात्. वस्तुतस्तु उदये भोजनस्य विधानाद् अनुदये परिवेषणादेरेव निवृत्तिः उचिता, नतु आरादुपकारकस्य पाकस्यापि, सम्भारतुल्यत्वादेव तदनुज्ञाप्राप्तेः इति सूर्यग्रस्तास्ते तु **''नाश्नियात् पूर्वं यामचतुष्टयम्''** इति वाक्येन ग्रासात् पूर्वं यामचतुष्टयस्य त्याज्यत्वात्,

''ग्रस्तावेवास्तमानन्तु रवीन्दू प्राप्नुतो यदि,
परेद्युरुदये दृष्ट्वा स्नात्वा अभ्यवहरेद् नरः''

इति माधवीये. अन्यत्र च भृगुवाक्येन मुक्तिदर्शनोत्तरं स्नात्वा भोजनस्य उक्ततया पूर्वं भोजनाभावाच्च अष्टयामिकः उपवासः समर्थस्य, बालवृद्धातुरैस्तु **''सायाह्ने ग्रहणञ्चेत् स्यात्''** इति पूर्वलिखितमार्कण्डेयवाक्यात् पञ्चधाविभक्त-दिवसस्य च यस्मिन् भागे ग्रहणं स भागः तस्मात् पूर्वश्च भागः त्याज्यः. तेन मध्याह्ने सङ्गवे वा भोजनं कार्यम्. इममेव न्यायम् आश्रित्य मध्याह्ने ततः पूर्वं वा भगवते राजभोगः

समर्पणीयः. स च प्रसादो घृतपक्वव्यतिरिक्तो गोभ्यो देयः, तथा शिष्टाचारात्. अस्तानन्तरं तु मुक्त्यवधारणोत्तरं स्वयं स्नात्वा शुद्धं जलम् आनीय भगवन्तं स्नापयित्वा ततः शुद्धजलेन घृतपक्वां सामग्रीं कृत्वा तां दुग्धादिकं च समर्प्य भगवान् स्वापनीयः, सन्ध्यावन्दनादिकं च कार्यम्. यद्यपि अत्र चन्द्रग्रस्तास्तवत् विशेषवचनं नास्ति तथापि उशनोवाक्ये 'इन्दु'पदं रवेरपि उपलक्षणं तुल्यन्यायत्वात्, अन्यथा सायंसन्ध्यादेः लोपप्रसङ्गाच्च. तेन उभयत्र मुक्तिस्नानं विनापि सन्ध्यादिकं कार्यम् इतिवचनतात्पर्यम्. केचित्तु उदयोत्तरमेव सर्वं कुर्वन्ति इति भगवद्भास्कारे न्यायसाम्यादरणात् अदोषः इति आहुः.

मम तु किञ्चिद् अन्यदपि प्रतिभाति. बालवृद्धातुराणां ग्रहणात् पूर्वमिव ग्रस्तास्तोत्तरं भोजनव्यवस्थायाः अनुक्तत्वात् तदर्थमपि न्यायसाम्यादरणम् आवश्यकम्. अन्यथा तदनिर्वाहात्. एवं सति न्यायसाम्यादृता शुद्धिः तदर्थैव नतु शक्ताशक्तसाधारणा. तेन रात्रौ यद् भगवदर्थं कृतं तत् गोभ्यो देयं बालादिभिश्च उपयोक्तव्यम्. ततः उदिते सूर्ये स्नात्वा शुद्धीभूय ततः शुद्धजलेन सर्वं पाकादिकं कार्यं, नतु रात्र्याहृतेन जलेन, तच्छोधकवचनाभावाद् इति दिक्. प्रस्तुतम् अनुसरामः.

इति फाल्गुनोत्सवाः.

श्रीमद्विट्ठलनाथप्रभुचरणविरचितः

।। श्रीरामनवमीनिर्णयः ।।

अगस्त्यसंहितायां

‘‘चैत्रशुद्धा तु नवमी पुनर्वसुयुता यदि,

सैव मध्याह्नयोगेन महापुण्यतमा भवेत्’’

रामार्चनचन्द्रिकायाम्

‘‘विद्धाचेत् ऋक्षसंयुक्ता व्रतं तत्र कथं भवेत्,

विद्धानिषेधश्रवणात् नवमी चेति वाक्यतः’’

अथ चैत्रमासोत्सवाः

चैत्रशुद्धनवम्यां श्रीरामोत्सवः

तदुक्तं हेमाद्रौ अगस्त्यसंहितायाम्

‘‘चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ,

उदये गुरुगौरांश्वोः स्वोच्चस्थे ग्रहपञ्चके,

मेषे षूषणि सम्प्राप्ते लग्ने कर्कटकाह्नये,

आविरासीत् स्वकलया कौशल्यायां परः पुमान्,

तस्मिन् दिने तु कर्त्तव्यम् उपवासव्रतं सदा,

केवलापि सदोपोष्या नवमीशब्दसंग्रहात्’’

इति. अन्यच्च तत्रैव

‘‘चैत्रशुक्ला तु नवमी पुनर्वसुयुता यदि,

सैव मध्याह्नयोगेन महापुण्यतमा भवेत्’’

इति. अत्र ‘सैव’इति विशिष्टपरामर्शाद् मध्याह्ने पुनर्वसुयोगे महापुण्यतमत्वम्. मध्याह्नाद् अन्यत्र योगे पुण्यतमत्वम्. अयोगे तु पुण्यत्वमात्रम् इति दिनकरोद्द्योतः. अत्र ‘‘**अह्नो मध्ये वामनो रामरामौ**’’ इति पुराणसमुच्चयात् कर्कलग्नोक्तेश्च मध्याह्नः प्रादुर्भावकाल इति सएव च पूजाकालः इति तद्व्यापिनी तिथिः सर्वैः कार्या इति बहवः. तत्त्वं तु वैष्णवभिन्नैरेव एवं कार्या. वैष्णवैस्तु पारणदिवसे दशमीलाभे विद्धा त्याज्यैव इति.

‘‘नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः,

उपोषणं नवम्यां वै दशम्यामेव पारणम्’’

इति माधवधृतवचनात्. क्वचित्तु, ‘दशम्यां पारणं भवेद्’ इति पाठः. न च इदं

अत्र निर्णयम् आह

''नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः,

उपोषणं नवम्यां वै दशम्यामेव पारणम्''.

ननु व्रतस्य पारणाङ्गत्वबोधकप्रमाणेनैव व्रतविध्यन्यथानुपपत्या च एकादशीपूर्वदिनप्राप्तेः दशम्यामेव इति वचनवैयर्थ्यं स्याद् अतो नियमविधिः अयं, तेन नवमीसत्त्वेपि दशमीक्षये विद्धैव कार्या इति सिद्धम्. न च निषेधवागनुरोधेन न एवं वाच्यम् इति वाच्यं, दशमीवृद्धिविषयत्वात् तस्या इति चेद्, मा एवं, निषेधविधिवद् उक्तनियमविधिरपि वैष्णवमात्रविषयको अथवा साधारणजनविषयकः. उपक्रमानुरोधाद् आद्यएव अभिमतः चेत् तदा 'उपोषणं नवम्याम्' इति व्यर्थम्, उत्पत्तिवाक्यत्वाभावात्. विद्धानिषेधविधिम् आरभ्याधीतत्वात्. सामान्यप्राप्तावेव विशेषविधिनिषेधयोः सम्भवात्. तथा च विद्धानिषेधे सति उत्तरदिनकर्तव्यत्वे प्राप्ते

दिनद्वये मध्याह्नव्याप्त्यव्याप्तिसमैकदेशव्याप्तिविषयम् इति वाच्यम्, तादृशस्थले द्वितीयदिने दशम्या अनुक्तसिद्धत्वेन पारणविधिवैयर्थ्यापातात्. एतेनैव च दिनद्वये मध्याह्ने पुनर्वसुयोगायोगपरत्वं वदन् प्रतापमार्त्तण्डोपि प्रत्युक्तो ज्ञेयः. एकादश्यां[१] जलेन पारणमपि एतेनैव दत्तोत्तरं ज्ञेयम्. यत्तु, दशम्यादिषु वृद्धिः चेद् विद्धा[२] त्याज्यैव वैष्णवैः. तद् अन्येषां च सर्वेषां व्रतं तत्रैव निश्चितम्'' इति रामार्चनचन्द्रिकायाम् अगस्त्यसंहितावचनम् उक्तम्, हेमाद्रिमाधवाभ्याम् अलिखनात् तद् निर्मूलम् इति दिनकरोद्द्योतः. तत्त्वन्तु **''नवमी चाष्टमीविद्धा''** इति वाक्ये निषेधविधिवद् नवम्युपोषणविधिरपि उपक्रमानुरोधाद् वैष्णवमात्रविषयकः इति दशमीसाम्येपि नवमीवृद्धौ दशमीक्षयेऽपि नवमीवृद्धौ नवम्याम् उपोषणप्राप्त्या अविद्धात्यागएव आशयगोचर[३] इति. वचनञ्च सर्वसम्मतम् इति तेन[४] चारितार्थ्यादेव दशमीवृद्धिवचनम् अनुवादकम् इति.

तदेतत् सर्वं हृदिकृत्य श्रीमत्प्रभुचरणैः उक्तम्,

''तथा च विद्धानिषेधे सति उत्तरदिनकर्त्तव्यत्वे प्राप्ते यत् पुनः

१.दशमीक्षये अष्टमीविद्धायां वैष्णवानाम् उपवासस्य हेयत्वाद् वैष्णवभिन्नानां तु विद्धोपोषणे क्षीणदशम्यां पारणसम्भवाद् विद्धैकादश्यां जलेन पारणस्य प्रसङ्गाभावात्.

२.अथ 'वृद्धि'पदेन पूर्णवृद्धिः न विवक्षिता. तथात्वे नवम्या विद्धत्वासम्भवात्. किन्तु औदयिकसत्वमेव अत्र 'वृद्धि'पदेन ज्ञेयम्. 'अवृद्धि'पदेन च तत्प्रतियोग्यौदयिकसत्वाभावः.

३.न तु 'चेत्'पदारोधेन दशमीक्षये विद्धाया ग्राह्यत्वम्, तथात्वे नवम्युपोषणविधेः वैयर्थ्यापातात्.

४.नवम्युपोषणविधिवैयर्थ्यबोधितनियमेन गतार्थत्वादेव-प्रसिद्धार्थबोधकम् ''अनुवादो अवधारिते'' इति वचनात्.

सति यत् पुनः नवम्युपोषणविधानं तत्रापि निश्चयवाचकाव्ययकथनेन नियमकथनपूर्वकं तेन दशम्यवृद्धावपि नवमीवृद्धौ तस्यामेव उपोषणं कार्यं नवम्यवृद्धौ तु विद्धैव उपोष्या इति अवसीयते. अन्यथा दशमीपारणनियमविधिनैव नवम्युपोषणस्यापि प्राप्तेः पुनः तदुक्तिः व्यर्था स्यात्. यद्यपि एवं पारणाविधेः वैयर्थ्यम् आयाति तथापि उपोषणविधेः मुख्यत्वात् पारणविधिवाक्यस्य अमुख्यत्वेन एकादशीपूर्वदिनपरत्वं कल्प्यते.

इति श्रीविट्ठलदीक्षितविरचितः श्रीरामनवमीनिर्णयरः

> **नवम्युपोषणविधानं तत्रापि निश्चय-वाचकाव्ययकथनेन नियमपूर्वकं तेन दशम्यवृद्धावपि[५] नवमीवृद्धौ तस्यामेव उपोषणं कार्यम्. नवम्यवृद्धौ तु विद्धैव उपोष्या इति अवसीयते. अन्यथा दशमीपारणनियमविधिनैव नवम्युपोषणस्यापि प्राप्तेः पुनः तदुक्तिः व्यर्था स्यात्. यद्यपि एवं पारणविधेः वैयर्थ्यम् आयाति, तथापि उपोषणविधेः मुख्यत्वात् पारणविधिवाक्यस्य अमुख्यत्वेन एकादशीपूर्वदिनपरत्वं कल्प्यते'' इति[६].**

अत्र **'एकादशी'**पदं तिथिपरं न तु व्रतपरम्, व्याख्येयवाक्ये दशम्यां पारणविधानात्.

अत्र[७] यद्यपि **''नवमी चाष्टमीविद्धा''** इति वाक्ये भगवद्भक्तानां विद्धात्यागम् आदायैव सर्वैः निर्णयः क्रियते. वेधस्वरूपन्तु न पृथक् विचार्यते. तथा सति **''त्रिभिः मुहूर्त्तैः विध्यन्ति''** इति सामान्यवाक्यात् त्रिमुहूर्त्तवेधएव आयाति, कथञ्चित् तदनुकल्पो

५.नवम्युपोषणविधिवैयर्थ्यबोधितनियमेन दशम्या अनौदयिकत्वे (क्षये)पि तस्यां नवम्यामेव, दशम्याम् औदयिकत्वे तु वचनेनैव विद्धोपोषणं निषिध्य शुद्धोपोष्यते. परम् इयान् विशेषः, नवम्युपोषण-विधिवैय्यर्थ्येन विज्ञायते यद् दशमीक्षये विशुद्धौवोपोष्या इत्यपि शब्दस्वारस्यम्.

६.विद्धोपोषणनिषेधवदेकादश्यां पारणस्य निषेधाभावेनामुख्यत्वम्.
''दशम्यामेव पारणमि''त्युक्तिर्नवमीक्षये निषेधविधि बाधते निरवकाशत्वात्. तथा च नवमीक्षये एकादशीपूर्वदिने एव दशम्यामेवेत्यर्थः. न तु निम्बार्कमतमनुसृत्य दशम्युपोष्यैकादश्यां पारणं कुर्यात्, पारणविधिवैयर्थ्यापातात्.

७.'अत्र यद्यपि' इत्यादि 'स्मृतेर्नैर्बल्यादिति' एतदन्तोऽयं ग्रन्थः त्रयोदशपुस्तकेषु नास्ति. पुस्तकत्रये वर्त्तते. ''तेनायं निष्कर्षः. विद्धाक्षये विद्धा गत्यन्तराभावात्. पारणार्थं दशम्यलाभे पूर्वा दशम्यां पारणस्यावश्यकत्वात्. अन्यदा तु परैवेति दिक्'' इत्यन्तः ग्रन्थो वर्तते.

द्विमुहूर्त्तवेधो वा. तेन अष्टम्याः त्रिमुहूर्त्तत्वस्य द्विमुहूर्त्तत्वस्य वा अभावे नवम्या विद्धत्वं न भवति इति तादृशस्थले पूर्वैव उपोष्य इति आयाति. तथापि साम्प्रदायिका एतादृशस्थले द्वितीयामेव आद्रियन्ते. तत्र तेषाम् अयम् आशयः. विद्धात्यागे बीजं तावद् भगवत्प्रादुर्भावदिने अष्टम्यभावएव. अन्यथा वामनद्वादश्याम् एकादशीवेधस्येव अत्र अष्टमीवेधस्यापि दूषकता न स्यात्. तथा सति स्वल्पस्यापि संसर्गस्य दूषकत्वं निर्बाधम्. अतो जन्माष्टम्यामिव अत्र कलाकाष्ठादिवेधत्याग-वचनाभावेपि संसर्गमात्रात् त्यागो युज्यते, न्यायसाम्यात्.

''युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया,
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता''

इत्यस्य विशेषवाक्येन वर्षवृद्धौ सूर्योदयव्याप्तेरेव उक्ततया अवतारसामयिक-व्यवहारस्य तदैव प्राप्तेः तन्न्यायेनापि उदयव्यापिन्याएव ग्राह्यत्वस्य युक्तत्वाच्च, एतेनैव 'वसुरन्ध्रयोः' इति युग्मवाक्यमपि दत्तोत्तरम्. विद्धानिषेधस्य प्रातिस्विकत्वाच्च.

न च जन्मसमये तिथ्यभावे पूजाकालाव्याप्त्या द्वितीयग्रहणस्य दुष्टत्वं शङ्क्यम्, विद्धात्यागेनैव तस्य निरासात्. एवं च औदयिकग्रहणबोधकानां सर्वेषां सामान्यवाक्यानामपि आनुगुण्याच्च इति.

नच एवं न्यायप्राप्तग्रहणे सति जन्माष्टम्यामपि विद्धाक्षये विद्धाकरणस्य प्राप्तेः तदनुकल्पत्वेन शुद्धनवमीग्रहणम् अयुक्तं स्याद् इति वाच्यं, कल्पनीयन्यायापेक्षया एकादश्यतिदेशवाक्यस्य बलिष्ठत्वात्. एवम् अत्रापि दशमीपारणवाक्यस्य बलिष्ठत्वाद् यादृशविद्धाधिकास्थले अग्रे पारणदिनं न लभ्यते तादृशविद्धाधिकास्थले एव वर्षवृद्धिन्यायबाधो, न अन्यत्र इति एतादृशस्थले द्वितीयदिनस्य न्यायप्राप्तत्वात् पूर्वदिने नवम्या विद्धात्वाभावेपि विद्धात्यागबीजविचारेण पूर्वां विहाय द्वितीयदिने व्रतकरणम् उपपन्नम्. माधवेन एतादृशस्थले गौरीतृतीयायां द्वितीयप्रापकाभावेऽपि केवल-शिष्टाचारस्यैव शरणीकरणाच्च. एतावान् परं विशेषः, गौरीतृतीयायाः पूर्वविद्धात्वे द्वितीयदिने कर्मकाले रहितायाः ग्रहणम्. अत्र तु पूर्वविद्धात्वाभावेऽपि विद्धात्यागबीज-विचाराद् वर्षवृद्धिन्यायाच्च इति.

तेन अयं निष्कर्षः. विद्धाक्षये विद्धा गत्यन्तराभावात्. पारणार्थं दशम्यलाभेऽपि विद्धा, दशम्यां पारणविधानबलात्. अन्यथा एकादश्याम् अद्भिः पारणेनापि व्रतसमाप्तिसम्भवे पारणविधानस्य वैयर्थ्यस्य अपरिहार्यत्वात्. अन्यदा तु परैव इति दिक्.

अयमेव न्यायो नृसिंहचतुर्दशी स्थले द्रष्टव्यः.

माध्वास्तु

''सर्वासां तु जयन्तीनां श्रेष्ठा कृष्णाष्टमी मता,
यस्मात् सन्निहिताऽत्यन्तं तत्रैवोपवसेत् नरः,
सर्वास्वपि जयन्तीषु पूजा कार्या विशेषतः,
सान्निध्यएव कर्त्तव्यः उपवासो न दूरगः''

इति स्मृत्यर्थसागराख्ये स्वनिबन्धे भरद्वाजसंहितावचनात्.

''चैत्रे मासि नवम्यां तु प्रादुर्भावो हरेर्यदा,
रामपूजां नरः कुर्याद् ब्राह्मणैः सह भोजनम्,
तथैव नारसिंहस्य मत्स्यकूर्मादिकस्य च,
अवतारदिने सम्यक् ब्राह्मणैः सह भोजनम्,
कृते तु नारसिंहं तु त्रेतायां राममेव च,
द्वापरे वामनं प्रोक्तं कलौ कृष्णाष्टमी स्मृता''

इति गारुडात्.

''कृष्णजन्माष्टमी त्यक्त्वा येऽन्यं व्रतम् उपासते,
नाऽऽप्नुवन्ति फलं किञ्चित् इष्टापूर्त्तमथापि वा,
कृष्णाष्टमीं विना नैव जयन्ती क्वापि वैष्णवैः,
कर्त्तव्या यदि कुर्वीत तामसं तदुपोषणम्''

इति स्कान्दात् च इति आहुः, तद् न अस्माकं सम्मतम्, श्रीरामस्य पुरुषोत्तमत्वेन विमृष्टत्वाद्, अनुपोषणे शिष्टाचारविरोधात्, कलौ तत्प्राबल्यस्य व्यवस्थापितत्वेन तदपेक्षया स्मृतेः नैर्बल्याद् इति.

अथेदं विचार्यते. चैत्रीयदोलादमनोत्सवौ कुतो न क्रियेते इति?

तत्र उत्तरम्, सर्वदेवतासाधारणत्वाद् इति. तदुक्तं व्रतदिनकरोद्द्योते वायवीये

''संवत्सरकृतार्चायाः साफल्यायाऽखिलान् सुरान्,
दमनेनाऽर्चयेत् चैत्र्यां विशेषेण सदाशिवम्''

इति. हेमाद्रौ व्रतदिनकरोद्द्योते च भविष्योत्तरे ब्राह्मे च

''धर्मराज निबोधेह दमनादिमहोत्सवम्''

इति उपक्रम्य कयाचिद् विद्याधर्या कृतां दोलां वीक्ष्य उमया प्रार्थने शिवेन

दोलाकरणं शिवयोः तदारोहणं शक्रं प्रति प्रतिवत्सरं शिवदोलामहोत्सवाज्ञापनं च उक्त्वा

''प्राप्ते वसन्तसमये सुरसत्तमानाम्
आनन्दोलनं सुरवरा ननु कुर्वते ये,
ते प्राप्नुवन्ति भुवि जन्मतप:फलानि''

इत्यादि उक्तम्. तेन

''ऊर्जे व्रतं मधौ दोलां श्रावणे तन्तुपूजनम्,
चैत्रे दमनकारोपम् अकुर्वाणो व्रजत्यधः''

इत्यपि तु सर्वदेवपूजकपरं ज्ञेयम्. तेन केवलवैष्णवानां न तदकरणे दोषः. ननु एवं सति तन्तुपूजने किम् आग्रहः इति चेद् भक्तिरत्नप्रदायकत्वेन उक्तत्वात् इति वदामः. यद्वा, 'मधु'पदं वसन्तपरम् इति तत्र दोला तु पूर्वम् उक्तैव. मीनार्केऽपि वसन्तत्वस्य ज्योतिर्निबन्धे सिद्धान्तशिरोमणौ अभिमतत्वात्. अतएव पुनः चैत्रोक्तिः युज्यते, दमनकानारोपस्तु तदभावात्. उत्तमदमनकस्य उत्कलदेश एव उपलम्भात्. सार्वदैशिकस्तु उग्रगन्धो मरुबक एव इति न दोषलेशः इति दिक्. इति चैत्रोत्सवाः.

वैशाखमासोत्सवा.

श्रीमदाचार्यचरणोत्सवः

वैशाखकृष्णैकादश्यां श्रीमदाचार्यचरणोत्सवः. स च स्वामिन्युत्सववत् औदयिक्यां कार्यः. विद्धाक्षये तु विद्धायामेव. शुद्धाधिकायां[१] तु पूर्वस्यामेव, शिष्टाचाराद् इति. एतद् आदाय उत्सवाः च एतन्मार्गीयाणाम् आवश्यकाएव.

''आचार्यं मां विजानीयाद् नावमन्येत कर्हिचित्,
न मर्त्यबुध्या सेवेत सर्वदेवमयो गुरुः''

इति एकादशस्कन्धे भगवद्वाक्यात्.

''गुरोर्यत्र परीवादो निन्दा यत्र प्रवर्त्तते,
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः''.

''ब्रह्मैवाचार्यरूपेण स्वरूपेणावतिष्ठते''

इति शङ्कराचार्यकृतभारतीयसहस्रनामटीकायां व्यासोक्तेश्च.

''यस्य देवे पराभक्तिः यथा देवे तथा गुरौ''

इति श्रुतेश्च. येऽपि यन्मतानुवर्तिनः स्वाचार्योत्सवादिकं न कुर्वते ते अश्रद्धालवो वा एतद्वचनापर्यालोचका वा इति ध्येयम्.

वैशाखशुक्लतृतीयायां चन्दनयात्रोत्सवः.

तदुक्तं स्कान्दे पुरुषोत्तममाहात्म्ये

''**वैशाखशुक्लपक्षे तु तृतीयाऽक्षयसंज्ञिता,**
तत्र मां लेपयेद् गन्धलेपनैरतिशोभनैः''

इति. ब्रह्मपुराणे च पञ्चतीर्थीमाहात्म्ये

''**यः पश्यति तृतीयायां कृष्णं चन्दनरूपितम्,**
वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम्''

इति. अत्र एतद् आरभ्य यावदुष्णकालं व्यजनादिकम् अर्पणीयम्.

''**व्यजनैश्चामरैः छत्रैः वन्यैः नानोपहारकैः,**
सन्तोषयन् जगन्नाथं तृतीयादौ विलेपयेत्''

इति तत्रैव उक्तेः. अत्र विशेषतः कालानुक्तेः पञ्चमुहूर्त्तात्मकं प्रातरेव पूजाकालः, स च वसन्तपञ्चम्यां विवेचितः इति ततो अवधेयः. अत्र तिथिद्वैधे दिनद्वये तदेकदेशव्याप्तौ परैव कार्या. युग्मवाक्ययोः विरोधेऽपि

''**रम्भाख्यां वर्जयित्वैकां तृतीयां द्विजसत्तम,**
तृतीया सर्वकार्येषु गणयुक्ता प्रशस्यते''

इति ब्रह्मवैवर्तेन

''**कला काष्ठाऽपि वा यत्र द्वितीया सम्प्रदृश्यते,**
सा तृतीया न कर्त्तव्या कर्त्तव्या गणसंयुता''

इति स्कान्देन च व्यवस्थापनात्. विद्धाक्षये तु विद्धैव कार्या, गत्यन्तराभावाद् इति.

श्रीनृसिंहोत्सवः

वैशाखशुक्लचतुर्दश्यां श्रीनृसिंहोत्सवः. तदुक्तं नृसिंहपुराणे स्कान्दे च

''**वैशाखे शुक्लपक्षे तु चतुर्दश्यां निशामुखे,**
मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम्,
वर्षे–वर्षे तु कर्त्तव्यं मम सन्तुष्टिकारणम्'' इति.

''**वैशाखस्य चतुर्दश्यां सोमवारेऽनिलर्क्षके,**
अवतारो नृसिंहस्य प्रदोषसमये द्विजाः'' इति.

अथ प्रदोषविचारः.

अत्र 'प्रदोषा'दिशब्दाः पारिभाषिकमपि कालं यद्यपि विषयीकर्त्तु शक्नुवते,

तथापि हिरण्यकशिपुवरानुरोधात् सायं सन्ध्यापराएव ज्ञेया:. साऽपि मुख्यैव ग्राह्या, उक्तयुक्तेरेव. तत्स्वरूपं च वराहेण उक्तम्

''**अर्द्धास्तसमयात् सन्ध्या व्यक्तीभूता न तारका,**
यावत् तेज: परिहानिवशात्''

इति. तस्मात् तादृशी सन्ध्या वा ''**प्रदोषोऽस्तमयात् ऊर्ध्वं घटिकाद्वयमिष्यते**'' इति प्राच्योक्त: प्रदोषो वा प्रादुर्भावकालः इति दिनकरोद्द्योत:. अन्ये तु प्रदोषकालम् उक्त्वा गच्छन्ति नतु निर्णयं तस्य कुर्वन्ति. द्वैतनिर्णयकारस्तु

''**वैशाखशुक्लपक्षस्य चतुर्दश्यां विवस्वति,**
अस्तंगामिनि सर्वेषां पुरस्तम्भस्य मध्यत:,
प्रबभूव महाविष्णुः नरसिंहाकृतिः नृप''

इत्यादि नृसिंहपुराणवचनम्. सायंकाले प्रादुर्भावबोधकं भविष्यवचनं प्रदोषबोधकं स्कान्दं च उक्त्वा नृसिंहपुराणे घटिकानुक्ते: स्कान्देन निर्णयः इति च उक्त्वा तत्रत्यप्रदोषपदार्थं 'सायं'पदेन निर्णिनाय. सायं च ''**नक्षत्रस्पर्शनात् सन्ध्या सायं तत्परत: स्थितम्**'' इति लक्षितवान्. ततः त्रिघटिकात्मकं सूर्यास्तोत्तरं कालं जन्मकालत्वेन अङ्गीचकार. युक्तं तु विवस्वदस्तसामीप्यम् आरभ्य आसन्ध्यम् इत्येव. हिरण्यकशिप-ुहननात् पूर्वमेव प्रादुर्भावकालत्वस्य उचितत्वाद् इति. अत्र च तिथिद्वैधे सर्वैः प्रदोषव्यापित्वेनैव सर्वेषां निर्णय: क्रियते. युक्तं तु अविद्धात्वेन वैष्णवानाम्, इतरेषां प्रदोषव्यापित्वेन इति.

''**अनङ्गेन समायुक्ता न सोपोष्या चतुर्दशी,**
पूर्णायुक्तां तु कुर्वीत नरसिंहस्य तुष्टये,
य: करोति नरो मोहात् कामविद्धां चतुर्दशीम्,
धनापत्यैः वियुज्येत तस्मात् तां परिवर्जयेद्''

इति गोविन्दार्णवे समयमयूखे च ब्राह्मात्.

''**केवलं च प्रकर्त्तव्यं मद्दिनं फलकांक्षिभि:,**
वैष्णवैस्तु न कर्त्तव्या स्मरविद्धा चतुर्द्दशी''

इति नारसिंहाच्च. एतदुत्तरार्द्धं बहवो न लिखन्ति. तथा सति सर्वेषामेव अविद्धात्वेन निर्णयः उचित: प्रतिभाति, विशेषशास्त्रत्वात्. न च विद्धानिषेधवाक्यं दिनद्वये प्रदोषव्याप्त्यऽव्याप्ति-समैकदेशव्याप्तिविषयम् इति वाच्यं, जन्मकालस्य पूर्वम् उपपादितत्वेन तादृशकाले अनङ्गसम्बन्धस्य स्वल्पतया द्वित्रिमुहूर्त्तात्मकताभावाद् वेधस्वरूपाभावेन वाक्यवैयर्थ्यापातात्. न च प्रादुर्भावकालस्य त्रिमुहूर्त्ताद्यात्मकत्वं वक्तुं शक्यम्, दूषितचरत्वात्. नापि वेधस्य कलाकाष्ठाद्यात्मकत्वं, तादृग्वचनाभावात्. अतो

युग्मवाक्यानुगुण्यात् ''**शुक्ला चतुर्दशी ग्राह्या परविद्धा सदा व्रते**'' इति व्यासवाक्याच्च प्रात:कामवेधरहितैव आदरणीया क्षयाभावे. क्षये तु अगत्या विद्धैव. जन्माष्टमीरीतिस्तु अत्र अनुसर्त्तुम् अशक्यैव. श्रीमदाचार्यैः तत्र नवम्याम् उत्सवाधिकरणत्वस्य दर्शितत्वात्. पौर्णमास्यां च तज्ज्ञापकाभावाद् इति दिक्. इदं च व्रतं प्रायिकत्वेन प्रभूणाम् अभिमतम्, 'चेद्' इति उक्ते:. तत्र बीजं तु माध्वलिखितानि वचांसि. तानि तु रामनवमीस्थलएव उदाहृतानि. तदाशयश्च[१] सर्वनिर्णयप्रकाशे विवेच्य:. इति वैशाखोत्सवा:.

[कठिनांशटिप्पणी: १.अत्र नृसिंहजयन्त्यां चेत् 'पदमहा'पदाभ्यां तयो: प्रायिकत्वं बोधितम्. तत्र बीजं तु इदं प्रतिभाति. श्रीभागवते एतयोः अवतारत्वेन निरूपणाद् नृसिंहतापिनीये च 'विष्णोर्नुकम्' इति श्रुतौ पूर्णतानिरूपणाद् उपासकबाहुल्यात् पुराणे व्रतविधायकानेकवचनदर्शनाच्च यस्य पुरुषोत्तमत्वस्फूर्तिः तेन कार्यम्. 'मदीयव्रतधारणमि'ति श्रीभागवता आज्ञापनात्. यस्य तु न तथा स्फूर्तिः तेन न कार्यम्. साक्षाद्व्रतस्य तं प्रति अभावेन तद्व्रताज्ञाया अपि अभावात्. तथा च तत्तदुपासकान् प्रत्येकनित्यत्वं न अन्यान् प्रत्यपि इति अधिकारिभेदम् आदाय कृताकृतत्वबोधनार्थे अयम् उक्तिः इति दिक्.]

ज्येष्ठमासोत्सवा:

ज्येष्ठाभिषेकोत्सव:

ज्येष्ठशुक्लपूर्णिमायां तत्समीपे वा ज्येष्ठायां ज्येष्ठाभिषेकोत्सव:. तदुक्तं ब्राह्मे

''**ज्येष्ठे मासि च सम्प्राप्ते नक्षत्रे चैन्द्रदैवते,**
पौर्णमास्यां तदा स्नानं सर्वकालं हरेः द्विजा:'' इति.

तथा

''**स्वर्णधर्मानुवाकेन स्नापयेत् पुरुषोत्तमम्**'' इति.

''**पौर्णमास्यां सूक्ततन्त्रै: स्नापयेद् विधिवद् विभुम्**'' इति च.

अत्र च पौर्णमास्याम् इति सामीप्यसप्तमी. तेन दोलोत्सववदेव एतद्व्यवस्था ज्ञेया. तिथिनक्षत्रयोगः चेत् प्रशस्ततरत्वं ज्ञेयम्

''**ज्यैष्ठ्यां ज्येष्ठर्क्षयुक्तायां य: पश्येत् पुरुषोत्तमम्,**
कुलैकविंशम् उद्धृत्य विष्णुलोकं स गच्छति''

इति ब्राह्मात्. यत्तु, स्कान्दे इन्द्रद्युम्नं प्रति भगवद्वाक्यम्

''**ज्यैष्ठ्याम् अहं चावतीर्णः तत्पुण्यं जन्मवासरम्,**
तस्यां मे स्नपनं कार्यं महास्नानविधानत:,
प्रत्यर्चायां महाराज साधिवासं समृद्धिमत्''

इति, तत्तु तत्क्षेत्रस्थस्वस्वरूपपरमेव इति प्रतिभाति.

''न्यग्रोधात् उत्तरे कुपः सर्वतीर्थमयोऽस्ति वै,
स्नानाय पूर्वं निर्माय किञ्चिदाच्छादितो भुवा,
अवतीर्णस्त्वहं पश्चात् तं विविच्य प्रकाशय,
संकार्यः स चतुर्दश्यां बलिं दत्वा विधानतः''

इति कूपविवेचनलिङ्गात्. एतेनैव

''ऋक्षाभावे पूर्णमास्यां यो विधिः स तथैव च,
कार्यः प्रसादनार्थं हि देवस्य पुरुषोत्तमे''

इति ब्राह्मम्.

''पौर्णमास्यां प्रकुर्वीत स्नानं श्रीपुरुषोत्तमे,
यदा ऋक्षं न लभ्येत तदा ग्राह्या तु पूर्णिमा''

इति स्कान्दं च व्याख्यातं ज्ञेयं, क्षेत्रनिर्देशाद् इति. यदि च न इदम् अभ्युपेयते तदा नक्षत्रं तिथिश्च उभयमपि कालो अस्तु व्यवस्था तु शिष्टाचारानुसारात्, कलौ तस्य बलीयस्त्वात्, तदुपपादितं प्राक्.

स्नानावशिष्टं जलं च सर्वाङ्गेषु अभ्युक्षणीयम्.

''स्नानशेषेण कृष्णस्य तोयेनात्माभिषिच्य वै,
वन्ध्या मृतप्रजा या वै दुर्भगा ग्रहपीडिताः,
राक्षस्याद्यैर्गृहीता वा तथा रोगैः ससंयुताः,
सद्यस्ताः स्नानशेषेण उदकेनाभिषेचिताः,
प्राप्नुवन्तीप्सितान् कामान् कामं वाञ्छन्ति चेप्सितम्,
पुत्रार्थी लभते पुत्रान् सौभाग्यं च सुखार्थिनी,
रोगार्त्ता मुच्यते रोगाद् धनं च धनकाङ्क्षिणी,
पुण्यानि यानि तोयानि तिष्ठन्ति धरणीतले,
तानि स्नानावशेषस्य कलां नार्हन्ति षोडशीम्,
तस्मात् स्नानावशेषं यत् कृष्णस्य सलिलं द्विजाः,
अभ्युक्षेत् सर्वगात्राणि सर्वकामप्रदं हि तत्''

इति ब्राह्मात्. इति ज्येष्ठोत्सवाः.

अथ आषाढमासोत्सवाः

रथोत्सवः

अथ आषाढे रथोत्सवः. तदुक्तं स्कान्दे,

''गुण्डिचाख्यां महायात्रां प्रकुर्वीथाः क्षितीश्वर,
यस्याः संकीर्त्तनादेव नरः पापाद् विमुच्यते,
माघमासस्य पञ्चम्याम् अष्टम्यां चैत्रशुक्लके,
एते कालाः प्रशस्ता हि गुण्डिचाख्यमहोत्सवे,
विशेषान् मोक्षदाऽऽषाढद्वितीया पुष्यसंयुता,
ऋक्षाभावे तिथौ कार्या सदा सा प्रीतये मम,
आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता,
तस्यां रथे समारोप्य रामं मां भद्रया सह,
महोत्सवं प्रवर्त्याथ प्रीणयेत द्विजान् बहून्,
गुण्डिचामण्डपं नाम यत्राऽहमजनं पुरा''

इत्यादिना च मण्डपप्रशंसाम् उक्त्वा **''दिनानि नव यास्यामि यथा तस्माद् इहाऽऽगतः''** इत्यादिना. तेन रथारोहणं गुण्डिचामण्डपगमनार्थं तद्यात्राङ्गभूतं च. शिष्टास्तु केवलमपि प्राधान्येन कुर्वन्ति. तत्र बहूनां कालानाम् उक्तत्वाद् नक्षत्रप्राधान्यस्य उपपादितत्वाच्च ज्येष्ठाभिषेकवदेव निर्णयः इति अलं विस्तरेण.

शयनोत्सवः

अत्र शुक्लैकादश्यां शयनोत्सव उक्तः. स च सम्प्रदायाभावाद् न क्रियते इति न विविच्यते. कश्चित् श्रद्धया आचरति चेद् निर्मले करोतु, एकादशीं च प्रबोधिनीवद् गृह्णातु इति दिक्. इति आषाढोत्सवः.

अथ श्रावणमासोत्सवाः

पवित्रारोपणोत्सवः

अथ श्रावणशुक्लैकादश्यां पवित्रारोपणोत्सवः. स च हेमाद्रौ विष्णुरहस्ये उक्तः

''श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे,
द्वादश्यां वासुदेवस्य पवित्रारोपणं स्मृतम्,
द्वादश्यां श्रवणे वापि पञ्चम्याम् अथवा द्विज,
आनुकूल्येषु कर्त्तव्यं पञ्चदश्याम् अथापि वा,

मुख्यालाभे हि सर्वत्र यावद् नोत्तिष्ठते हरिः''

इति. 'सर्वत्रे'ति सर्वमासेषु इति अर्थः. अत्र ''कर्कटस्थे दिवाकरे'' इति मलमाससंग्राहकम्. परं शिष्टा न आद्रियन्ते, अन्यगतिसद्भावात्. न च काचित् शङ्कापि, एकदेशविकृतत्वाद् इति. अत्र प्रथमो 'द्वादशी'शब्दः[पा.भे.] एकादशीपरः, अन्यथा पुनः तदुक्तिवैयर्थ्यापातात्. न च लक्षणापत्तिः,

''पक्षे-पक्षे नृपश्रेष्ठ विधिवद् द्वादशीव्रतम्,
दशमीवेधरहितं कुरुषे जागरान्वितम्.
चक्षुर्हीनो यथा देहः पतिहीना यथाङ्गना,
द्वादशी दशमीविद्धा तथा राष्ट्रम् अवैष्णवम्''

इत्यादिभिः हरिवल्लभसुधोदयस्थपाद्मवचनैः **''दशम्यनुगता हन्ति द्वादशी द्वादशीफलम्''** इति निर्णयसिन्धुस्थकौर्मेण तथा विधैः वाराहवचनैः च एकादशी-पर्यायता-निश्चयात्. न[१] च पाद्मानाम् उन्मीलिनीद्वादशीप्रकरणस्थत्वात् न इदं साम्प्रतम् इति वाच्यं, लिङ्गेन प्रकरणबाधस्य शक्यवचनत्वात्.

किञ्च, **''सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा, उन्मीलिनीति सा प्रोक्ता''** इति लक्षणकायां तस्यां दशमीवेधसम्भावनाराहित्येन अरुणोदयादिवेधादरणे च एकादशी-वाचकत्वस्यैव पर्यवसानेन न कोपि शङ्कालेशः इति.

न च एवम् अतिप्रसङ्गः इति वाच्यम्, लिङ्गपुनरुक्त्यादिसत्वएव तथा अङ्गीकारात्. नापि द्वितीयद्वादशीशब्दस्य अनुवादकत्वं साम्प्रतं, मानाभावात्. यत्तु 'द्वितीयद्वादशी'पदे श्रवणसमभिव्याहारात् तस्य श्रवणद्वादशीपरत्वं तस्याश्च मुख्यतरत्वम् इति अङ्गीकृत्य प्रथमस्य तस्य द्वादशीपरत्वं तस्याश्च प्रथमोद्दिष्टत्वाद् मुख्यतमत्वम् इति कश्चिद् आह तदपि अविचारचारु. **''सैव मध्याह्नयोगेन महापुण्यतमा भवेद्''** इत्यादिवद् मुख्यतमादिपदाभावेन अत्र तादृक्कल्पनायां मानाभावात्. प्रथम-द्वादश्यतिरिक्तेषु मासत्यागापत्तेश्च इति अनुवादलक्षणस्य अप्रामाण्यापत्तेश्च. विधेयान्तराभावे केवलस्य विध्यनुवादस्य क्वापि अदर्शनाद् निषेधस्थलेऽपि देवता-विग्रहवादिमते अनुवादानङ्गीकाराद् जैमिन्यपेक्षया व्यासस्य उभयथापि गुरुत्वाद् आचार्यचरणैरपि तथाङ्गीकारात्. तस्माद् एकादशी मुख्यः कालः. तदलाभे च द्वादश्यादयः इत्येव युक्तम्. ये[२] च एवं न आन्द्रियन्ते ते बोधविधुराएव इति दिक्.

आनुकूल्यं च अत्र दशमीवेधराहित्यरूपं[३] ज्ञेयम्. यद्यपि तदुपवासएव

आवश्यकः. तथापि, विष्णुधर्मोत्तरे नारदेन वेधदोषकारणे पृष्टे भगवता

''दशम्याम् असुरा जाता एकादश्यां सुरास्तथा,

यत्तु जन्मदिनं येषां तत्तेषामेव वर्द्धनम्''

इत्यादिना वेधत्याज्यताबीजम् उक्तम् तत् पुण्यकार्यान्तरेऽपि तुल्यम् इति प्रकृतेऽपि तद्विवक्षितमेव. अन्यथा आनुकूल्येषु इति न शिष्यात्. हरिवासरत्वेन भगवदानुकूल्यं तु अत्रैव पर्यवस्यति. फलानुकूल्यमपि अत्रैवेति न कोपि शङ्कालेशः. एतेनैव[४] भद्राराहित्यमपि सङ्गृहीतं ज्ञेयम्. एवं द्वादश्यादिष्वपि ऊह्यम्.

[कठिनांशटिप्पणीः १.फलानुपलम्भेन विप्रतिपन्नत्वेन च लक्षणां वक्तुम् अशक्यत्वाच्च. अस्तु वा लक्षणा. तथापि न अस्माकं हानिः. तथापि एकादशीपरत्वप्राप्तेः.

२.अत्र किञ्चिद् भेदेन पाठद्वयं दृश्यते, 'यत्तु'इत्यादि 'मासत्यागापत्तिश्च'इत्यन्तो ग्रन्थश्च न दृश्यते.

''विधेयान्तराभावे केवलस्य विध्यनुवादस्य क्वापि अदर्शनात्. निषेधस्थलेऽपि देवताविग्रहवादिमते अनुवादानङ्गीकारात्. जैमिन्यपेक्षया व्यासस्य उभयथाऽपि गुरुत्वात्. आचार्यचरणैरपि तथैव अङ्गीकारात्. ग्रहिलतया अङ्गीकारेपि अनुवादलक्षणस्य तस्य अदर्शनात्. ''न चान्तरिक्षे न दिवि'' इत्यादिवत् नित्यानुवादरूपत्वम्. देवताविग्रहवादादरणेन तत्रापि तदनङ्गीकारात्. अतएव आचार्यचरणैरपि व्यासाविरोधेनैव जैमिनेः प्रामाण्यम् अङ्गीकृतम् अतो न कोपि शङ्कालेशः.

(ख-ग पुस्तकेऽपि एवमेव पाठः)

३.दशमीवेधस्य पापापादकत्वात् तद्राहित्यम् उक्तम्. एतेन व्यतीपातादीनां पुण्यापादकत्वात् तद्राहित्यं न विवक्षितम् इति बोध्यम्.

४.व्यतीपातादीनां पुण्यानुकूलत्वाद् न दोषः. भद्रायास्तु ''भद्रायां द्वे न कर्तव्ये'' इति वाक्ये दिनकरोद्योतादिनिबन्धेषु 'श्रावणी'पदेन तन्मासस्थम् अन्यदपि ग्राह्यम् इति व्याख्यानाद् व्यतीपातादीनां पुण्यानुगुणत्वेन तद्दोषस्य अनुक्तत्वात् शिष्टैः भद्राराहित्यमात्राङ्गीकृतम्. अस्मद्गुरुचरणैरपि तदेव अनूदितम् इति ज्ञेयम्. 'फलानुकूल्यमप्यत्रैवे'ति तेन तदनुगुणत्वेन दोषाभावोपि उक्तः.]

पाठभेदः १.''...शब्दः ''सूतके मृतके वापि न त्याज्यं द्वादशीव्रतम्'' इति अत्रैव समुदायशक्त्यैकादशीपरः'' इति ख पुस्तके अधिकम् उपलभ्यते.

पवित्रारोपणम्

पवित्रारोपणं नित्यं काम्यं च. तदुक्तं दिनकरोद्द्योते हेमाद्रौ ब्राह्मे

''ब्राह्मणः क्षत्रियो वैश्यः तथा स्त्रीशूद्रएव च,

स्वधर्मनिरताः सर्वे भक्त्या कुर्युः पवित्रकम्,

न करोति विधानेन पवित्रारोपणं तु यः,

तस्य सांवत्सरी पूजा निष्फला मुनिसत्तम,

तस्माद् भक्तिसमायुक्तैः नरैः विष्णुपरायणैः,

वर्षे–वर्षे प्रकर्त्तव्यं पवित्रारोपणं हरेः''

इति. तथा

''पवित्रारोपणं विष्णोः भक्तिरत्नप्रदायकम्,
स्त्रीपुंकीर्तिप्रदं पुण्यं सुखसम्पद्धनावहम्''

इति. तत्प्रकारश्च रामार्चनचन्द्रिकायां प्रयोगसारोक्तः

''पवित्रो नाम नागो वासुक्यवरजः. दिव्यशतवर्षतपसा शिवं तोषयित्वा कण्ठाभरणतां वव्रे. तदा शिवः तथेत्युक्त्वा कण्ठे धारयन् वरान्तरं ददौ''.

''ये त्वां न बहुमन्यन्ते यथा सम्भावितो मया,
जपहोमादिजं तेषा फलं त्वामेतु निश्चयात्,
अत्रैव श्रावणे मासि नक्षत्रे चापि वैष्णवे,
तस्माद् आराधयन्तु त्वां नित्यनैमित्तकोद्यताः,
वैदिकाः सक्तुहोमेन प्राज्ञां कुर्वन्तु तेऽनघ,
त्वत्सादृश्यानुकारेण निवीतेनैव तान्त्रिकाः.
आराध्यारोप्य पूज्यायै देवतायै पवित्रकम्''

इति पवित्रोत्पत्तिम् उक्त्वा ततः आगमोक्तप्रकारेण सूत्रशुद्ध्यादिरूपां कर्त्तव्यताम् उक्त्वा बहुभिः वचनैः उक्तः. स तान्त्रिकाणामेव आवश्यको न तु केवलभक्तानाम्. अतो यावद् आवश्यकं तावदेव संगृह्यते. तत्र भावस्य गुणक्षोभेण नवविधत्वात् त्रिसूत्रत्रिवृत्करणम्, तत्र सांवत्सरपूजासाङ्गत्वाय क्रियमाणत्वात् सूत्रसंख्या, नागाकारत्वाय ग्रन्थयः, देवसान्निध्याय अधिवासनं च इति अत्यावश्यकम्. तत्र

''हैमरौप्यैः ताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः,
कुशैः काशैश्च कार्पासैः ब्राह्मण्या कर्तितैः शुभैः,
कन्याया वा पवित्रं स्याद् न पुंश्चल्यादिभिः कृतैः,
कृते मणिमयं कार्यं त्रेतायां हेमसम्भवम्,
द्वापरे पट्टसूत्रं च कलौ कार्पासमुच्यते,
स्नात्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत्,
अभिषिञ्चेत् पञ्चगव्यैः अद्भिः प्रक्षालयेत् ततः''

इति तथा.

''तत्रोत्तमं पवित्रं तु षष्ट्या सह शतैस्त्रिभिः,
सप्तत्या सहितं द्वाभ्यां पवित्रं मध्यमं स्मृतम्,
साशीतिना शतेनैव कनिष्ठं तत् समाचरेत्,

उत्तमं तु शतग्रन्थि पञ्चाशद्ग्रन्थि मध्यमम्,
कनिष्ठं तु पवित्रं स्यात् षट्त्रिंशदग्रन्थिशोभनम्,
षट्त्रिंशच्च चतुर्विंशद् द्वादशेति च केचन,
चतुर्विंशद् द्वादशाष्टावित्येके मुनयो विदुः''

इति. हेमाद्रौ विष्णुरहस्ये

''**अष्टोत्तरशतं कुर्याद् चतुःपञ्चाशदेव वा,**
सप्तविंशतिरेव स्याद् ज्येष्ठमध्यकनीयसाम्''

इति. वाराहे चातुर्मास्यमाहात्म्ये तु

''**पूर्णिमायां ततः कुर्यात् पवित्राणां समर्पणम्,**
नानावर्णैः पट्टसूत्रैः निर्मितानि समर्पयेत्,
पवित्राणि ततो दद्याद् दक्षिणाभिः सहैव तु,
ब्राह्मणेभ्यः स्वयं चापि भक्त्या कण्ठेऽथवा करे,
विभृयाद् ब्राह्मणेभ्यश्च दत्तं भवति चाक्षयम्''

इति उक्तम्. रामार्चनचन्द्रिकायाम्

''**अङ्गुष्ठपर्वमात्रं तु कुर्याद् ग्रन्थिम् अथोत्तमे,**
तदर्द्धेन तदर्द्धेन मध्यमे च कनिष्ठके,
ग्रन्थीन् कुर्वीत सर्वत्र सुवृत्तान् सुमनोहरान्,
न वै विषमसङ्ख्याकान् ग्रन्थीन् कुर्वीत कुत्रचित्,
विशोभसूत्रादानेन कर्त्तुः स्याद् अशुभं फलम्,
पवित्रं परया भक्त्या तस्मात् कुर्वीत शोभनम्,
कुङ्कुमं रोचनं चैव कर्पूरेण विमिश्रितम्,
तेन संरंजयेत् सूत्रम्'' इति उक्तम्.

तथा

''**मासं पक्षमहोरात्रं त्रिरात्रं धारयेत् तथा,**
देवे तं सूत्रसन्दर्भं देशकालविवक्षया'' इति.

तथा

''**ततः पवित्रं गुरवे दद्यात् गन्धादिपूर्वकम्,**
अथैनं पूजयेद् भक्त्या स्वर्णवस्त्रानुलेपनैः'' इति.

तथा

''**ततः पवित्रं गुरवे दद्यात् गन्धादिपूर्वकम्,**
अथैनं पूजयेद् भक्त्या स्वर्णवस्त्रानुलेपनैः'' इति.

तथा

''पवित्रारोपणं काले न करोति कथञ्चन,
तदाऽयुतं जपेत् मन्त्रं पुनः स्तोत्रं समाचरेत्''

इति प्रायश्चितमपि प्रमादेन अकरणे उक्तम्.

अधिवासनं गन्धमाल्याद्यैः संस्कारः. सूत्रादिदेवतास्तु प्रायो न सम्मता मार्गान्तरीया इति. अधिवासनं तु सूत्रात्मना अनुस्यूतत्वात् सामान्येन आरोपिताया वार्षिकपूजाया एव आधिदैविकत्वाय इतिज्ञातव्यम्. तेन न कोऽपि शङ्कालेशः इति दिक्.

रक्षाबन्धनोत्सवः

श्रावण्यां[१] पौर्णमास्यां रक्षाबन्धनोत्सवः. स च भद्रारहितायां कार्यः

''भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा,
श्रावणी नृपतिं हन्ति राष्ट्रं हन्ति च फाल्गुनी''

इति वाक्यात्.

''नन्दाया दर्शने रक्षा बलिदानं दशासु च,
भद्रायां गोकुलक्रीडा स देशो वै विनश्यति''

इति वाक्यात् च इति दिक्. इति श्रावणोत्सवाः.

आलोच्य श्रीमदाचार्य–श्रीमत्प्रभुसरस्वतीम्।।
सम्प्रदायं च निश्चित्य प्रभुपौत्रीयनिर्णयैः।।१।।
तत्कृपाबलमाश्रित्य संक्षिप्तवरयुक्तिभिः।।
सम्प्रदायाज्ञजनताकृत[*] शङ्काकुले जने।।२।।
पद्धतिं निर्मलीकर्तुं व्रजराजैः विनिर्मिताम्।।
संवत्सरोत्सवानेहोनिर्णयोऽयं[२] मया कृतः।।३।।
प्रभवस्तेन तुष्यन्तु यन्मयोक्तम् अबोधतः।।
तत्क्षाम्यन्तु यथा मन्तुनिचयो न भवेद् मयि।।४।।

इति श्रीमत्प्रभुपदारविन्दमकरन्दप्राप्तिप्राप्तपुरुषोत्तमाभिधानेन विरचितः
संवत्सरोत्सवकालनिर्णयप्रतानः सम्पूर्णः.

* ''शङ्काकलंकिकाम्'' इति ख, ''शङ्काकलंकितम्'' इति ग पाठः.

[कठिनांशटिप्पणी: १.भविष्ये देवादिषु रक्षाबन्धनानन्तरे सति कथनात् पूर्वं भगवति रक्षाबन्धनं आवश्यकम् इति. २.अनेहसां कालानां निर्णय:.

कैश्चित् प्राचीनैः विरचिता प्रतानटिप्पणी समाप्ता

इयं टिप्पणी सं. १७५८ तमेब्दे सुरतनगरे लिखिते प्रतानपुस्तके लिखितोपलब्धा. भाषासौष्ठवात् विचारगाम्भीर्यात् श्रीपुरुषोत्तमानां स्वगुरुचरणत्वेन (टिप्पण्यां) निर्देशात् तच्छिष्यकोटिस्थेन केनापि विरचिता अत: प्राचीना इति अवगम्यते.]

।।द्रव्यशुद्धिः ।।

(भावदर्शिनी व्रजभाषाटीका)

अनुक्रमणिका.

गोस्वामी श्रीपुरुषोत्तमचरण विरचिता

।।द्रव्यशुद्धिः।।

(भावदर्शिनी व्रजभाषाटीका)

श्रीवल्लभाचार्यजीकूं नमन करके, भगवत्सेवामें उपकार करवेवारी बाहर-भीतरकी पदार्थकी शुद्धिको विचार या ग्रन्थमें करो जाय हे.१

अनेक धर्मशास्त्रके ग्रन्थनमें द्रव्यशुद्धीको विवेकपूर्वक विचार कियो हे, पर वो मन्दबुद्धिनके समझमें नहीं आवे हे तासूं ये ग्रन्थ बनायो जाय हे.२

१. स्नान तथा आचमन को विचार

प्रायश्चित्त प्रकरणमें याज्ञवल्क्यको एसो वचन हे के

''रजस्वला, शव, चाण्डाल, पतित, सूतिका(स्वावडवारी), शावाशौची(सूतकी) इनको जो स्पर्श भयो होय तो सचैलस्नान करनो. ओर रजस्वलादिकने जाकूं छूयो हे वो जो ओरकूं छूले तथा वो भी ओरकूं छूले तो वा तृतीयकूं आचमन करनो ओर ''आपोहिष्ठा'' इत्यादि ३ मन्त्रनको जप करनो और गायत्रीको मनसूं एक बेर जप करें''.

यहां 'तै:' ये बहुवचन कह्यो हे तासूं ओर भी जो कोई अपवित्र हें उनके स्पर्शमें आचमन करनो चहिये एसें यहां शास्त्रार्थसूं सिद्ध होय हे. तासूं रजस्वलाप्रभृतिके स्पर्शमें सचैलस्नान करनो. अपरार्कमें मनुवचन एसो हे के शवस्पर्शिके स्पर्शमें भी स्नान करनो चहिये. मर्यादासिन्धुमें या मनुवाक्यको एसो अर्थ करो हे के, रजस्वलादिने जाकूं छूयो होय वाने ओरकूं छूयो होय तो वा तीसरेकूं भी सचैलस्नान ही करनो चहिये. च्यवनऋषिको वचन एसो हे जो

''कुत्ता, चाण्डाल, प्रेतधूम(मुर्दाको धूंआ) देवद्रव्यसूं जीवेवारो, ग्रामयाजक (सगरेगामकूं यजन करायवेवारो), सोमवल्लीको बेचवेवारो, चिति(मुर्दाकीचिता/चिताके ताईं आयो काष्ठ), मद्य, मद्यकोपात्र, गीलो हाड, शवस्पर्शी, महापातकी, शव(मुर्दा) इनमेसूं काहूको भी स्पर्श भयो होय तो सचैलस्नान जलमें उतरकें करनो. फिर अग्निको स्पर्श करके

आठसे गायत्रीको जप करनो. फिर घी थोडो खायकें दूसरी बेर शुद्धस्नान करनो, फिर आचमन तीन बेर करनो तब शुद्ध होय हे''.

तासूं सिद्धान्त ये भयो के, रजस्वलादिके स्पर्शमें भी तथा उनके स्पर्शीनके स्पर्शमें भी सचैलस्नान ही करनो. इन सिवाय ओर जो कोई अपवित्र हें, जिनको नाम अगाडी लियो जायगो, उनके स्पर्शमें आचमन करनो ये बात याज्ञवल्क्यके वचनसूं अगाडी दिखाई जायगी.

अब यहां रजस्वलादि स्पर्शमें ओर भी विशेष दिखायो जाय हे. मर्यादासिन्धुमें पराशर वचन कह्यो हे के ''जो रजस्वलाको स्पर्श साक्षात् भयो होय अथवा वस्त्रादिकके अन्तरसूं भयो होय, पर सचैल स्नान ही करनो चहिये''. चारों वर्णकी रजस्वलामेंसूं कोई वर्णकी रजस्वला होय पर उनके स्पर्शमें समान अशुद्धि होय हे, तासूं सचैल स्नान करनो एसो ऋषिनको मत हे.

२. वस्त्रादिकके स्पर्शमें तथा बुद्धिपूर्वक स्पर्शमें स्नानादिको विचार

पृथ्वीचन्द्रोदयमें प्रचेता ऋषिको वचन हे के ''वस्त्रादिकके अन्तरसूं भी जो स्पर्श हे वो साक्षात्स्पर्श ही कहवावे हे ओर वामें भी जो साक्षात्स्पर्शकी शुद्धि हे सो ही करनी''.

पराशरको मत एसो हे के ''जाके छूएसूं स्नान करनो पडे वाकूं जो काष्ठ इत्यादिसू छूयो होय तो आचमनसूं शुद्धि होय हे, जेसे नावमें ओर लोग भी बेठे होंय तो भी आचमनसूं शुद्धि होय हे तेसें''.

सबको सार ये हे चाण्डाल, रजस्वला, महापातकी, सूतिका(स्वावडवारी) शव, इनको वस्त्र, काष्ठसूं भी जो स्पर्श करो होय तो भी सचैल स्नान करनो. ओर सूतकीको स्पर्श काष्ठादिकसूं करो होय तो आचमनसूं शुद्धि होय हे. क्योंकि सूतकीको नित्य सूतक ओछो होतो जाय हे. तासूं याज्ञवल्क्यको मत जो पहले कह आए के रजस्वलादि सिवाय ओर अपवित्रके स्पर्शमें आचमनसूं शुद्धि होय हे ये बात भी सङ्गत होय हे. रजस्वलादिकने जाकूं छूयो, वाने ओरकूं छूयो, वाने ओरकूं छूयो होय तो वा तीसरेकूं आचमनसूं ही शुद्धि समझनी एसो संवर्तको मत हे. ओर वस्त्रादिक पदार्थ रजस्वलादिसूं छूए होंय उनसूं ओर वस्त्र छूय जाय, उनसूं ओर छूएं तो विन तीसरे वस्त्रनकी प्रोक्षणसूं ही शुद्धि हे. तीसरे वस्त्रादिक की शुद्धि प्रोक्षणसूं होय हे ये बात 'तथा' इन अक्षरनके स्वारस्यसूं सिद्ध होय हे. तीसरेकूं आचमनसूं होय हे ये बात बुद्धिपूर्वक स्पर्श न करो होय तहां ही समझनो. क्योंके बुद्धिपूर्वक स्पर्शमें गौतमने

तीसरेकूं भी सचैल स्नान ही करनो बतायो हे. मर्यादासिन्धुमें देवल ऋषिको वचन भी एसो हे के तीसरेकूं स्नानसूं ओर चोथेकूं आचमनसूं शुद्धि होय हे. एसे ही वस्त्रादिक जो तीसरे हें उनकूं धोनो ओर चोथेनकूं प्रोक्षण करनो. ओर एकने रजस्वलादिको स्पर्श बिना जाने कियो ओर दूसरेने वाको स्पर्श जानके कर्योहोय तथा तीसरेने दूसरेकूं भी जानके छूयो होय तो वा तीसरे कूं स्नान लगे हे. तथा जहां पहलेने जानके स्पर्श कियो ओरननें फिर उनको स्पर्श अनजाने कियो होवे वा पक्षमें भी तीसरेकूं स्नान समझनो. ओर विशेष द्रव्यशुद्धि प्रकार अमेध्यादि स्पृष्ट पात्रके विचारके प्रकरणमें कहेंगे.

रजस्वलादिके स्पर्श भए पे स्नान केसें करनो ये बात संवर्त ऋषीने अच्छी रीतिसूं बताई हे सो अगाडी कही जाय हे.

३. शीतोदक–उष्णोदकसूं स्नानको विचार

रजस्वलादिकसूं स्पर्श भयो होय तो तीर्थादिकमें जायके शीतोदकसूं स्नान करनो चहिये. मनुने एसे प्रकरणमें उष्ण जलसूं न्हायवेको निषेध कियो हे तासूं, ओर जो तीर्थादिक न होय तो उष्ण जलसूं भी स्नान शंखऋषिने करनो बतायो हे. तासूं नित्य, नैमितक, काम्य क्रियाङ्ग(कर्माङ्गभूत) मलस्नान —ये स्नान तीर्थाभावमें उष्णोदकसूं भी करने. रात्रिमें भी अपवित्र स्पर्शमें स्नान करवेमें दोष नहीं हे.

४. रात्रिमें स्नान करवेको विचार

‘‘चाण्डाल रजस्वलादिको रात्रिमें स्पर्श भयो होय तो रात्रिमें ही स्नान करनो’’ एसो यमको वचन हे. जो रात्रिकूं अज्ञानसूं नहीं न्हाय तो, वाको वो दोष शतगुण होय जाय हे. या विषयमें पराशर ऋषिने विशेष कह्यो हे. यथा

> ‘‘जो सूर्यास्त भये पे चाण्डाल, रजस्वला, पतित, स्वावडवारी आदि अपवित्रनसूं छूयो होय तो रात्रिमें जलाशयमें स्नान करवेको तथा आचमन करवेको निषेध हे. तासूं दिवसमें जो जल जलाशयमेंसूं निकासो होय वासूं स्नान करनो. स्नानके जलमें सुवर्ण डारनो, पासमें अग्नि जरावनो, ब्राह्मणकी आज्ञा लेनो, आकाशकूं देखनो, फिर स्नान करेसूं शुद्धि होय हे’’.

देवल ऋषिको भी ये ही मत हे. जल निकासकें स्नान करेसूं जो ये शुद्धि बताई हे सो रजस्वलादि स्पर्शमें ही समझनी. शवस्पर्शमें तथा शवस्पर्शीके स्पर्शमें तो जलाशयमें उतरके स्नान करेसूं ही शुद्धि होय हे एसो वृद्धशातातप ऋषिको मत हे. ओर

रजस्वलादि स्पर्शमें भी जो दिनको निकासो जल हाजर नही होय तो जलाशयमें उतरकें भलें स्नान करे, पर अग्निकूं पास बरामनो चहिये. जो अग्नि भी हाजर न होय तो सोनेको छल्ला उङ्गरीमें पहरकें अथवा सोनेको तार ही उङ्गरीमें लिपेटके स्नान करेसूं शुद्धि होय हे एसो अत्रि ऋषिको मत हे.

५. रात्रिमें नदीप्रभृति जलाशयमें स्नान करवेको विचार

रात्रिमें नदीमें स्नान करवेको दूसरो प्रकार कात्यायन ऋषिने कह्यो हे के यद्यपि रात्रिमें जलमें प्रवेश करवेको तथा स्नान करवेको तथा जल निकासवेको निषेध हे पर ''धाम्नो–धाम्नोराजन्नितो वरुण नो मुञ्च'' ये जो तैत्तिरीय शाखाको मन्त्र हे ताकू पढकें, जलाशयमें रात्रिकूं भी स्नान करे तो देष नहीं हे. ओर रात्रिमें जलाशयमेंसू जल निकासनो होय तो जब तांई जल निकासे तब तांई प्राणायाम करे एसें बौधायन ऋषिको वचन 'मर्यादासिन्धु'में लिख्यो हे.

अब सबको सार ये हे जो दिनमें रजस्वलादिको स्पर्श भयो होय तो तीर्थादिकमें दिनमें ही शीतजलसूं स्नान करनो. ओर तीर्थादिक नहीं होय तो उष्णदकसूं अथवा पराएके घरके जलसूं स्नान करनो. ओर रात्रिमें जो रजस्वलादि स्पर्श भयो होय तो, रात्रिमें ही तीर्थपे जायकें अग्नि प्रज्वलित करकें ''धाम्नो'' इत्यादि पूर्वोक्त मन्त्र पढकें जलमें गोता मारनो. ओर तीर्थ न होय तो दिनमें निकासे भए जलसूं अथवा उष्णोदकसूं अथवा पराए जलसूं स्नान करनो. स्नानके जलमें सुवर्ण डारनो ओर पास अग्नि राखिके वाको दर्शन करते जानो. ओर अग्नि भी नही होय तो, सोनेको छल्ला अथवा तार हाथमें राखकें स्नान करनो. ओर वो भी न मिले तो पूर्वोक्त वस्तुमेंसूं जो मिले वो ही लेनी ओर रात्रिमें भी जल निकासकें स्नान करनो, फिर दोषकी निवृत्तिकें तांई प्राणायाम यताशक्ति करनो. ओर कछू भी न बन सके तो केवल हरिस्मरण करकें ही स्नान करे पर रात्रिमें अपवित्र ही न रह्यो आवे. ओर शवके स्पर्शमें तथा शवस्पर्शीनके स्पर्शमें तो जलाशयमें उतरके गोता मारेसूं ही शुद्धि होय हे. जलाशय नहीं होय तब तो केवल हरिस्मरणपूर्वक स्नान करेसूं शुद्धि होय हे एसो मालूम पडे हे. क्योंके अशुद्ध ही रहनो ये अनुचित हे. ओर प्रात:काल सूर्य उदयके अनन्तर फिर भी स्नान करे तब शुद्ध होय.

६. रात्रिमें जन्म–मरण वा रजोधर्म भयो होय ताको विचार

मिताक्षरामें कश्यप ऋषिको वचन हे के

१. सूर्योदयके पीछें अर्द्धरात्रपर्यन्त हर कोई समयमें स्त्रीकूं ऋतुधर्म भयो होय, अथवा काऊको जन्मभयो होय वा मरणभयो होय तो पहलो ही दिन माननो. म्लेच्छनकें जेसें रात्रि भए पे दूसरो दिनमाने हे तेसें नहीं माननो.
२. ओर रात्रिके तीन भाग करकें भी व्यवस्था करी हे. जेसें ३० घडी रात्रि होय तो २० घडी पहले दिनमें गिननीं ओर १० घडी बचीं सो दूसरे दिनमें माननी.
३. ओर एसो भी प्रमाण हे के रात्रिमें जन्म – मरण भयो होय वा ऋतुधर्म भयो होय तो जब तांई सूर्योदय न होय तब तांई पहले ही दिवस समझनो.

–इन पक्षनमें देशाचारसू व्यवस्था बांधनी योग्य हे. 'शुद्धिमयूख' ग्रन्थमें तो रात्रिको विभागपक्ष ही शिष्ट सम्मत हे एसें अधिक विचार कर्यो हे.

७. चतुर्थ दिवस प्रभृतिमें रजस्वलाकी शुद्धिको विचार

मिताक्षरामें स्मृत्यन्तरको वचन हे जो ''चतुर्थ दिवस स्नान करेसूं रजस्वला शुद्ध होय हे. ओर देवपूजा श्राद्ध इत्यादि कर्मके योग्य पांचमे दिवसमें होय हे''. ओर ''पञ्चम दिवसमें भी जो रजको संसर्ग होय तो वा दिन भी दैवपित्र्य कर्मके योग्य नहीं होय'' एसो मनुस्मृतिमें वाक्य हे.

देव – पितृ कर्ममें तो बिलकुल रजसंसर्ग न होय तब ही जायवेको अधिकार हे ये ही मत योग्य हे. सो ही वृद्धमनुने कह्यो हे के ''चोथे दिवस रजको संसर्ग होय तो स्नानसूं शुद्धि होय हे परन्तु देव–पितृ कर्मको तो अधिकार नहीं हे''. ओर परम्परासूं देव–पितृ कार्य करवेमें भी दोष नहीं हे. जेसें 'अन्न' संज्ञा जिनकी नहीं हे एसो सूखो चून – अनाज छूयवेमें दोष नहीं हे. तेसें ही शाकपत्र सम्हारवेमें भी दोष नहीं हे. पर साक्षात् पाक करवेमें तो दोष हे. ओर पञ्चम प्रभृति दिवसमें भी कभी रसोई करती वेर जो साडीमे रजो दोष मालूम पडे तो वा साडीकूं बदलके, अङ्गकूं शुद्ध करकें, दूसरी साडी पहरकें रसोई करनी.

८. अटकाववारी शुद्धि भये पीछे फिरसूं अटकाव दीखे ताको विचार

अत्रिऋषिको एसो मत हे के ''जो स्त्री एक बेर ऋतुधर्मसूं होय ओर वाकूं सत्रें दिनके भीतर फिर ऋतुधर्म मालूम पडे तो अशुद्धि नहीं माननी, अठारमें दिन जो मालूम पडे तो एक दिन अशुद्धि माननी, उन्नीसमें दिन जो मालूम पडे तो दो दिन अशुद्धि माननी ओर फिर बीसमें दिनसूं पूर्ण अटकाव माननो''. ओर जहां स्मृत्यन्तरमें एसो वाक्य हे के चौदमें दिवसके पहले अशुद्धि नहीं हे तहां एसो समझनोके चोथे दिवससूं

लेकें चौदमें दिन बताए हें. अटकावके तीन दिन जो वामें जोडेंगे तो सत्रह दिन ही होय जांयगे तासूं परस्पर विरोध कछू नहीं हे. अब ये जो सत्रह दिन ताईं फिर अटकाव दीखे तो न माननो ये बात वहां समझनी के जहां जाकूं बीस दिनके पहलें अटकाव आवतोई न होय. परन्तु जाकूं अठारे दिनके पहलें बहोत करकें अटकाव आवे ताकूं तो अठारे दिनके पहलें भी तीन दिनको पूरो ही अटकाव लगे हे, एसें मिताक्षरामें विज्ञानेश्वरने निर्णय करो हे. ओर जाकूं एक दिन ही अटकाव दीखके फिर न दीखे तब भी तीन दिनको ही माननो चहिये. एसो कश्यप तथा वशिष्ट ऋषिको वचन हे. ओर जाकूं अटकाव भएकी खबर नहीं पडे ओर पहरे भए वस्त्रमें दाग मालूम पडे तो घरमें जो–जो काम करे होय वे सब अशुद्ध होंय ओर तीन दिनकी अशुद्धि लगे हे एसो प्रजापतिको मत हे. ओर 'तत्त्वप्रकाशिका' ग्रन्थमें तथा 'धर्मप्रवृत्ति' ग्रन्थमें ज्ञान होय तबसु अशुद्धि होय एसो लिख्यो हे. यमस्मृतिमें भी एसें लिख्यो हे के

> ''व्यसन (विपत्ति)सूं, काम करवेसूं, निद्रासूं जो अटकावकी खबर न पडे तो पहलें जो पदार्थ छूए होंय वे कोई पदार्थ अशुद्ध नहि होंय हें. जाने पीछें जो–जो घरके पदार्थको स्पर्श करे तो जो–जो पदार्थ छूए उनकी शुद्धि करनी चहिये. जो माटीके पात्र छूए होंय तो उनकूं फेंक देने तथा उनमें जो घृत होय ताकूं तायलें तथा काष्ठके पात्रनकूं तथा मेष–महिषादिके शृङ्गनकूं तथा हाथी इत्यादिके दातनके पात्रनकूं छिलवाय लेनो. कांसेके पात्रनकूं सोबेर भस्म (राख)सूं मांजने. घरकूं गोबर माटी जलसूं लीपनो. धान्यकी शुद्धि प्रोक्षणसूं करनी. जाने–अजाने कोई भी पाप मिल गए होंय तथा ओर भी कोई अशुभ घरमें मिलो होय तो पुण्याहवाचन ब्राह्मणकी आज्ञासूं करनो चहिये. ओर अटकावको ज्ञान भयो होय तब पालनो तथा सन्देह मालूम पडे तो भी पालनो, स्नान करनो''

–इत्यादि सब विचार 'तत्वप्रकाशिका–धर्मप्रवृत्ति' में लिख्यो हे. जो इनके मतमें तो अटकावको ज्ञान होय तबसूं ही पालनो एसें सिद्ध होय हे. ओर 'स्मृत्यर्थसार' ग्रन्थमें एसें लिख्यो हे के पहलें अटकाव नहीं मालूम पड्यो होय पर जब मासपूर्तिके पीछें चार दिवसके भीतर मालूम पड्यो होय तब भी स्राव भयो होय तबको अनुमान करके स्राव जबसूं भयो होय तबसूं ही माननो, ज्ञान भलेंई पीछे भयो होय. ओर जन्म–मरणमें तो जब सुनी होय तबसूं अशुद्धि होय हे. तासूं जो कोई पापकी बात हे वो जबसूं बनी होय तबसूं ही वाको दोष हे, खबर भलेंई पीछे पडो. एसें ही अटकावमें खबर भलेंई पीछें पडो पर जबसूं वो भयो होय वाके अनुमानसूं ही अशुद्धि होय हे, एसें

स्मृत्यर्थसार कर्त्ताको मत हे.

